अन्यक्षुद्रादितस् (anyakṣudrādi-tas) *adv.* from minor ones (obstacles) etc. caused by enemy गृहरक्षा भवेद्व्याधिचोरग्रहभुजंगमात्। राजतो वैरितो बाधादन्यक्षुद्रादितस्तथा TantrRā. 9. 96 (comm. वैरिकृतक्षुद्रप्रयोगादितः)

अन्यक्षेत्र (anya-kṣetrá) *n.* 1A field or territory of another श्ये॒नो हु॒त्वं नं॑यु॒त्वा पर॑स्माद॒न्यक्षे॑त्रे अप॑रुद्धं॒ चर॑न्तम् AV. iii. 3. 4; AV. (P.) ii. 74. 4; प्रेता॒नि॑ त॒क्म॒ने॑ ब्रूमो अन्यक्षेत्रा॒णि वा इ॒मा AV. v. 22. 8; AV. (P.) xiii. 1. 6; xiii. 1. 13; अ॒न्यक्षे॑त्रे न र॑मसे व॒शी सन्मृ॑डयासि नः AV. v. 22. 9; AV. (P.) v. 21. 7; xiii. 1. 14; वैतहव्यमन्यक्षेत्रं वा एते प्रयन्ति ये रात्रिमुपयन्ति PañcBr. ix. 2. 1; दद्यात् दक्षिणाम् ... यदन्यक्षेत्राद्य पुरुषेभ्यश्चेत्युभयोर्विचारयोः LāṭyāŚS. ix. 11. 1; येषां तु वृक्षादीनामेकस्य क्षेत्रे मूलप्रदेशा वर्तन्ते अन्यक्षेत्रस्योपरि शाखास्तद्विषयेऽप्याह SmṛtiCan. iv. 555. 11; 1B field or territory of one अन्यक्षेत्रे तु जातानां शाखा यत्रान्यसंश्रिताः। स्वामिनं तं विजानीयात् KātySm. 761; अन्यक्षेत्रेऽन्येन क्रियमाणः सेतुर्यदि बहूपकारकः ... तदासौ न निषेध्यः DīpKa. 59. 31 (*on* 2. 156); 2A another territory एतस्मिन् कलशे सर्वमन्यक्षेत्रगणार्चितम्। ... न्यसेत् PauṣkS. 42. 192; 2B another area वेधयुतिः स्थानहता वेधो मुखफलगुणः स्वखातफलम्। त्रिचतुर्भुजवृत्तानां फलमन्यक्षेत्रफलहतं वेधः GaṇiSāSaṁ. 7. 23½; 3 wife of another ब्रामुष्यायणस्तु जनकस्यैरसादपकृष्टोऽन्यक्षेत्रोत्पन्नत्वात् Mitā. 234. 19 (*on* 2. 128)

अन्यक्षेत्रज्ञाधिष्ठित (anyakṣetrajñādhiṣṭhita) *adj.* ruled by another individual soul अन्यक्षेत्रज्ञाधिष्ठिते व्रीह्यादौ संश्लेषमात्रम् VedāntDī. 150. 1 (*on* iii. 1. 24); अन्यक्षेत्रज्ञाधिष्ठिते व्रीह्यादौ जायन्ते संसर्गमात्रं प्राप्नुवन्तीत्यर्थो ज्ञेयः VedāntPāSau. 269. 21 (*on* iii. 1. 24)

अन्यक्षेत्रविनिर्गता (anyakṣetra-vinirgatā) *adj.* (*f.*) sprung forth in the field of another अन्यक्षेत्रोपजातानां शाखास्त्वन्यत्र संस्थिताः। स्वामिनस्ता विजानीयादन्यक्षेत्रविनिर्गताः NāraSm. 166. 14.

अन्यक्षेत्रोपजात (anyakṣetropajāta) *adj.* (used as noun) (tree or plant) taken root or grown in the field of one अन्यक्षेत्रोपजातानां शाखास्त्वन्यत्र संस्थिताः। स्वामिनस्ता विजानीयादन्यक्षेत्रविनिर्गताः NāraSm. 166. 14.

अन्यक्ष्मानाथमान (anyakṣmā-nāthamāna) *adj.* who becomes a master of the territory of another तत्राभवत्पङ्क्तिरथाभिधानो भर्ता ...। क्षत्रान्यवैर्बिभ्रदलङ्घ्यमन्यक्ष्मानाथमानं जयमानमोजः JānaHa. 1. 12.

अन्यखण्ड (anya-khaṇḍa) *m., n.* another continent अन्यखण्डे गता सैव म्लेच्छा BhaviP. 422B. 12 (iii. 5. 22); त्वया विरचितस्तात ... नरा भुवि। अन्यखण्डे न गच्छन्ति BhaviP. 598A. 13 (iii. 24. 5)

अन्यखन्युत्थ (anyakhany-uttha) *adj.* arising, i.e. produced in another mine ताम्रम् ... । नेपालादन्यखन्युत्थं म्लेच्छमित्यभिधीयते RasRaSa. 5. 44.

अन्यखेचर (anya-khecara) *m.* another Vidyādhara (a class of semi-divine being) विद्याधरः ... शुकं प्राह कुञ्जेऽहं स्थास्याम्यत्रान्यखेचरः SamarāSaṁ. 2. 177.

अन्यखेट (anya-kheṭa) *m.* other planet (than Saturn) अन्यखेटश्रुतिबिम्बकाभ्यां तत्तुल्यकालांशकमस्य बिम्बं कृत्वा SiddhāTaVi. 268. 16.

अन्यखेटज (anyakheṭa-ja) *adj.* belonging to other planet चन्द्रस्य बलमाधार आधेयं चान्यखेटजम्। आधारभूतेनाधेयं दीयते परिनिष्ठितम् NāraS. 14. 20; आधेयं त्वन्यखेटजं वीर्यम् VasiS. 23. 47.

अन्यखेटबल (anyakheṭa-bala) *n.* power of another planet तद्वत्स्यात्। अमृतमयं तत्तस्मादभ्यधिकं त्वन्यखेटबलान्(?त्) VasiS. 20. 9.

अन्यख्याति (anya-khyāti) *f.* reputation of another तेन प्राणानुपेक्ष्यैवमन्यख्यातेर्मनस्विना। ऊर्ध्वाधिरोहे सोपानं कृतम् RājTa. (Ka.) 7. 1450.

अन्यग (anya-ga) *adj.* [*f.* - ā] 1A (woman) going to another person सा प्रीतियोगमप्राप्ता तेनोद्वेगेन दूषिता। पुरुषद्वेषिणी वा स्याद्विद्विष्टा वा ततोऽन्यगा KāmSū. 207. 4 (3. 2) (JayaMa. तं मुक्त्वान्यं पुरुषं गच्छति); RatiRaha. 11. 22; 1B (woman) living with another person (of the same class) (आशौचकम्) त्रिरात्रं स्यात्तथाचार्यस्वभार्यास्वन्यगासु च KūrmaP. 620. 10 (2. 23); विष्णुवचनोक्तेषु स्वभार्यासु अन्यगासु सजातीयोत्कृष्टजातीयपुरुषान्तरसंगतासु त्रिरात्रम् (अशौचम्) HārLa. 79. 7; 2A referring to any one else एवमेष महान् शब्दो मैत्रेय भगवानिति। परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ViṣṇuP. vi. 5. 76; 2B referring to another one, cf. अन्यगत; 3A pertaining to anything else न चान्यगौ भेदाभेदौ तत्र उपचार्यौ IṣṭaSi. 21. 3; 3B pertaining to the other इदमंशश्च सत्यत्वं शुक्तिगं रूप्य ईक्ष्यते। स्वयंत्वं वस्तुता चैवं विक्षेपे वीक्ष्यतेऽन्यगम् PañcDa. 6. 34; 4 present in another, i.e. individual soul सा मन्ददृष्टिस्तस्यैव ब्रह्मणः किं ततोऽन्यगा। ब्रह्मणश्चेत्क सार्वज्ञमन्यगा चेत्वतोऽन्यता AnuVyā. 16A. 6 (*on* 1.4)

अन्यगच्छ (anya-gaccha) *m.* 1 ultimate term in a progression त्रिकादिव्युत्तरश्रेढ्यां गच्छे क्वापि च यत्फलम्। तदेव त्रिगुणं कस्मिन्नन्यगच्छे भवेद्वद BījGa. 10. 158; 2 different, i.e. heterodox school, cf. अन्यगच्छीय.

अन्यगच्छीय (anyagacch-īya) *adj.* belonging to different, i.e. heterodox school तद्दुःखेन निःसृतोऽन्यगच्छीयदेवचन्द्रप्रद्युम्नाकराभ्यां सह श्रीकाश्मीरं प्रति PrabaCin. 60 (n). 3; अन्यगच्छीयदेवेन्द्रसूरिमलयगिरिभ्यां सह कलाकलापकौशलार्थं गौडदेशं प्रति प्रस्थिताः KumāPraPra. 88. 14.

अन्यगज (anya-gaja) *m.* other elephant जयत्यन्यगजान् हस्ती पार्ष्णिर्निजमदाञ्जनात् ĪśānŚiPa. i. 51. 57.

अन्यगजासह्य (anyagajāsahya) *adj.* not tolerated or conquered by any other elephant औपवाह्यो ह्रासावन्यगजासह्यः सुशिक्षितः PariPar. 2. 586.

अन्यगण (anya-gaṇa) *m.* 1 different, i.e. western group of people वीक्ष्यन्तेऽन्यगणेष्वत्राचरणा लक्षणोज्झिताः Gurvā. 466; 2 another class of verbal roots सर्वे धातवः अन्यगणपठिता अपि विषयो यस्य तत् तथोक्तम् Nyās. i. 551. 14 (*on* iii. 1. 83)

अन्यगणिकाप्रयुक्त (anyagaṇikā-prayukta) *adj.* prompted by another harlot अन्यगणिकाप्रयुक्ता यदि यूयं प्रहसनोद्यताः SamaMā. 8. 33.

अन्यगत (anya-gata) *adj.* [*f.* - ā] 1A (woman) living with another person B approaching another person 2A referring to any other B reffered to in other text 3A pertaining to one (used as noun) (that) which pertains to one person B pertaining to another person 4 present in another 5 gone, i.e. devoted to any one else 1A (woman) living with another person अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च। निवासराजनि प्रेते तदहः शुद्धिकारणम् YājñaSm. 3. 25; किं भूयसा भगिनि मां गणयान्यगतामितः। विरहज्वलनोच्छिष्टं जुहोमि ज्वलने वपुः RāmC. (App. 1) 40. 38; भार्यास्वन्यगतासु च। परपूर्वासु च स्त्रीषु त्र्यहाच्छुद्धिरिहेष्यते ŚaṅkhaSm. 15. 13; ViṣṇuDhaP. ii. 75. 18; अन्यगतासु पुनर्विवाहमन्तरेण भर्त्रन्तरं समाश्रितासु स्वैरिणीषु SmṛtiCan. vi. 41. 5; 1B approaching another person बहुविधसंभोगसुरतसंपन्ना। रोदित्यन्यगतेऽस्मिन्सा मध्या कामिनी पूज्या ŚṛṅgāDī. 1. 13; 2A referring to any other लिङ्गालिङ्गिनौ विधिप्रतिषेधौ अनुमीयमानौ तद्विषयावेवानुमातुं शक्येते नान्यगतौ TantrVā. 180. 8 (*on* i. 3. 11); 2B referred to in other text अतश्चान्यगता गुणाः कथंभावेन नापेक्षिताः प्रयोगवचनेनानुपसंहृता नाङ्गं भवन्ति TantrVā. 648. 6 (*on* ii. 4. 20); 3A pertaining to one न चान्यगतया देवतयान्यस्य व्यपदेशो भवति TantrVā. 1112. 3 (*on* iii. 6. 42); न चान्यगतमेकत्वमन्यत्रोपचर्यते NyāyKu. 148. 10; TattvCin. iii. 34. 3;

क्षोभस्त्वन्यगते हेतावन्यस्मिन् कार्यकल्पनम् RasāSu. 259. 14 (3. 119); न ह्यन्यगतेन व्याप्येनान्यत्र व्यापकसिद्धिः NyāySu. (Ja.) 116B. 6 (*on* i. 1. 5); (used as noun) (that) which pertains to one person न ह्यन्यगतं व्याप्यबुद्ध्याद्यन्यगमनस्य (गतस्य) व्यापकबुद्ध्याद्येर्निमित्तं भवति NyāySu. (Ja.) 351A.12 (*on* ii. 2. 6); **3B** pertaining to another person अन्यगतस्याप्यध्यासस्यापनोदनसमर्थे ... विभ्रम इत्याशङ्क्येत PañcPā. 6. 15 (*on* i. 1. 1); न किंचिदपि गुरुगतमन्यगतं वा कीर्तयेत् ManuBh. i. 182. 20 (*on* 2. 203); ManvaMu. 75. 21 (*on* 2. 203); तस्मादन्यगता वर्णा आश्रमा अपि नारद। आत्मन्यारोपिताः सर्वे भ्रान्त्या NāraPaU. 6. 14; अज्ञानरागादिकं बुद्धेरेवाभिमतं न पुरुषस्येति कथमन्यगतेनाज्ञानादिना पुरुषस्य बन्धमोक्षाद्युपपत्तिः NyāyMa. 283.2; शस्त्रपातादिपरुषस्पर्शानवर्जनीयान्स्वगतानन्यगतांश्च धैर्येण सहन् ... युद्धाख्यं कर्मारभस्व GītāBh. (Rā.) 85. 5 (*on* 2. 18); संहारकर्तृत्वेऽन्यगते तदभावापातात्तन्निषेध्यम् TattvPrakā. 112B. 8 (*on* ii. 3. 13); 4 present in another घण्टासंबद्धेष शब्दः ... अन्यगते शब्दव्यञ्जके यथैकस्यां घण्टायां भवति तथा घण्टान्तरेष्वपि TātpaṬ. (Vā.) 460. 7 (*on* ii. 2. 35); अन्यस्यान्यगतैर्दोषैर्दूषणं न हि नीतिमत् BhaviP. 29A. 13 (i. 8. 47); सुशीलवृत्तः ... यमेषु चैवान्यगतेषु नव्यथः PadmP. v. 15. 356; नो खलु दुःखं दुःखतया भयहेतुरन्यगतस्यापि तस्य तथाभावप्रसङ्गात् NyāyMa. 175. 9; अन्यगतशब्दार्थनियन्तृत्वं तदधिकरणत्वं चेति द्विधा हि शब्दप्रवृत्तिनिमित्तम् TattvPrakā. 67A. 11 (*on* i. 4. 3); 67B. 3 (*on* i. 4. 3); अन्यगतस्य शब्दप्रवृत्तिनिमित्तस्येश्वरपरतन्त्रत्वे न तत्र मुख्यवृत्त्ययोगात् NyāySu. (Ja.) 151B. 8 (*on* i. 1. 11); न ह्ययं शब्दस्तत्रं विशेषं विहायान्यगतं विशेषं तत्र बोधयति SiddhāLeSaṁ. 216. 10; प्रागन्यगतस्यैव प्रकृते राजगतस्यापि तस्य राजस्तुत्युत्कर्षकत्वात् RasGaṅ. 47. 12; 5 gone, i.e. devoted to any one else मन्मन्त्रोपासकाः निरपेक्षा नान्यगतास्तेषां हृद्योऽहमन्वहम् AdhyāRā. iii. 2. 37.

अन्यगतकर्तृत्व (anyagata-kartṛtva) *n.* agency present in another person गौणोपासनाफलं च प्रधानशेषतयोक्तम्। तत्रान्यगतकर्तृत्वारोपानुवादोऽपि संभवति AṇuBh. 9. 13 (*on* i. 1. 2)

अन्यगतक्रियाकारकसंबन्ध (anyagata-kriyākārakasambandha) *m.* syntactic relation of cause and action pertaining to another स्वस्वामिभावादावपि संबन्धेऽन्यगतक्रियाकारकसंबन्धोऽस्ति TātpaṬ. (Vā.) 36. 9 (*on* i. 1. 1)

अन्यगततत्तद्रूप (anyagata-tattadrūpa) *n.* particular form belonging to other letters रश्रुतेर्लश्रुतिर्भवति इत्युक्तम्। तस्यायं भावः। वस्तुतो रत्वादिमात्र कश्चित् किं तु अन्यगततत्तद्रूपेण स्फोटस्यावभासमात्रम् VaiyāSiMañ. 231. 3.

अन्यगतत्व (anyagata-tva) *n.* **1** the state of pertaining to others तेषामन्यगतत्वे तु न स्यात्सम्यक्समन्वयः AnuVyā. 48A. 1 (*on* 3. 3); **2** the state of being present in another person अध्ययनस्य ... तादर्थ्यमेव युक्तम्, न तु अध्यापनाङ्गत्वम् तस्य अन्यगतत्वेन बहिरङ्गत्वात् PūrvottaVāNāMā. 287.8.

अन्यगतत्वतस् (anyagatatva-tas) *adv.* due to the state of partaining to another पुरुषस्य स्वरूपावस्थानं मुक्तिरित्यपि परास्तम्। आत्मनः सुखरूपत्वात् बन्धस्यान्यगतत्वतः TattvPradi. (Ci.) 368. 9.

अन्यगतधर्म (anyagata-dharma) *m.* property present in another object अनुमानं च धर्मिगतधर्मोपलब्धौ प्रवर्तते न पुनस्तर्कः तर्कस्त्वन्यगतधर्मप्रदर्शनेनापि प्रवर्तते NyāyVār. 145. 9 (*on* i. 1. 40)

अन्यगतप्रवृत्तिनिमित्त (anyagata-pravṛttinimitta) *n.* cause of use (of a word) pertaining to another अङ्गरूढितोऽपि विद्वद्रूढेरेव प्राबल्यात् अन्यगतप्रवृत्तिनिमित्तस्यापि भगवदधीनत्वाद्य तत्रैव मुख्यत्वोपपत्तेरिति भावः TattvPrakā. 22A. 13 (*on* i. 1.21)

अन्यगतप्रशंसा (anyagata-praśaṁsā) *f.* eulogy relating to another गवाश्वादीनपेक्ष्य नैवान्यस्य प्राशस्त्यं विद्यते इत्येवम् अन्यगतप्रशंसानिमित्तः प्रतिषेधः TantrVā. 327. 1 (*on* i. 4. 22)

अन्यगतबहुत्व (anyagata-bahutva) *n.* plurality present in others न च स्वस्य बहुत्वाभावेऽप्यन्यगतबहुत्वस्य तदधीनत्वेन बहुत्वसंख्यावाचिशब्दवृत्तिः TattvPrakā. 71A. 5 (*on* i. 4. 12)

अन्यगतभावा (anyagata-bhāvā) *adj.* (*f.*) having feeling (of love) pertaining to another person दुष्टान्यगतभावा च कन्यादोषाः प्रकीर्तिताः NāraSm. 177. 36; VyāvaNi. 382. 12; (त्यजेत्कन्याम् ... विप्रदुष्टाम्) विप्रदुष्टां रोगिण्या-दिशब्दितामन्यगतभावां च त्यजेत् ManuBh. ii. 262. 20 (*on* 9. 72); ViraMi. (Saṁskāra.) 744. 24.

अन्यगतभेद (anyagata-bheda) *m.* difference present in one कश्चात्र विरोधः। किमेकार्थवत्प्रवृत्तिनिमित्तभेदयोः ... किं वा निमित्तयोरेव। नाद्यः अन्यगतभेदस्यान्यगताभेदेनाविरोधात् NyāyKu. 140. 17.

अन्यगतमुख्यविशेष्यत्व (anyagata-mukhyaviśeṣyatva) *n.* chief qualificandness present in another प्रथमावगतयागादिव्युत्पत्तिवेलायाम् ... अन्वयव्युत्पत्ति-कल्पना, न त्वन्यत्र। अन्यगतमुख्यविशेष्यत्वस्यानुपस्थितत्वेन विशेषणज्ञानाभावात् MīmāKau. iii (2). 39. 13 (*on* ii. 1. 5)

अन्यगतविधेय (anyagata-vidheya) *n.* predicate belonging to another अन्यगतविधेयनिषेधपर्यवसायित्वावश्यंभावेन तन्निर्वाहाय ... व्याख्येयम् ŚivārkaMaDī. i. 256. 26 (*on* i . 1. 21)

अन्यगतसंस्कार (anyagata-saṁskāra) *m.* impression present in one न ह्यन्यगतसंस्कारेणान्यस्य स्मृतिः संभवति ŚatDū. 122. 6.

अन्यगतसुकृतदुष्कृत (anyagata-sukṛtaduṣkṛta) *n.* merit and demerit belonging to one अन्यगतसुकृतदुष्कृतयोरन्यत्र प्रवेशासंभवेन स्तुतिपरत्वाभिप्रायः ŚrutaPra. ii. 490. 4 (*on* iii. 3. 26)

अन्यगतस्तुति (anyagata-stuti) *f.* praise pertaining to one यत्रान्य-गतस्तुतिविवक्षयान्यस्तुतिः क्रियते तत्रापि व्याजस्तुतिरेव Kuval. 71 (45)

अन्यगतहृदयत्व (anyagatahṛdaya-tva) *n.* the state of having the heart attached to another अय किं नामान्यगतहृदयत्वम् MadaKeC. 74 (10)

अन्यगतहेतु (anyagata-hetu) *m.* probans present in another अन्यगतहेतु-समुत्थत्वं तु न कथंचिदपि स्यात् NyāyPari. 338. 7.

अन्यगतहेतुत्व (anyagatahetu-tva) *n.* the state of being probans present in another शूर्पगतान्नकरणहेत्वपदेशान्न्यगतहेतुत्वप्रसङ्गः TantrVā. 49. 7 (*on* i. 2.30)

अन्यगतान्नकरणत्व (anyagatānnakaraṇatva) *n.* the state of being the means of (preparing) food present elsewhere न च शूर्पगतहोमसाधनत्वे साध्येऽन्यगतान्नकरणत्वस्य हेतुता संभवति MīmāKau. iii (1). 55. 9 (*on* i. 2. 30)

अन्यगताभेद (anyagatābheda) *m.* absence of difference present in another कश्चात्र विरोधः। किमेकार्थवत्प्रवृत्तिनिमित्तभेदयोः ... किं वा निमित्तयोरेव। नाद्यः अन्यगतभेदस्यान्यगताभेदेनाविरोधात् NyāyKu. 140. 17.

अन्यगति (anya-gati) *f.* **1** knowledge of the opposite व्याजस्तुतौ निन्दास्तुति-भ्यामन्यगतिः AlaṅkāRa. 40 (1); **2** attainment of another thing स एनान् ब्रह्म गमयतीति। न ह्यन्यविद्यया अन्यगतिर्युक्ता BrahmSūBh. (Ma.) 11B. 7 (*on* i. 2. 16); **3** any other refuge उपायरूपगतेरपि दृश्यमानत्वात् कथमिव श्रीकृष्णादृतेऽन्य-गतेरभावत्वम् VedāntRaMañ. 103. 11 (*on* 3. 8); **4** different state (of existence), cf. **अन्यगतिस्थ**; **5** another alternative or option, cf. **अन्यगतिमत्**; **6** gait of another, cf. **अन्यगत्यादि**.

अन्यगति (anya-gati) *adj.* **1** having any other alternative or option उद्भ्रान्तभेककुलकीर्णजले तडागे कोऽप्यस्ति नाम यदि नान्यगतिर्विकोटः SaduktiKa. 274. 8; **2** having another gait अतोऽन्यगतयो नेष्टाः सर्वदैव तुरंगमाः AśvaVai. 3.94

अन्यगतिमत् (anyagati-ma(n)t) *adj.* having another alternative or option अनन्यगतिन्यायलभ्यानामर्थानामन्यगतिमदर्थविषयत्वाभावात् CaturCin. iii (1). 344. 13.

अन्यगतिस्थ (anyagati-stha) *adj.* (used as noun) (one) abiding in a different state (of existence) यद्यपि देवो देवं न मारयति अन्यगतिस्थं तु मारयति AbhidhKoBh. 253. 8 (*on* 4. 83); यावन्न दुःखवेदनाभ्याहता भवन्ति। अन्यगतिस्था नित्यं जानते AbhidhKoBh. 430. 18 (*on* 7. 56); अन्यगतिस्थं तु मारयतीति। प्रेतादिगतिस्थम् Sphuṭā. iv. 91. 23 (*on* 4. 84)

अन्यगतोत्पत्ति (anyagatotpatti) *f.* origination which is present in one अन्यगतोत्पत्त्यादेरन्यत्रारोपे बीजं तु अन्तःकरणस्य रागादिदोष एव VaiyāSiMañ. 220. 6 (comm. अन्तःकरणस्थकारबुद्धिमपहाय यकारबुद्धिकरणात्)

अन्यगत्यसंभव (anyagaty-asambhava) *m.* impossibility of another alternative of option नेत्रैरिवोत्पलैः पद्मैः इत्यादौ चान्यगत्यसंभवात् SāhiDa. 567. 4.

अन्यगत्यादि (anyagaty-ādi) *adj.* gait of another etc. विकृतवेषादिविभावः ... आदिशब्दात्रर्तनान्यगत्याद्यनुकरणासत्प्रलापभूषणादीनि विभावा यस्य सः Kāvyānu. (He.) 89. 7.

अन्यगत्व (anyaga-tva) *n.* the state of referring to another one बहुलिङ्गसमायुक्तैर्बहुभी स्तनामभिः। प्रसिद्धैरन्यगत्वेन वाच्यस्साक्षाज्जनार्दनः AnuVyā. 12A. 5 (*on* 1. 2); 13A. 7 (*on* 1. 4)

अन्यगन्ध (anya-gandha) *n.* red lotus (*lit.* having distinct odour) अन्यगन्धं (v.l. अन्यगन्धं) सोमाख्यं सुरक्तं रक्तकैरवम् ParyāMu. 13.25.

अन्यगन्ध (anya-gandha) *m.* odour of another object न च जले गन्धस्वे-भावेनान्यगन्धप्राप्तिः सुतरां दुर्वचेति वाच्यम् BālamBha. i. 74. 21 (*on* 1. 20)

अन्यगमकत्व (anyagamaka-tva) *n.* the state of being what indicates another object न हि धूमे वह्निगमकत्वं सदातनम्। अन्यगमकत्वस्य च दर्शनात् Loc. 197. 23 (*on* 3. 33)

अन्यगमन (anya-gamana) *n*. 1 act of construing with another एकत्र विधिर्गच्छति तदा नेतरत्र गतो भवति, एवमितरगमनेऽप्यन्यगमनानुपपत्तिरसंबन्धात् TantrVā. 478. 9 (*on* ii. 2. 6); 2 act of going to another person हे राघव त्वया ... भूः ... बद्धा निबद्धा। निजायतीकृतेत्यर्थः। अन्यगमनशङ्कया इति भावः AlaṅkāMañ. 20. 17.

अन्यगमा (anya-gamā) *adj*. (*f*.) proceeding by means of other thing, i. e. chariot सेना ... स्वगमान्यगमा चेति द्विधा ...। स्वगमा या स्वयं गन्त्री यानगान्यगमा स्मृता ŚukraNī. 4 (7). 2.

अन्यगर्भ (anya-garbha) *m*. another womb चराचरगुरुर्ब्रह्मा। ... अन्यगर्भे परान् गर्भान् सदैव परिवर्तयन्। रतिमाप्नोति MārkP. 51. 13.

अन्यगर्भ (anya-garbha) *adj*. based on anything else द्रव्यसंबन्धो हि सर्वत्र क्रियागर्भ एव ... क्रियाकरणसंबन्धस्तु नान्यगर्भ इति स एव युक्तः TantrRa. 220. 10.

अन्यगवी (anya-gavī) *f*. cow belonging to another person अन्यदीयो वृषभो यद्यप्यन्यगवीषु वत्सान्बहूनपि जनयेत् ManuBh. ii. 255. 17 (*on* 9. 50)

अन्यगवेषणा (anya-gaveṣaṇā) *f*. act of searching for another person अथवा मय्येव तिष्ठति भग्नभागधेये किमन्यगवेषणया Mukundā. 183 (3)

अन्यगात्र (anya-gātra) *n*. body of another being अप्यन्यगात्रप्रतिच्छन्नरूपो दुरन्वेषणः स्यादुरुर्नः ŚaṅkaDigVi. (Mā.) 10. 33; अन्यगात्रमपि निर्विशतो मे निर्वृतिर्भवति कापि तथापि MadaKeC. 74.

अन्यगात्रगूढ (anyagātra-gūḍha) *adj*. who has hidden (himself) in the body of another being किं कुर्मः क्व नु मृगयामहे क्व यामः ... । विज्ञातुं कथमिममीश्महे विचिन्त्याप्यासिन्धु क्षितितलमन्यगात्रगूढम् ŚaṅkaDigVi. (Mā.) 10. 21.

अन्यगाथा (anya-gāthā) *f*. laudatory verse about other ये कथास्ते विहायान्यगाथाः प्रभो कीर्तयन्तेऽथ शृण्वन्ति वा ते जनाः। दुःखिताः स्युः SkandP. ii (9). 15. 24; पापपाशेन यन्त्रितः। अनादृत्य वृथागाथासक्तबुद्धिः (v.l. अनादृत्यान्यगाथासु सक्तबुद्धिः) प्रवर्तते BṛNāraP. 1. 65.

अन्यगामिता (anyagāmi-tā) *f*. the state of going to other इदमयुक्तं यदन्यकृतस्य कर्मणोऽन्यगामिता फलस्योच्यते ManuBh. i. 387. 20 (*on* 4. 177)

अन्यगामित्व (anyagāmi-tva) *n*. 1 the state of approaching another person निर्धनस्य तु नियोगाद्विना योऽस्य भार्यां संगृह्णीयात्, स दद्यात्। ... तद्योषितामेवान्यगामित्वसंभवात् BālaKrī. i. 218. 3 (*on* 2.47); 2 the state of (property) going to another person (as inheritance) पुत्रे विद्यमाने पितृद्रव्यस्यान्यगामित्वाभावात् अनन्याश्रितद्रव्यः पुत्र ऋणं दाप्यः ... । सत्यपि पुत्रे पितृद्रव्यस्यान्यगामित्वमङ्गीकृत्यापि दोषमाह Subodhi. 27. 21-22 (*on* 2. 51)

अन्यगामिन् (anya-gāmin) *adj*. [*f*.–ī] 1Ai present in another न ह्यन्यगुणोऽन्यगामी भवति TantrVā. 52. 12 (*on* i. 2. 31); 1Aii pertaining to another यदिह विभेदकं कथितमभ्यसनप्रभृतिकमन्यगामि तदसिद्धमपि NayaMañ. III. iii. 1. 2; 1Bi approaching another person, adulterous ततः सोऽर्गलितद्वारां भार्यां तामन्यगामिनीम्। दृष्ट्वा दुःखाशनिहतो देवदासो व्यचिन्तयत् KathāSaSāg. iii. 5. 27; Rāṣṭrau. 4. 9; (used as noun) (woman) approaching another person तदहमियमन्यगामिनीति दत्तान्यंशुकानि प्रत्याहर्तुमुद्यतोऽस्मि ŚṛṅgāBhū. 69 (1); 1Bii going to another वंशजामुपगतामपि श्रियं कामिनीमिव गुणैकलालसाम्। स्वामुपेक्ष्य कुरुतेऽन्यगामिनीम् Rāṣṭrau. 4. 9; प्रारब्धानि ... अन्यगामीनि भवेयुरित्यत्रासंभावनानिरासायाह GoviBh. 297. 4 (*on* iv. 1. 18); 1Biii going to another person (as inheritance), cf. **अन्यगामित्व 2**; 2 belonging to one अन्यगामिना वस्तुनान्यदुपलक्ष्यते यतः SaṁkṣeŚā. 1. 334 (i. 248.10)

अन्यगामिफल (anyagāmi-phala) *n*. fruit going to other कथमन्यकर्तृकमन्यगामिफलं स्यात् BrahmSūBh. (Śrī.) ii. 409. 1 (*on* iii. 4. 45)

अन्यगामिफल (anyagāmi-phala) *adj*. having fruit going to one वाक्यशेषोक्तं फलमिष्टिकर्तुः पितुरेव न पुत्रस्यान्यगामिफले कर्मण्यन्यस्य प्रेरणानुपपत्तेः UpaParā. 9. 15.

अन्यगिर् (anya-gir) *f*. speech of another person कस्ते वाक्यामृतं त्यक्त्वा शृणोत्यन्यगिरं बुधः RasāSu. 60. 19 (1. 222)

अन्यगुण (anya-guṇa) *adj*. 1 having different quality त्रयः। घ्नन्ति चान्यगुणत्वेन रसदोषं शरीरिणाम् BhelaS. 67. 8 (3.1); 2 subordinate to other, cf. **अन्यगुणता 2**.

अन्यगुण (anya-guṇa) *m*. 1 other channels or means द्वितीयगृहगे दिनकरतनये ... अन्यगुणैः कृतं वसुचयं तदपि खलु भवत्यम्बिव वंशपत्रपतितं न बहु न च चिरम् BṛSaṁ. 104. 40; 2 other advantage लग्नेन हीनान्यगुणान्वितापि प्रीतिं न यात्रा मनसः करोति YogYā. 5. 34; 3Ai extraordinary quality किं त्यक्तापास्तदेवत्वमानुष्यकपरिग्रहैः। ज्वलितान्यगुणैर्गुर्वी स्थिता तेजसि मानिता Kirātā. 15. 21; 3Aii other (poetical) merit or excellence वाणी ...। या शून्यापि सर्वान्यगुणैर्व्यनक्ति ŚrīKaC. 2. 14 (comm. अन्ये गुणा औदार्यादयः); 3Aiii other (actual) merit, ŚrīKaC. 2. 14 (comm. सा च गुणैर्मशकवारणादिभिः); 3Aiv other quality or virtue प्रतिबिम्बवदप्येषामानन्दोऽन्यगुणा यथा AnuVyā. 44A. 8 (*on* 3.2); अन्यगुणानाकीर्तयतोऽन्यां कल्पय विद्याम् NayaMañ. III. iii. 12. 24; 3B quality or virtue of another न सतोऽन्यगुणान् हिंस्यान्नासतः स्वस्य वर्णयेत् YaśasCam. ii. 350. 7; संगतान्यगुणानङ्गीकारमाहुरतद्गुणम् Candrā. 5. 105; 4A property of one न ह्यन्यगुणोऽन्यगामी भवति TantrVā. 52. 12 (*on* i. 2. 31); 4B property of another ननु कथं शरीरगुणत्वनिराकरणेनान्यगुणत्वसिद्धिः YuktiSneha. 120. 26 (*on* i. 1. 5); 4C another (phonetic) property, cf. **अन्यगुणक B**.

अन्यगुणक (anyaguṇa-ka) *adj*. A possessing another quality द्रव्यमरुणिम्ना परिच्छिद्यमानमरुणाशब्दाभिधानीयतां लभते। तदेवान्यगुणकं नारुणाशब्दः शक्नोत्यभिवदितुम् ŚābaBh. 682. 3 (*on* iii. 1. 12); क्रिया हि प्रधानभूता ... अन्यजातीयमन्यगुणकं च द्रव्यमनिच्छन्ती NyāyRa. 919. 21 (*on* 7. 269); B (used as noun) (one) possessing another (phonetic) property उदात्तादिगुणयुक्तानां अन्यगुणकव्यावृत्तिस्तु स्थानेऽन्तरतमपरिभाषया बोध्या LaŚabdeŚe. i. 89. 5.

अन्यगुणकीर्तन (anyaguṇa-kīrtana) *n*. act of telling the virtues of others नासौष्ठवं प्रसङ्गे न चान्यगुणकीर्तनेषु भारत्याः KuṭṭaMa. 579 (comm. परेषां गुणकीर्तनेषु गुणश्लाघासु अपि भारत्याः वाचः असौष्ठवं न); उद्भिन्नपीनपुलकाभरणो भवामि यत्सत्यमन्यगुणकीर्तनतोऽहमेकः HarVi. 579.

अन्यगुणकृत (anyaguṇa-kṛta) *adj*. caused by another quality वयःकृतज्येष्ठत्वे उक्तार्थालाभादाह। ज्येष्ठा गुणेति। अन्यगुणकृतज्येष्ठत्वमपि नाभिमतम् BālamBha. ii. 200. 24 (*on* 2. 135)

अन्यगुणख्याति (anyaguṇa-khyāti) *f*. fame of virtue of another गुणैस्तस्य जगत्सर्वं शशाङ्ककिरणामलैः। व्याप्तमन्यगुणख्यातितिरस्करणकारणैः PadmP. (Ra.) 15. 149.

अन्यगुणग्रह (anyaguṇa-graha) *m*. assumption of the quality of another object अन्यगुणग्रहोऽन्यस्य स्वगुणत्यागतस्तु यः। तद्गुणालंकृतिः AlaṅkāMañ. 191 5.

अन्यगुणता (anyaguṇa-tā) *f*. 1 the state of being a quality of another object तदिदमपि द्वयं सुखादीनां शरीरगुणत्वं निवारयदन्यगुणतां सूचयति ŚāstrDī. 120. 1 (*on* i. 1. 5); 2 the state of being subordinate to other कर्तुरुपाधितयोक्ता कृद्वाच्यतया गतान्यगुणतां वा VyaktiVi. 5. 20.

अन्यगुणदूषण (anyaguṇa-dūṣaṇa) *n*. censure of qualities or virtues of others असूयान्यगुणदूषणम् AbhidhāCin. 323.

अन्यगुणदोष (anya-guṇadoṣa) *m*. virtue and vice of others तथान्यगुणदोषेषु संशयैकान्तवादिभिः। पुरुषातिशयो ज्ञातुं यद्यशक्यः किमिष्यते NyāyVi. 2. 388.

अन्यगुणनिबन्धन (anyaguṇa-nibandhana) *adj*. caused by the qualities of others भूतानामपि तदारम्भकाणां प्रवृत्तिविशेषोऽन्यगुणनिबन्धन एव TātpaṬ. (Vā.) 572. 4 (*on* iii. 2. 39)

अन्यगुणनिमित्त (anyaguṇa-nimitta) *adj*. caused by the quality of others दृष्टश्चान्यगुणनिमित्तः प्रवृत्तिविशेषो भूतानां सोऽनुमानमन्यत्रापि NyāyBh. 216. 8 (*on* iii. 2. 37); न केवलं शरीरस्य प्रवृत्तिविशेषोऽन्यगुणनिमित्तः TātpaṬ. (Vā.) 572. 3 (*on* iii. 2. 39)

अन्यगुणनिष्ठ (anyaguṇa-niṣṭha) *adj*. pertaining to the quality of others स्वनिष्ठगुणस्यान्यगुणनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतानाश्रयत्वेऽतद्गुणः AlaṅkāKau. (Vi.) 405. 16.

अन्यगुणप्रकाशन (anyaguṇa-prakāśana) *m*. manifestation of virtues of others मिहिरो[ऽन्यगुणप्रकाशने] परदोषावरणे महत्तमः PṛthvīVi. 12. 62.

अन्यगुणभुज् (anyaguṇa-bhuj) *adj*. possessing other virtues वरा गुणाः। एभिर्हीनोऽन्यगुणभुङ्महीभुक् सधनोऽपि च। महीं स्वल्पां नैव भुङ्क्ते ŚukraNī. 1.176.

अन्यगुणरहित (anyaguṇa-rahita) *adj*. devoid of other qualities or virtues यस्यैते पुरोहितादयः तस्यैव ते अन्यगुणरहिता अपि पुरोहितादित्वेनैव पात्राणि CaturCin. i. 33. 13.

अन्यगुणर्द्धि (anya-guṇarddhi) *f*. merit and prosperity of another असूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता SaraKaṇṭhā. 588. 17; SāhiDa. 160 5.

अन्यगुणस्वीकार (anyaguṇa-svīkāra) *m.* acceptance, i.e. assumption of quality of others तद्गुणः। स चान्यगुणस्वीकारोऽर्थात्स्वगुणत्यागे भवति AlaṅkāRa. 97. 3.

अन्यगुणापहार (anyaguṇāpahāra) *m.* stealing the virtues of others नो जीविकेयमिदमन्यगुणापहारकर्म प्रकामसुखदं व्यसनं खलस्य UdaySuKa. 17. 21.

अन्यगुणासहिष्णुता (anyaguṇāsahiṣṇutā) *f.* non-tolerance of virtues of others ईर्ष्यान्यगुणासहिष्णुता ManvaMu. 255. 19 (*on* 7. 48)

अन्यगुणोत्कर्ष (anyaguṇotkarṣa) *m.* excellence of other qualities अनन्यसामान्यं सत्त्वं तस्यावधार्य सः। तुष्टोऽप्यन्यगुणोत्कर्षात्तुतोष सुतरां नृपः KathāSaSāg. v. 2. 158.

अन्यगुणोपमर्द (anyaguṇopamarda) *m.* act of reproaching or denial of virtues of others यः स्वानपि ... गुणान् खलतया मलिनीकरोति। तस्यास्य भोगिन इवोग्ररुषः खलस्य दाक्षिण्यमस्ति कथमन्यगुणोपमर्दे SubhāRaK. 38. 18.

अन्यगुणोपरक्त (anyaguṇoparakta) *adj.* affected by, i.e. associated with the quality of other अन्यगुणोपरक्तं वस्तु स्वरूपत एव प्रतीयते AlaṅkāRa. 97. 4.

अन्यगुरु (anya-guru) *m.* another teacher श्रुत्वा चान्यगुरोर्वक्त्रात् ...। पूर्वविद्याम् ... ज्ञात्वा सिद्धीश्वरो भवेत् KāliViT. 3. 9.

अन्यगृध्र (anya-gṛdhra) *m.* another vulture मांसाशिनान्यगृध्रेण तस्य युद्धमभूद्दिवि SkandP. iv. 28. 43.

अन्यगृह (anya-gṛha) *n.* house of another person भर्त्रा पित्रा सुतैर्न स्त्री वियुक्तान्यगृहे वसेत् BṛhaspaSm. 193. 9; 296. 481; पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्। स्वप्नमन्यगृहे वासो नारीणां दूषणानि षट् Hitopa. 1. 86; त्वया गृहे यन्महता दीयते तु प्रयत्नतः। तन्मे न रोचते चौर्यं कथमन्यगृहे कृतम् ĀdiP. 22. 83; सा कालं गमयत्यन्यगृहे TriṣaŚaPuC. i. 1. 543; मदीयेऽपि गृहे कालान्नावशिष्टोऽस्ति पूर्वजः। का वार्तान्यगृहेष्वस्ति TriṣaŚaPuC. ii. 6. 138; त्वदन्तिकेऽम्ब स्थास्यामि यास्याम्यन्यगृहे न तु। वरं मे मोदकं मा दा इत्यूचानो रुरोद सः PārśvaC. 3. 773.

अन्यगृहत्व (anyagṛha-tva) *n.* the state of being the house of one person चैत्रगृहे मैत्रस्तिष्ठति इत्यन्यगृहत्वेन निर्दिष्टे अप्यन्यावस्थानमुच्यते ŚivārkaMaDī. i. 432. 6 (*on* i. 3. 13)

अन्यगृहद्वार (anyagṛha-dvāra) *n.* door of the house of another person अन्यगृहद्वारविद्धं गृहद्वारं न चिन्तयेत् ŚukraNī. 1. 233.

अन्यगृहपरिचय (anyagṛha-paricaya) *m.* acquaintance with the house of another person अन्योऽस्ति नगरघट्टकानां प्रवेशाय मार्गः तथापि तैरन्यगृहपरिचयाद् द्वार एव लक्ष्यं गृह्यते DhūrtaViSaṁ. 3. 21.

अन्यगृहवास (anyagṛha-vāsa) *m.* act of living in the house of another person पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्। स्वप्नोऽन्यगृहवासश्च नारीणां दूषणानि षट् SkandP. iv. 40. 89.

अन्यगृहवासिनी (anyagṛha-vāsinī) *adj.* (*f.*) living in the house of another person वृथाहास्यमुखीं चैव सदान्यगृहवासिनीम्। विवादशीलां भ्रमितां निष्ठुरां नोद्वहेद्बुधः BṛNāraP. 24. 8.

अन्यगृहस्था (anyagṛha-sthā) *adj.* (*f.*) staying in the house of another person तात नान्यगृहस्थापि चलत्येवंविधा वधूः RāmC. (App. 1) 40. 52.

अन्यगृहीत (anya-gṛhīta) *adj.* [*f.*–ā] i held by another person न गृहस्थितयान्यगृहीतया वा यष्ट्या यष्टिमानित्युच्यते BālaKrī. i. 106. 25 (*on* 1. 132); ii held, i.e. worn by another person भूषणं हारकटकादि तदङ्गलग्नं तदीयमेतद्धेति ज्ञात्वा विना प्रयोजनेनान्यगृहीतमपि स्पृश्यते ManuBh. ii. 220. 7 (*on* 8. 357)

अन्यगृहोषिता (anyagṛhoṣitā) *adj.* (*f.*) who has lived in the house of another person रजकः क्रोधसंप्लुष्टो भार्यामन्यगृहोषिताम्। पदा संताडयामास PadmP. iv. 55.68.

अन्यगेह (anya-geha) *n.* 1 another house गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु। अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् ManuSm. 2.184 (ManvaVi. निषिद्धान्यगृहाणाम्); 2 house of another person वीरः। न यथाभ्यगाद्यचितुमन्ववग्वा न यथा यथा नाश तदन्यगेहे DvyāśraKā. 12. 2; अन्यगेहे वासः परगृहे वसनम् SmṛtiCan. iv. 567. 13; दृष्टिपातोऽन्यगेहेषु UttaKuC. 252.

अन्यगेहगा (anyageha-gā) *adj.* (*f.*) going to the house of another person सैरन्ध्री त्वन्यगेहगा। अलंकारादिचतुरा स्वाधीना गन्धकारिका KośaKaTa. 1 4825.

अन्यगेहवास (anyageha-vāsa) *m.* act of living in the house of another person स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट् ManuSm. 9. 13 (ManvaMu. परगृहनिवासः); ManuBh. ii. 245. 5 (*on* 9. 13)

अन्यगेहाटन (anyagehāṭana) *n.* act of going to the house of another person वक्तव्यं नानृतं किंचिन्नान्यगेहाटनं तथा BrahmP. 124. 25.

अन्यगेहोदकाचान्त (anyagehodakācānta) *adj.* (used as noun) (one) who has sipped water in the house of another person भुञ्जानेषु च विप्रेषु त्वन्तरा मृतसूतके। अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः BṛhaspaSm. 353. 6.

अन्यगो (anya-go) *f.* cow belonging to another person यदन्यगोषु वृषभो वत्सानां जनयेच्छतम्। गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम् ManuSm. 9. 50.

अन्यगोक्षार (anyago-kṣāra) *n.* alkali or ashes (of cowdung) of another cow कपिलागोर्भस्मोक्तं लब्धं गोभस्म नो चेदन्यगोक्षारं यत्र क्वापि स्थितम् BṛJābāU. 3. 1.

अन्यगोचर (anya-gocara) *adj.* [*f.*-ā] 1 related to another (syntactico-semantic item) उद्देश्यं तत्कर्मान्यगोचरयापि क्रियया तस्यैवाप्तुमिष्यमाणत्वात् BhāvanāVi. 138. 2; 2A referring to another object or topic विधानमेव नैकस्य व्यवच्छेदोऽन्यगोचरः BrahmSi. 46. 12; न हि शुक्तौ रजतज्ञानं बाधितमिति स्वगोचरमन्यगोचरं वा भवति Kāśi. i. 72. 19 (*on* 2. 21); मृतसंजीविनीं विद्याम् ... दत्तवान् सुरश्रेष्ठः ... । इतरा लौकिकी विद्या वैदिकी चान्यगोचरा BrahmP. 95. 27; अस्य स्वसंविन्मात्ररूपस्य तन्निष्ठबोधस्य असिद्धेः न ह्यन्यसंविदन्यगोचरा इति भावः Bhāsk. i. 216. 11 (*on* i. 5. 5); 2B referring to any other thing एकैकनियमादेव गतिः स्यान्नान्यगोचरा TantrVā. 226. 12 (*on* i. 3. 23); न चान्याभासमन्यगोचरं भवितुमर्हति Bhām. 438. 22 (*on* ii. 2. 28); 2C referring to one object न ह्यन्यगोचरस्य ज्ञानस्य ततोऽन्यगोचरत्वेन भ्रमः ŚatDū. 128. 18; 3 obtained or understood by another (means) अदृष्टपूर्वे त्वज्ञानं संबन्धप्रत्ययोऽपि वा। संबन्धो न च तस्यार्थो योऽर्थः स त्वन्यगोचरः ŚlokaVār. 431. 85 (5). 102); 4 belonging to other (than oneself) अज्ञात्वैवं परं तत्त्वं मायामोहितचेतसः। स्वात्मन्यारोपयन्त्येतत् कर्तृत्वाद्यन्यगोचरम् SarvaVeSāSaṁ. 428.

अन्यगोचर (anya-gocara) *m.* A object known by any other (means) नान्यगोचरे नाप्यगोचर इत्यनुसंहारबुद्धिरपि परस्परव्यावृत्तवर्णमात्र(र्णत्रि)तयावगाहिनी TattvBi. 49. 3; B object known by other (means) एष च ज्ञानस्य दोषो यद्यन्यगोचरस्य अन्याकारत्वम् Kāśi. ii. 20. 13 (*on* 5 (1). 19)

अन्यगोचरज्ञान (anyagocara-jñāna) *n.* knowledge referring to one तद्वित्तिरेव वा विषयवेदनं भवेत्। ... अन्यगोचरज्ञानस्यान्यविषयत्वासंभवात् Kāśi. ii. 129. 14 (*on* 5 (3). 70)

अन्यगोचरत्वमात्र (anyagocaratva-mātra) *n.* mere state of referring to other (than itself) भासमानादन्यगोचरत्वमात्रमतिप्रसङ्गः VedāntKa. 286. 13 (*on* ii. 2. 28)

अन्यगोचरा (anyagocarā) *f.* name of one of the mothers (Mātṛs attending on Skanda) मातॄणां शृणु नामानि ...। चतुष्पथरता चैव भूतितीर्थान्यगोचरा MahāBhā. ix. 45. 27.

अन्यगोचरी (anyagocarī) *f.* name of one of the mother (Mātṛs attending on Skanda) मातॄणां शृणु नामानि ...। चतुष्पथरता चैव भूतितीर्थान्यगोचरा (v.l. अन्यगोचरी) MahāBhā. ix. 45. 27.

अन्यगोत्र (anya-gotra) *adj.* of a different family स्थापयित्वा प्रजापालं पुत्रं राज्ये ...। अन्यगोत्रं प्रशस्तं वा क्षत्रियम् ...। अन्तकाले च संप्राप्ते य इच्छेदाश्रमान्तरम् । ... सिद्धिमवाप्नुयात् MahāBhā. xii. 63. 19; (used as noun) (one) of a different family सगोत्रेणान्यगोत्रेण वा नियुक्तेन क्षेत्रजातः क्षेत्रजः पुत्रः ArthŚā. ii. 40. 5 (3. 7); स्वगोत्रो वान्यगोत्रो वा ... । प्रयनेऽहनि यो दद्यात् स दशाहं समापयेत् LaghvāśvaSm. 20. 6; अन्यगोत्रोऽप्यसंबद्धः प्रेतस्याग्निं ददाति यः। पिण्डं चोदकदानं च स दशाहं समापयेत् AgniP. 166. 20.

अन्यगोत्र (anya-gotra) *n.* another amily गुरोः कुले न भिक्षेत स्वज्ञातिकुलबन्धुषु। अलाभे त्वन्यगोत्राणां पूर्वं पूर्वं विवर्जयेत् BhaviP. 18A. 25 (i. 4. 155); यस्य दत्तकः पुत्रोऽध्ययनादिसर्वगुणोपपन्नो भवति सोऽन्यगोत्रादागतोऽपि सत्यप्यौरसे पितुरिक्थभागं गृह्णीयात् ManvaMu. 390. 3 (*on* 9. 141)

अन्यगोत्रका (anyagotra-kā) *adj.* (*f.*) belonging to different family स्पृष्ट्वा रजस्वलान्योन्यं सगोत्रा चान्यगोत्रका। ... त्रिरात्राच्छुद्धिरिष्यते BṛYamaSm. 3. 65.

अन्यगोत्रज (anyagotra-ja) *adj.* [*f.*–ā] born in a different family हरन्ति ग्रावभिरिव क्ष्मां पुत्रैरन्यगोत्रजैः। मत्ताः पयोधरैरन्तयात्तरद्भिश्च इवाङ्गनाः RājTa. (Ka.) 7. 427; (used as noun) (one) who is born in a different family प्रेतकर्मौरसः

पुत्रः पित्रोः कुर्याद्यथाविधि। तदभावेऽधिकारी स्यात्सपिण्डो वान्यगोत्रजः LaghvāśvaSm. 20. 1; कुलशीलसमैः सार्धं कृतोद्वाहोऽन्यगोत्रजैः। ... गृहिधर्माय कल्पते YogŚā. 1. 47; RauhiC. App. 1; हावयेदित्यन्यगोत्रजान् धनदानव्यतिरेकेणेत्यर्थः HārLa. 23. 5; अन्ये अन्यगोत्रजा एतानि होमकर्माणि कुर्युः HārLa. 24. 8; एकाहं त्र्यहं वा अन्यगोत्रजान् पूर्वोक्तव्यवस्थया हावयित्वा ऊर्ध्वं स्वयं वैतानहोमकर्म कर्तव्यम् HārLa. 24. 15; 25. 1; शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः। ... होमः औपासनाख्यः, सोऽन्यगोत्रजैः कार्यः SmṛtiCan. vi. 77. 8; अत्र कैश्चिद्वैताने दशरात्रं होमः स्वयं कर्तव्यः। आवसथ्ये तु अन्यगोत्रजेन DīpKa. 76. 28 (*on* 3. 17); वर्ज्याः ... विधवान्यगोत्रजा त्रुटितकर्णा ... पाके BālamBha. i. 501. 1 (*on* 1. 225)

अन्यगोत्रतस् (anyagotra-tas) *adv*. from different family उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दात्रिमः। स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः ManuSm. 9. 141.

अन्यगोत्रत्व (anyagotra-tva) *n*. the state of being one belonging to different family एकत्वं स गता भर्तुः पिण्डे गोत्रेऽथ सूतके इति अन्यगोत्रत्वान्मातुर्मातामहेन सहायुक्तमेव दानम् BālaKrī. i. 154. 10 (*on* 1. 225)

अन्यगोत्रनिवृत्ति (anyagotra-nivṛtti) *f*. exclusion of one belonging to different family जातेरविशेषात् स्त्रीपुंसयोर्ब्राह्मणीनामपि प्राप्तावात्रेय्या वचनमन्यगोत्रनिवृत्त्यर्थम् ManuBh. ii. 396. 17 (*on* 11. 86)

अन्यगोत्रोपसंबन्ध (anyagotropasambandha) *adj*. related to different family अन्यगोत्रोपसंबन्धः प्रेतस्याग्निं ददाति यः। पिण्डम् ... स दशाहं समाचरेत् LaHārīSm. 60.

अन्यगोपति (anya-gopati) *m*. A other king स्कन्धप्रबन्धाधिकशोभयान्वितो वित्रास्य ... सकलान्यगोपतीन्। ... हठादाक्रम्य गां षण्ड इवैष भोक्ष्यते NemiC. 2. 26 (comm. गोपतयः क्षितिपाः); B other bull, NemiC. 2. 26 (comm. पक्षान्तरे - गोपतयो - वृषभेन्द्राः)

अन्यगोमुख (anya-gomukha) *n*. another direction or cardinal point कुर्यात् ... मूलप्रासादस्यानुरूपतः। प्राग्द्वारे वायुकोणे वा नैर्ऋत्यां वान्यगोमुखे। प्रासादम् ŚilpaRa. ii. 29. 5.

अन्यगोल (anya-gola) *adj*. being in anothr hemisphere ओजे पदे युग्मपदे विधुश्चेदेकान्यगोलश्च सपातचन्द्रात्। ज्ञेयस्तदानीं खलु यातपातः KaraṇaKu. 9. 3 (31)

अन्यगोलक (anyagola-ka) *adj*. being in a different hemisphere अर्कशशिक्रान्तिकलान्तरैक्यजीवा समान्यगोलकयोः KhaṇḍKhā. 7. 2.

अन्यगोव्यक्ति (anya-govyakti) *f*. another individual cow तथाप्येकां गोव्यक्तिमवगाहमानाच्छक्तिग्रहादन्यगोव्यक्तिशाब्दधीः स्यात् LaCandr. 317. 9.

अन्यग्रन्थ (anya-grantha) *m*. other treatise अथान्यग्रन्थे RasRaSa. 5. 151; अन्यत्र - अन्यग्रन्थे Bhāsk. i. 34. 23 (*on* i. 1. 1)

अन्यग्रन्थसाधारण्य (anyagrantha-sādhāraṇya) *n*. the state of being common to other treatises ग्रन्थस्य च नाट्यवेदत्वे उत्पत्त्यादिपञ्चकस्य तद्गतस्यान्यग्रन्थसाधारण्यात् प्रश्नासंगतिः AbhinBhā. i. 3. 5 (*on* 1. 1)

अन्यग्रन्थानुक्त (anyagranthānukta) *adj*. not mentioned in any other treatise तदुक्तमेव प्रकारान्तरमन्यग्रन्थानुक्तमाह BālamBha. ii. 121. 13 (*on* 2. 113)

अन्यग्रह (anya-graha) *m*. 1 another planet इष्टग्रहेष्टशेषाद् द्युगणो गतनिरपवर्त्तसंगुणितैः। छेददिनैरधिकोऽस्मादन्यग्रहशेषमिष्टो वा BrāhmSphuSi. 18. 88; 1B remaining planets (than the Venus, Jupitor and Moon) शुक्रेऽस्तमनं प्राप्ते तथा चास्ते बृहस्पती। शशाङ्केऽन्यग्रहाश्चैव विवाहो न प्रशस्यते ViṣṇuDhaP. ii. 87. 31; 2 knowledge of another (object) अतत्स्वरूपरूपत्वे नान्यस्यान्यग्रहाद्ग्रहः ŚivDṛ. 5. 88; न चैकग्रहेऽन्यग्रहसामग्री प्रतिबन्धिका TattvCin. i. 626. 2; AdvaiSi. 319.6.

अन्यग्रहकुज (anyagraha-kuja) *m*. another planet than Mars अन्यग्रहकुजे बिम्बगतकदम्बवृत्तध्रुववृत्तयोरन्तरं सत्रिग्रहक्रान्तिभुजः SiddhāTaVi. (ŚeṣaVā.) 30.11; 31. 17.

अन्यग्रहचिह्न (anya-grahacihna) *n*. another (hypothetical) point (treated) as a planet क्रान्तिवृत्ते यत्र ग्रहचिह्नं तत्सक्तकदम्बवृत्तनाडीवृत्तसंपातेऽन्यग्रहचिह्नम् SiddhāTaVi. 256.3; तत्र क्रमेण क्षेत्रांशाः ध्रुवौ ध्रुवावन्यग्रहचिह्नं गोलसंधिरित्यन्यक्रान्तिस्पष्टक्रान्त्योराजयनम् SiddhāTaVi. 256. 12.

अन्यग्रहण (anya-grahaṇa) *n*. 1A apprehension of another thing न ह्यन्यग्रहणं वस्तु भिन्नं वित्तावपेक्षते। अन्योन्याश्रयदोषोऽयं तस्मादस्मिन्निरास्पदः TattvSaṁ. 1065; 1B knowledge (of universe) as different (from oneself) यदन्यग्रहणं जाग्रत्स्वप्नयोः तदविद्याकृतम् TaiUBh. 275. 13 (*on* 2. 8); 2 use or mention of the word *anya* अन्योऽन्यत्पश्यतीत्येतदुपादाय ... अन्यग्रहणस्य प्राप्तप्रतिषेधार्थत्वात् TaiUBh. 231.9 (*on* 2. 1); अन्यः पूर्वस्थितो वा आधिः पर्याप्तः कार्यः। अन्यग्रहणस्य पर्याप्तत्वेन भाव्यमित्येतावन्मात्रपरत्वात् SmṛtiCan. iv. 322. 10; 3 act of taking the rest (अप्सु प्रास्य) प्रासनमादौ ततोऽन्यग्रहणम् ManvaVi. 150. 25 (*on* 2. 64)

अन्यग्रहणसापेक्ष (anyagrahaṇa-sāpekṣa) *adj*. dependent on the knowledge of other (syllable) अन्यग्रहणसापेक्षं कथं जात्यादि वस्तु सत्। अर्थग्रहणसापेक्ष उक्तमन्योन्यसंश्रयम् SphoṭSi. 259. 1.

अन्यग्रहणादि (anyagrahaṇādi) *adj*. mention of the term *anya* (other) etc. अन्यग्रहणादौ प्राणादि करणम् GoviBh. 159. 15 (*on* ii. 3. 33)

अन्यग्रहविजित (anyagraha-vijita) *adj*. conquerred or influenced by another planet आधानकाले ... योऽन्यग्रहविजितः केतूल्काभिहतः स स्वमासे गर्भपाताय भवति ViṣṇuDhaP. ii. 167 (294A. 5)

अन्यग्राम (anya-grāma) *m*. another village ग्रामान्तरेति। अस्माद्ग्रामादन्यग्रामम् KāmSū. 231. 7 (3. 5); मन्ये संप्रति वैद्योऽप्यन्यग्रामं गतो नूनम् SūktiRa. 110. 8; कश्चित् कुलपुत्रः। स परिणीतोऽन्यग्रामे PrabaK. 80. 29; PurāPraSaṁ. 8. 8.

अन्यग्राह्यत्व (anyagrāhya-tva) *n*. the state of being fit to be grasped by other अन्यग्राह्यत्वभ्रमाभावाय विशदयति। धान्यमिति BālamBhā. ii. 280. 30 (*on* 2. 161)

अन्यग्लायकचरक (anyaglāyaka-caraka) *m*. one who moves for (finding) another suffering person ग्लायकः - समुत्पन्नवेदनादिकारण एवेत्यर्थः अन्यस्मै वा ग्लायकाय भोजनार्थं चरतीति अन्नग्लानकचरकोऽयग्लायकचरकोऽन्यग्लायकचरको वा SthānṬ. 298A. 12.

अन्यघट (anya-ghaṭa) *m*. another jar or pitcher अन्यघटाभिप्रायेण गेहे घटोऽस्तीत्युक्ते यत्र घटान्तरं दृष्ट्वा तमानयति TattvCin. iv(1).107.2; यथैकघटमुक्तस्याकाशप्रदेशस्यान्यघटयोगाद्घटाकाशाव्यवस्था तद्वदिति SāṁkhyaPraBh. 67.31 (*on* 1. 150)

अन्यघटकुक्ष्यन्तर (anyaghaṭakukṣy-antara) *n*. [Loc.] inside the belly of another pitcher क्षिपेद्रसं घटे दीर्घे नताधोनालसंयुते। तन्नालं निक्षिपेदन्यघटकुक्ष्यन्तरे खलु RasRaSa. 9. 48.

अन्यघटादि (anyaghaṭādi) *adj*. another jar etc. स्पर्शस्य वा यत् स्वज्ञानं अन्यघटादिविविक्तेन स्वेन रूपेण ज्ञानं तत् कर्तृ PratyabhiVi. i. 378. 1 (*on* i. 7. 10)

अन्यघात (anya-ghāta) *m*. 1 damage to another person वधशब्देन (न) मरणमुच्यते, अपि तु परकृतघातदानादि, तत्रान्यघातदानाद्यपि प्रत्यक्षेण रङ्गे प्रदर्श्यते AbhinBhā. ii. 427. 17 (*on* 18. 39); 2 killing of another person यथा कोऽपि तप्तलोहपिण्डेन परं हन्तुकामः सन् पूर्वं तावदात्मानमेव हन्ति पश्चादन्यघाते नियमो नास्ति TātpaVṛ. 211. 11 (*on* 2. 57)

अन्यघृतादि (anya-ghṛtādi) *adj*. clarified butter etc. which are other (than purified) संस्कृताज्यस्य यद् बिन्दुं क्षिपेदन्यघृतादिषु। संस्कृतान्येव तानि स्युः ĪśānŚiPa. i. 14. 138.

अन्यघोष (anya-ghoṣa) *m*. sound of another घोषश्च रथेनाविशेषितत्वादन्यदीयोऽपि मन्त्रं निवर्तयेत्। सिद्धान्ते तु नान्यघोषः NyāyMāVi. 532. 16 (*on* x. 4. 2)

अन्यङ्गश्वेत (anyaṅga-śveta) *adj*. (animal) without blemish and white सौर्यं पशुमन्यङ्गश्वेतं सवनीयस्योपालम्भ्यमालभेरन् AitBr. 18. 5 (492) (*but* Sāy. अन्यङ्गं वर्णान्तरेण संपादितं चिह्नम् अन्यङ्गं तादृशश्चासौ श्वेतश्च सोऽयमन्यङ्गश्वेतो वर्णान्तरेण मिश्रितः सर्वश्वेत इत्यर्थः)

अन्यचक्र (anya-cakra) *n*. 1 attack of enemy उपसर्गेऽन्यचक्रे च ... यः पलायति स जीवति CāṇaNīDa. 3. 19; 2 another country स्वाम्यगाद् यत्र नो तत्र वैरमारीत्यवृष्टयः। दुर्भिक्षमतिवृष्टिर्वा भये च स्वान्यचक्रजे TriṣaŚaPuC. i. 3. 688.

अन्यचक्षुर्वत् (anyacakṣur-vat) *adv*. like the eye of another person इदं चक्षुरेतज्ञन्यसंयोगज्ञानत्वरहितसंबन्धज्ञानजनकं चक्षुष्ट्वादन्यचक्षुर्वत् NyāySu. (Ja.) 359A. 12 (*on* ii. 2. 6)

अन्यचक्षुस् (anya-cakṣus) *n*. eye of another person कृशोऽप्यकृशकीर्तिश्रीर्ह्लादं चक्रेऽन्यचक्षुषाम् BuddhaC. 12. 98; वह्नावन्यचक्षुषि च भोग्यमुपभोग्यं च परीक्षेत NītiVā. 25. 87.

अन्यचत् (a-nyacat) *adj*. not bending (one's own finger) तस्मिन् हिरण्यपाणिरङ्गुष्ठेन कनिष्ठिकया चाङ्गुल्यांशून् संगृह्य अन्यचन्नभि त्यं देवं सवितारमित्यतिच्छन्दसर्चा मिमीते ĀpaŚS. x. 24. 8 (comm. अनाकुञ्चयन्)

अन्यचतुष्पद (anya-catuṣpada) *m.* other quadruped तथैवान्यचतुष्पदानां प्रकीर्त्ति(र्ति?)तौ दोषगुणौ बुधेन YuktiKa. 215. 11.

अन्यचतुःस्थान (anyacatus-sthāna) *n.* [Loc.] in the place of other four (fingers) घृतव्रतौ भवतो वर्षिष्ठेनाङ्गुलपर्वणा सममन्यचतुःस्थाने हसिष्ठेनेतरासु MānŚS. 199. 16.

अन्यचर्मन् (anya-carman) *n.* hide of another animal पूर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे। वैयाघ्रे च जटाभारं समुद्‌ग्रन्थ्यान्यचर्मणा VāmaP. 16. 11; नरवर्मचर्मान्यचर्मभ्यां सिद्धराजेन निजकृपाणे प्रत्याकारः कारितः PrabaK.91.4.

अन्यचितास्थ (anyacitā-stha) *adj.* remaining on the funeral pyre of another person इत्युक्त्वा सा श्मशानं च नीत्वा तस्मायदर्शयत्। अस्थीन्यन्यचितास्थानि KathāSaSāg. x. 5. 197.

अन्यचिति (anya-citi) *f.* another altar एतया विकृत्याभिमन्त्र्यैऽन्यचितिं चिन्वन्ति KātyŚS. xvi. 5. 9.

अन्यचित्त (anya-citta) *adj.* [*f.*—ā] A having mind fixed on some other person, inattentive सेवार्थमादर्शनमन्यचित्तो विभूषयन्त्या मम धारयित्वा। बिभर्ति सोऽन्यस्य जनस्य तं चेत्रमोऽस्तु तस्मै Saund. 6. 18; तस्यान्यचित्तस्य शुगातमकस्य प्राणं न जहुः हृदयं प्रतेपुः Saund. 7. 10; तत् श्रुत्वा लज्जितः किंचिद्वक्वर्णोऽप्यभाषत। न दर्पादन्यचित्तोऽहम् PañcT. 2. 26 (43) (216. 9); यो गौरवं भयं प्रेम दाक्षिण्यं पूर्वयोषिति। न मुञ्चत्यन्यचित्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा ŚṛṅgāTi. (Ru.) 1. 31; PuruṣPa. 197. 3; UjjvaNiMa. 36. 5; गृहे क्षेत्रे तडागेषु ... । अन्यचित्ता रुदन्त्यो याः स्त्रियस्तिष्ठन्ति VarāP. 96. 43; अन्यचित्तां कथं त्वां वै गृह्णामि वरवर्णिनि। पितरं स्वं वरारोहे व्रज शीघ्रं निराकुला DevīBhāP. i. 20. 49; नीलीरागोऽनुकूलः स्यादनन्यरमणीरतः। दक्षिणश्चान्यचित्तोऽपि यः स्यादविकृतः स्त्रियाम् Vāgbhaṭā. 5. 8; AlaṅkāŚe. 20. 8; (used as noun) (one) having mind fixed on another person अन्यचित्तस्य भुञ्जानस्याप्यास्वादाभिमानाभावात् AbhinBhā. i. 289. 13 (*on* 6. 31); अन्यचित्तां ज्ञात्वा स्वपतिना मुक्ता। राजदण्डभयात् परपुरुषेण मुक्ता VetāPañ. (Śi.) 28. 31; B having mind fixed on another object or thing, inattentive नान्यचित्तो नरो भूत्वा पिबेद्धरिकथामृतम् BṛNāraP. 1. 78; एवमन्यचित्तस्येन्द्रियार्थसंयोगेऽप्यग्रहात् तस्येन्द्रियसंयोगोऽनुज्ञातः NayaVi. 76. 7 (*on* i. 1. 4); नायकोक्तिभिरन्यचित्तायाः नायिकायाः JayaMa. 159. 7 (*on* 2. 8); शिष्यो गुरौ ... प्रतिकूलं च संत्यजेत्। तेनैवोक्तं पठेद्वेदं नान्यचित्तः पुरस्थितः BrahmP. 222. 26; मत्सुतस्यैव राज्यं स्यात्कुणालस्य तु नेति सा। अन्यचित्ते नरपतावकरोत् PariPar. 9. 20; तोयस्थितम् ... भूभृदन्यचित्तं मृगं हठात्। बाणेनाकर्णकृष्टेन विध्येत् Mānaso. iv. 15. 1489; कथमियमन्यचित्तेव लक्ष्यते। क्व पुनश्चित्तमस्याः PrasaRā. 2. 21 (3); मत्तां मथेन। प्रमत्तां अन्यचित्तां क्रीडादिना ManvaVi. 301. 19 (*on* 3. 34); आर्ये। किमिति अन्यचित्तासि Hāsyārṇa. 1. 8 (2); (used as noun) (one) having mind fixed on another object or thing न ह्यन्यचित्तस्य चलेन्द्रियस्य लिङ्गं क्षमं धर्मपथाद्युतस्य Saund. 7. 47; न तीर्थे स्त्र्याकुले स्नायात् नासञ्जनसमावृते। दर्भहीनोऽन्यचित्तश्च न नग्नो न शिरोविना BṛParāSm. 2. 106; BṛBrahmaS. iii. 7. 148; अन्यचित्तेन यद्दत्तं यद्दत्तं विधिवर्जितम्। अनासनस्थितेनापि तज्जलं रुधिरायते VedavyāSm. 3. 26; हतस्वश्चान्यचित्तश्च शून्या ह्येते भवन्ति च। तदेषु मतिमान्कोपं न कुर्वीत SkandP. i (2). 6.76.

अन्यचित्त (anya-citta) *n.* another mind अपि तु वर्तमानं चित्तमात्मनोऽन्यचित्तहेतुभावं व्यवस्थाप्य निरुध्यतेऽन्यद्योत्पद्यते तुलादण्डनामोन्नामवत् Sphuṭā. ii. 89. 5 (*on* 2. 44)

अन्यचित्तकृत (anyacitta-kṛta) *adj.* done by one whose mind is fixed on another person एतत् कामफलं लोके यद् द्वयोरेकचित्तता। अन्यचित्तकृते कामे शवयोरिव संगमः ŚatTrayi. 225.

अन्यचित्तता (anyacitta-tā) *f.* A the state of having mind fixed on another object or thing, inattentiveness दुरासनं दुरानीतं पिपासा चान्यचित्तता। एते चित्तविनाशस्य हेतवः ViṣṇuDhaP. iii. 41. 13; B the state of having mind fixed on another person, inattentiveness विश्वासिनि च विश्रम्भः प्रवासे चान्यचित्तता। विश्रम्भाज्जायते स्त्रीणां नानाविधविचेष्टता PadmP. iv. 108. 16

अन्यचित्तत्व (anyacitta-tva) *n.* A the state of having mind fixed on another object or thing, inattentiveness स्वभावत इति मौग्ध्याद्बाल्यादन्यचित्तत्वाद्वा AbhinBhā. iii. 162. 17 (*on* 22. 24); B the state of having mind fixed on another person, inattentiveness दाक्षिण्यमानुकूल्यं च धाष्ट्यं चानियतत्वतः। नोचितान्यस्य शाठ्यं स्यादन्यचित्तत्वसंभवात् RasāSu. 19. 6 (1. 84)

अन्यचिद् (anya-cid) *f.* A false knowledge न हि नित्यचिदाश्रयप्रतीचः परिणामः पुनरन्यचित्स्वरूपः ŚaṅkaDigVi. (Mā.) 15. 132. (comm. भ्रमज्ञानात्मकः); B another knowledge अविनाशिचिदाश्रयस्य भूयोऽन्यचिदाधारतया स्थितेरयोगात् ŚaṅkaDigVi. (Mā.) 15. 134.

अन्यचिन्ता (anya-cintā) *f.* 1A attention to or thought of another thing or matter ततोऽन्यचिन्तां परिहृत्य कामी यतेत संकेतकशास्त्रकेषु NāgaSa. 5.2; किं च संप्रति गता तावदन्यचिन्ता। आत्मापि चिन्त्यो वर्ततेऽस्याः। TilaMañ. 280. 8; लोकः स्वस्वकर्मकृतं फलं प्राप्नोति ततोऽहमपि स्वकार्यं कुर्वे। अन्यचिन्तया किं प्रयोजनम् KathāK. 20. 16; 1B thought of opposite यदि नाम प्रसिद्धे स्याद्यदुतेति च वा(विचा)रणे प्रवृत्तादन्यचिन्तायां तद्वद्धेति निश्चये BhāvPra. (Śā.) 274. 21 (9); 1C deliberation or discussion on another thing मणयः तेषां यः ओघः समूहः स एव सारः यस्य, अन्यचिन्तानां जलस्थानीयत्वात्तम् Bhāsk. ii. 210. 19 (*on* iii. 1. 1); 2 any other thought शुद्धचैतन्यरूपात्मा सर्वसङ्गविवर्जितः। नित्यानन्दः प्रसन्नात्मा ह्यन्यचिन्ताविवर्जितः TejoBiU. 4. 6.

अन्यचिन्तानुरोध (anyacintānurodha) *m.* [Inst.] in accordance with attention to or consideration of another thing महाशीतपरीतस्त्वमजानन् हितमात्मनः। अन्यचिन्तानुरोधेन हिमवारिणि मज्जसि PadmP. (Ra.) 55. 21.

अन्यचिन्तापरिश्रम (anyacintā-pariśrama) *adj.* tired of , i.e. occupied with the thought of other मोक्षचिन्तामतिक्रम्य योऽन्यचिन्तापरिश्रमः। हरिसेवाविहीनो यः स पशुर्योनितः पशुः BhaviP. 322B. 31 (ii(1). 5. 40)

अन्यचिन्ताविनिश्चय (anyacintā-viniścaya) *m.* ascertainment of the thought of another thing नाट्यारम्भे तुलायां चाप्यन्यचिन्ताविनिश्चये। आश्चर्ये देवतारूपे समदृष्टिरुदाहृता AbhinDa. 68.

अन्यचिन्तित (anya-cintita) *adj.* thought by other (चन्द्रापीडः) मृदुकाव्यमिवान्यचिन्तितस्वभावाभिप्रायावेदकम् ... राजकुलं विवेश Kād. 91. 14.

अन्यचिन्त्यत्व (anyacintya-tva) *n.* the state of being what is doubtful or questionable to other रोषाद् द्वेषात् तथा लोभान्मोहाद् रागात् तथैव च। अन्यचिन्त्यत्वमायाति दुःशीलानामविक्षयात् SamarāSū. 44. 17.

अन्यचिह्न (anya-cihna) *n.* 1 other sign-post येषां वीतान्यचिह्नोत्रयमपि वहतां मार्गमाख्याति मेरौ SūryaŚ. 44; 2 mark or emblem of other (deity) स्वेश्वरचिह्नोपर्यन्यचिह्नं न धार्यम् PārāSū. 9. 6.

अन्यचुम्बन (anya-cumbana) *n.* act of kissing another (lady) न त्वां मां द्रष्टुं वल्लभ लप्स्यसे। अन्यचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा Kāvyāda. 2. 125.

अन्यचेटिका (anya-ceṭikā) *f.* another maid सर्वस्मिन्नुत्सवव्यग्रे जने युक्त्यान्यचेटिकाः। निवार्य ...। हंसावलीं प्रवेश्य ... । चक्रेऽशोककरीवेषां तां सा कनकमञ्जरी KathāSaSāg. xii. 4. 157.

अन्यचेतन (anya-cetana) *adj.* having mind devoted to someone else तेषां पद्मनिधिस्तत्र वसते नान्यचेतनः। गजाश्च महिषाश्चाश्वा गावोऽजा विपरिप्लुताः VāmaP. 17. 55.

अन्यचेतस् (anya-cetas) *adj.* A having mind fixed on another person, inattentive कथय किमप्यन्यचेतसा मया नावधारितं किमनयोक्तमिति Ratnā. 2. 6 (49); स्वभावाद्वनिता जिह्मा(ह्मा?)विशेषादन्यचेतसः। ततः सुहृदयस्तासामर्ये को विकृतिं भजेत् PadmP. (Ra.) 110.31; प्रेयोगृहागमनभावनयान्यचेताः। भूषाविशेषरचनासदसद्विवेकशून्यैव काचिदवलोकयति स्म वक्त्रम् HarVi. 23. 47; अङ्गनानां तासां तुतोष न तु चातुभिरन्यचेताः। आगच्छ तापसि भवामि तवैष दासः RāmC. 19. 60; तरलयसि दृशं किमन्यचेता इतरिव लोहकृतां किमुष्णमुष्णम्। श्वसिषि RāghPāṇ. (Dha.) 15. 27; मान्त्रिकः प्राह भो राजन् राक्षसी वोऽन्यचेतसाम्। प्रभविष्यति तत् कोऽयं विलम्बोऽस्या विनिग्रहे PārśvC. 3. 863; B having mind fixed on another object, inattentive याचनान्नददर्तीं नखक्षतं तां विधाय कथयान्यचेतसम्। वक्षसि न्यसितुमात्त तत्करः स्वं विभिद्य मुमुदे स तन्नखैः NaiṣC. 18. 72.

अन्यचेतस् (anya-cetas) *n.* another thought प्रसज्येत अन्यथा तद्वत्प्रथमं किन्न मृग्यते। गत्वा सुदूरमप्येवमसिद्धावन्यचेतसः NyāyVi. 2. 23.

अन्यचेतस्क (anyacetas-ka) *adj.* (used as noun) (one) having mind fixed on another object, inattentive अन्यचेतस्कस्य हि गुरुविरुद्धविदाहिवर्जनं सात्म्यभोजनं च न स्यात् ManuBh. i. 103. 1 (*on* 2. 53)

अन्यचेष्ट (anya-ceṣṭa) *adj.* having different activity गताष्टवर्षस्तु पुमान्यदा भवेत्तदान्यचेष्टो भवतीह मानवः VārāP. 39. 8.

अन्यचोदन (anya-codana) *n.* act of impelling, i.e. referring to one न ह्यन्यचोदनेऽन्यस्य कार्ये क्रियमाणे यथोक्तं कृतं भवति। तस्माद् द्रव्यमेव शब्देनोच्यते Pradī. ii. 95A. 11 (*on* i. 2. 64)

अन्यचोदित (anya-codita) *adj.* impelled or prompted by another person यः स्वयं यजति नान्यचोदितो यः स्वयं च यजते धृतादरः। जानते तमिह भूपतेश्वराः Rāvaṇā. 2. 58 [moved by another, MW.]

अन्यचोद्य (anya-codya) *n.* another (question) to be raised चोद्यपूर्वक एतस्मिन् अन्यचोद्यस्य संभवात् BṛĀraUBhVā. iv. 4. 1234.

अन्यचौर (anya-caura) *m.* another robber or thief अन्यचौरेण वा तेषां कुलीनेन च शंकर। प्रविश्य विघ्नः क्रियते KulaCūT. 5 .9.

अन्यच्छन्दवर्तिन् (anyacchanda-vartin) *adj.* following or complying with the will or liking of another person दक्षिणस्त्वन्यवत् प्रोक्तो दक्षिणजे वदान्यसरलान्यच्छन्दवर्तिष्वपि KośaKaTa. 2. 4912.

अन्यच्छन्दस् (anya-cchandas)(= anya-chandas) *n.* another metre अन्यासाम् आगम्यमानानाम् ऋचामन्यच्छन्दस्कत्वप्रसक्तौ त्रिच्छन्दस्त्वविध्युपपत्तेः BhāṭṭDī. iv. 3. 19 (*on* x. 5. 2); iv. 4. 3 (*on* x. 5. 2); किं वा अन्यच्छन्दोयुक्तगायत्रछन्दस्केऽपि MīmāKau. ii. 303. 16 (*on* iii. 2. 41)

अन्यच्छन्दानुवर्तिन् (anyacchandānuvartin) *adj.* following or complying with the will or liking of another person दक्षिणा त्रिष्ववाक्सरलावामेष्वन्यच्छन्दानुवर्तिनि Vaija. 260. 46.

अन्यच्छाया (anya-cchāyā) *f.* 1 another modification of voice अन्यच्छायाप्रवृत्तौ ये छायान्तरमुपाश्रिताः। छायायास्ते मताः स्यायाः गीतविद्याविशारदैः SaṁgīRa. ii. 176. 8 (3. 125); 2 shadow of another (woman) कामिनी ... अन्यच्छायावलोकेऽपि परालापे मनागपि। पत्ये क्रुध्यति NāṭaLaRaK. 2371.

अन्यच्छायायोनि (anyacchāyā-yoni) *adj.* produced from the shadow of another (poet) अर्थो द्विविधः, अयोनिरन्यच्छायायोनिर्वा KāvyālaṅSū. iii. 2. 7; अर्थस्यायोनेरन्यच्छायायोनेर्वा यदि न भवति दर्शनं तत्कथं काव्यम् KāvyPra. 483. 2; SāhiDa. 464. 6; 464. 9.

अन्यच्छासन (anya-cchāsana) *n.* different preaching or doctrine जैनादन्यच्छासनमनृतं भवतीति वैधर्म्यम् PrabhāC. 77. 26.

अन्यच्छेद (anya-ccheda) *m.* denominator of another, i.e. next (term) अन्यच्छेदेनान्यौ छेदांशौ ताडयेत् समच्छित्यै ĀryaSi. 15. 13 (147)

अन्यछन्दस् (anya-chandas)(= anya-cchandas) *n.* another metre योनौ यान्यभ्यासेनान्यछन्दः संपद्यते ... तदापत्रेषु गौतमसार्दागवावनभ्यासम् LāṭyāŚS. vii. 9. 13; DrāhyŚS. xx. 4.25.

i.e. body **11A** on the other hand **B** on the contrary **12A** from the rest **13** in addition to, additionally **14** in some other sense **15** in another time, at another time **16A** in another case **B** in the case of one **17** for another purpose, aim or objective **18** as being distinct or different, distinctly **1Ai** from another place उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत RV. i. 4. 5 (Sāy. अन्यस्मादपि देशात्); AV. xx. 68. 5; अन्यतस्तस्याहृत्य अर्वं दध्यात् TaiS. V. i. 9.4; नोस्याग्निं गृहाद्धरेयुर्नोन्यतो आहरेयुः MaiS. i. 6.12 (i. 105. 12); ĀpaŚS. v. 7.6; Kaṭhakabrāhmaṇasaṅkalana 8. 5; MaiS. i. 10.17 (i. 157.16); यथा वा इदमन्यतो वित्त्वा गृहानाहरत्येवं तत्तदाहुः MaiS. iii. 4.5 (iii. 51.10); गाः संसृजेयुर्वा अस्य पुरा सुर्यो श्चान्यतो विन्देत MaiS. iv. 2.10 (iv. 33. 5); iv. 5.5 (iv. 69.13); स स्वामेव देवतामुपैत्यन्यत आहृत्यावदध्यात् KāṭhS. 19.10 (ii.11.3); KapiKaS. 30.8 (145.5); KāṭhS. 22.2 (ii. 58.19); अन्यतो ह्योढ्या सह भवन्ति ŚatBr. II.v.2.29; ŚatBr. (K.) I. v. 1.26; नापितोऽन्यतः प्रत्युपस्यागत्य तां (भार्याम्) आह PañcT. 1.55 (81) (57.1); अन्यतः कुतोऽपि द्रविणमपहरिष्यामः KaumuMi. 7.7 (2); **1Aii** from one place पितरो मातरः पुत्रा मिथस्त्यक्त्वाशनायया। अन्यतश्चान्यतश्चायुः TriṣaśaPuC. iii. 1. 27; शून्या यात्यन्यतोऽन्यत्र गतिस्पृहापि Surath. 13.86; **1Bi** to another place, aside, elsewhere स त्वं तर्दं परश्वराण्यतः AV. (P.) v. 20. 3; गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते। कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ManuSm. 2.200 (ManvaMu. तस्माद् वा देशाद् देशान्तरम्); SūktiRa. 52.1; अये तन्त्रीनादो युवतिकलगीतध्वनियुतः। अन्यतो यास्यामि Avimā. 3.14a (1); यावन्नास्य प्रोद्यारितस्य दृष्टिगोचरे गच्छामि। तावदन्यतो व्रजामि PañcT. (Kos.) 1. 121(6) (21. 4); यो मां पश्यति सत्वरोऽपि न कथां छित्वा प्रयात्यन्यतः DhūrtaViSaṁ. 6. 19; अनया ...। अन्यतोऽपि व्रजन्त्या मे हृदये निहितं पदम् Nāgā. 1. 19; Subhāṣi. 1205; यान्तोऽन्यतः प्लुतकृतस्वरमाशु दूरादुद्बाहुना जुहुविरे मुहुरात्मवर्ग्याः ŚiśuVa. 5. 15; SaraKaṇṭhā. 314. 22; विषजुष्टाहाराभ्यवहारात् ... चामीकरोऽन्यतो याति AṣṭāSaṁ. i. 46. 17 (1.8); कथं प्रतिपत्तिशून्यमुत्थायान्यतः प्रवृत्तः MālaMā. 9. 88; 9. 154; श्रीरणभञ्जदेव[ः*] ... मानयति वोधयति(Read बोधयति) सम्[ा*]दिश(य)ति चान्यत(त(तः)) EI. xii. 327. 21; एतावदस्तु। अन्यतः प्रक्षिपामि AnargharaRā. 2. 43 (3); उत्तिष्ठ वत्स गच्छावः साधयामोऽन्यतोऽधुना RāmC. 1. 90; नास्ति मृत्योर्भयमिति युक्तमितोऽन्यतः प्रयातुम् Hitopa. 3. 138; (यन्त्रम्) रिपुद्वारे खनेन्निशि। सप्ताहात् तद्गृहाद्वैरी प्रयात्युद्घाटितोऽन्यतः TantraRā. 11. 81; श्रुतयेन्दुसुतिसरितोऽन्यतो हृतः NavaSāC. 10. 55; पुत्रदारादिसंबन्धः पुंसां धननिबन्धनः। क्षीणात् पुत्राः पलायन्ते दारा गच्छन्ति चान्यतः DarpaDa. 2.29; इहैव भद्र वस्तव्यं गन्तव्यं नान्यतस्त्वया KathāSaSāg. vii. 9.51; आशङ्क्य वधं दाशैः ...। अनागतविधाताथ बुद्धिमानन्यतो ययौ KathāSaSāg. x. 4. 81; सखि अन्यतो गच्छावः PraboCan. 3. 9 (52. 16); उपायकोटिदुरक्षे स्वतस्तत इतोन्यतः। सर्वतः पतनप्राये काये कोयं तवाग्रहः EI. xxi. 55. 29; महाटवीं समुत्तीर्णे ... आचार्यवर्या विहर्तुं ययुरन्यतः TriṣaŚaPuC. i. 1. 222; iii. 1.27; विहरति वने राधा साधारणप्रणये हरौ ... ईर्ष्यावशेन गतान्यतः GītGo. ii. 5. 1; कथमियं लज्जते। तदन्यतो नयामि PrasaRā. 2. 21 (9); 6. 2 (2); एतामेकाकिनीं मुक्त्वान्यतो यास्याम्यहं यदि। मन्ये जीवितमेतस्या भविता मे पुरस्सरम् MalliC. 6. 172; सुलोचनानां सुशिरोरुहां करैः प्रवालमाभज्यत यत् पुरःस्थितम्। अतः स्वनेत्राम्बुजकल्पभीरुभिर्मृगीमयूरैरपयातमन्यतः VasaViKā. 7. 21; राजा ... अवदत्। ... अहं सैन्यमाश्रमादन्यतो नये PārśvaC. 4. 62; 4. 130; गुरुश्च वज्र इत्याख्यां तस्य कृत्वा समार्पयत्। साध्वीपार्श्वाच्छ्राविकाणां व्यहार्षीदन्यतस्ततः PrabhāC. 4. 15; 56. 8; माता ... वैभवम्। स्फारीकृत्यान्यतः प्रागात् ŚāliC. 1. 82; धन्यानां गणनाक्षणे न खलु सा रेखान्यतः सर्पति PārśvanāSta. 15; मनो मदीयं गतमन्यतोऽभूत् ŚaṅkaDigVi. (Mā.) 10. 82; सुभगोऽप्यस्याः प्रियो नान्यतो दृष्टिं निक्षिपति SāhiDa. 99.15; न युक्तं मम सांप्रतमन्यतो गमनम् UnmaRā. (Vi.) 26 (1); ये वसन्ति वने त्वत्र भूताः प्रेताश्च राक्षसाः। ... निर्गच्छन्त्वन्यतः शीघ्रम् TantrSa. 1.49; क्षिपतोऽप्यन्यतश्चित्तं सैव सारङ्गलोचना। शङ्केव कृतपापस्य हृदयान्नापसर्पति Subhāṣi. 1237; द्रुतादिकमपि ध्वनिषु श्रोत्रं प्राप्येव क्षिप्रमन्यतः प्रयातेषु ... शब्दोऽपि ... द्रुत इति गृह्यते YuktiSneha. 93. 27 (*on* i. 1. 5); **1Bii** to any other place यतोऽत्रैवाहं तत् प्रलोकय नान्यतोऽहं गच्छामि Loc. 21. 14 (*on* 1. 4); अश्वः ...। जगाम वार्यमाणोऽपि तस्मिन् सरसि नान्यतः PariPar. 3. 98; अनाहत्य हठात् सीतां नान्यतो गन्तुमुत्सहे PrasaRā. 1. 60; त्वं नो दत्तोऽतिवृद्धत्वे ...। लोचनादन्यतो गन्तुमनर्होऽसि वनान्तरम् GopaKeCan. 63. 11; ये भावा मयि भाविताः। अहं तैरनुगन्तव्यो न तेषामन्यतो गतिः ŚārṅgaPa. 311; **1Biii** to another place पितरो मातरः पुत्रा मिथस्त्यक्त्वाशनायया। अन्यतश्चान्यतश्चायुः TriṣaŚaPuC. iii. 1.27; **1Ci** in another place, elsewhere तस्मिन्नुपरते शब्दे पुनरेवान्यतोऽभवत्। शब्दोऽपरः MahāBhā. iii. 23.7; दिनं दिनं तु नरके दह्यते पच्यतेऽन्यतः MārkP. 8. 141; 8. 142; 23. 46; अन्यस्मिन्नन्यतो भावादतिदेशोऽपि युज्यते PrakaPañ. 498. 11; (गृहेषु) तेषु ... अन्यतो रचिता शय्या विविक्ता आस्ते SāmaraU. 266. 16; गृहाङ्गणे गृहद्वारि क्रीडा भवति नान्यतः ĀdiP. 22. 88; पाञ्चालीचिकुराम्बरापनयनं दृष्ट्वैवमेव स्थिताः संभूता अपि भूभुजामभिजने कर्माणि कुर्मोऽन्यतः। ... तत् पुंस्त्वं परिहृत्य हन्त चरतां युक्तैव नः क्लीवता PārthaPa. 10; मानं खलो यल्लभतेऽन्यतोऽपि PṛthvīVi. 1. 25; अवनीभृति योधयत्यरीस्तांस्त्वरयैकत्र ततोऽन्यतो नियुक्तः। ... द्रुतमासेदुरुदायुधाः सहस्रम् ŚaṅkaDigVi. (Mā.) 15. 19; वायवीया हि ध्वनयोऽभिव्यञ्जकाः ते च श्रोत्रं प्राप्यैवान्यतः प्रयाताः YuktiSneha. 138. 14 (*on* i. 1. 6); आरगुदीचाम् गौधारः। रका सिद्धे आकारोच्चारणमन्यतो विधानार्थम् SiddhāKau. 233A. 9 (*on* iv. 1. 130); VidaMā. 1.31 (73); कलिन्दकन्यापुलिने तटे वा गृहेऽन्यतो वा निवसन् कदापि। ... ननन्द नो नन्दकिशोर एषः Vidvanmo. 8. 6; **1Cii** at another place, i.e. in seclusion परिचारिकां स्वामी संवत्सरमात्रमन्यतो धारयेत् KāmSū. 365. 13 (7. 1); **1D** through another way, i.e. gate मार्गविपर्यासे शवद्वारादन्यतः शवनिर्णयने पूर्वः साहसदण्डः ArthŚā. i. 355.3 (2. 36) (comm. व्यवस्थितप्रेतनिर्हरणद्वारातिरिक्तद्वारेण); **2A** on one side or part बृहदन्यतः पक्ष आसीद्रथंतरमन्यतः सबले सध्रीची। यद् रोहितमजनयन्त देवाः AV. xiii. 3. 12; देवा मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रक्षांसि पिशाचास्तेऽन्यतः TaiS. II. iv. 1. 1; KāṭhS. 10. 7 (i. 132. 11); यदन्यतः पृष्ठानि स्तुर्वि विवधः स्यात् TaiS. VII. iii. 5.2; VII. iii. 7. 3; VII. iii. 9. 3; एतेषामेव व्यतिकरेऽन्यतोऽर्थोऽन्यतोऽनर्थः KāmSū. 360. 7-8 (6. 6); **2 Bi** on the other side or part बृहदन्यतः पक्ष आसीद्रथंतरमन्यतः AV. xiii. 3.12; TaiS. II. iv.1.1.; KāṭhS. 10.7 (i.132.11); असपत्नास्पृशोऽन्यतोऽन्तराः KātyŚS. xvii. 11.8; अपरे पुनरस्यान्यतो विशिष्टेन कन्यालाभेन कन्यामातरमुन्मादयेयुः KāmSū. 193.4 (3.1); 360.7-8 (6.6); प्रमुदितवरमेकतस्तत् क्षितिपतिमण्डलमन्यतो वितानम्। ... आसीत् RaghuVa. 6. 86; शुद्धान्तमन्यतः (v.l. ॰मन्यतः) शुद्धः स्त्रीजनस्य तदाज्ञया। लीलोपदेशदानैकव्यग्रो विशति मन्मथः JānaHa. 2. 70; अभिययौ स हिमाचलम् ...। तपनमण्डलदीपितमेकतः सततनैशतमोवृतमन्यतः Kirātā. 5. 2; निम्नेऽन्यतः। ... स्फटिकभूतुल्ये प्रसन्ने क्वचित् ... मुनिवरतोये श्रमार्तोऽभवत् DaśāvaC. 1.51; सत्सङ्गप्रियता च वीररभसोन्मादश्च मां कर्षतः। वैदेहीपरिरम्भ एषः ... स्निग्धो रुणद्ध्यन्यतः MahāviC. 2. 22; भवतु। अन्यतः संचारयामि UttaRāC. 1. 18 (4); 1. 30 (4); मनांसि यत्रासमयानि सन्ततम् ... यशांसि यत्तेजसि नेशुरन्यतः EI. xviii. 243. 4; साचिस्थानं निगद्यते। अङ्गुलानि दशैकत्र कलामात्रं ततोऽन्यतः MānaSo. iii. 1. 417; iv. 3. 641; एकतः ... अर्णोराजसुतैरुपेत्य विलग्नैः। मालवक्षितिधरं बत मध्येकृत्य कृत्यविदुपान्यत एव। श्रीभटेन ... उल्लोडिताद् यदिह विग्रहवार्धेः। कालकूटमुदगाद्दुसैन्यम् VasaViKā. 5. 29; 13. 66; एकतः पितुराज्ञा मे परिवादास्तथान्यतः PārśvC. 1. 133; निशि यदा चौरः प्रविष्टस्तदा लब्धं कर्पटमन्यतस्तदुपरि क्षिप्त्वा रुदन्निर्गतः ŚārṅgaPa. 409; यदा कलाः कलयति तदा पशुपोषणं न संपद्यते। तदेकतः सासंगोऽन्यतः प्रच्युतो भवति PuruṣPa. 183. 15; पुरमेतत् ...। क्रीडागिरीन्द्रैरिव वीरलक्ष्म्या यदेकतोऽराजत वारणेन्द्रैः। गङ्गातरङ्गैरिव दत्तरङ्गैस्तथान्यतोऽश्वैः पदखातविश्वैः HammīMaKā. 11. 47; एकतो नृपतेः सेना काष्ठाखानस्य चान्यतः। दंष्ट्राद्वयी यमस्येव लक्षिता सर्वभक्षिका RājTa. (Śrī.) 4. 447; क्वापि केकिगलमेचकच्छवीरन्यतः कुटजषण्डपाण्डराः। ... हा कथं बत विलोकये दिशः Rāgh. 11. 23; **2Bii** on the other side (of balance) कलञ्जनामकं द्रव्यम् एकदेशे निधापयेत्। अन्यतो जलबिन्दुस्तु तोलनार्थं विनिक्षिपेत् YuktiKa. 119. 23; Mānaso. ii. 4. 463; **2C** to another side दुर्निरीक्षितमन्यतो मन्त्रणम् ... वर्जयेत् KāmSū. 236. 18 (4. 9) (JayaMa. तिर्यङ्मुखं कृत्वा भाषणम्); अन्यतो नय मुहूर्तमाननं चन्द्र एष सरले कलामयः। मा कदाचन कपोलयोर्मलं संक्रमय्य समतां नयिष्यति SaraKaṇṭhā. 437. 2; Subhāṣi. 2029; **2D** on the top edge or in front जज्ञे तत्केशवः ... चक्रम् ...। उत्तमोऽपरतो दुःखमुत्तमोऽभ्युदयोऽन्यतः। आसीदतिक्रमं तस्मिन्नासीदति रवाविव RāghPāṇ. (Dha.) 18. 79 (comm. अन्यतोऽग्रतः); **2Ei** from another side एकतः स्थूलविस्ताराः। अन्यतस्तु घनाः क्ष्माः भवेयुस्तस्य दन्तकाः SamarāSū. 29. 44; अभेदमात्रप्रतीतौ रूपकं नियतधर्महानावन्यतः सर्वतोऽभेदप्रतीतौ अभेदः AlaṅkāRa. 27 (10); **2Eii** from the other side, i.e. from behind आरुह्यैदयाचलं दिनपतेरुग्रस्तमिस्त्रापहैरारक्तं पुरतोऽन्यतश्च विपुलध्वान्तावलीमेचकम्। एतद् दिग्वलयम् RasSa. 18; **2F** at another end कुर्यात् ... दोरं हस्तप्रमाणकम्। एकतो मुद्रिकायुक्तमन्यतो वध्रसंयुतम् Mānaso. iv. 13. 1354; **3** to the other side, i.e. on the enemy अन्यतोऽस्मद् अघां? कृधि AV. (P.) i. 86. 6; **4A** by another person यद्यस्यप्रियजा यदि वान्यत आहृतः। विसल्पकस्य भेषजीर्देवीराप इमामवन् AV. (P.) xx. 37. 1; अश्वः ...। वाजपेयवदान्येनाभिषिच्यते कृष्णाजिने ...। अन्यतस्त्वभिवादः KātyŚS. xxii.

5.26; **4Bi** from any one else, from some one else सदृशं राजशार्दूल तवैतद्भुवि नान्यतः। महावंशप्रसूतस्य वसिष्ठव्यपदेशिनः Rāmā. i. 18. 2; राजतो धनमन्विच्छेत् संसीद स्नातकः क्षुधा। ... न त्वन्यतः ManuSm. 4. 33; न सिद्धोऽप्रथनादेव ज्ञानादिसमवाय्यपि। तत्प्राणादि प्रमेयं स्यान्न प्रमातान्यतो भ्रमात् AjaḍaPraSi. 1. 19; कथं नरपतेर्बुद्ध्या ... स्वाधीनाप्यन्यतः शक्तिः प्रार्थ्यते प्रथमानया KīcaVa. 4. 4; एषा ...। अपश्यन्त्यन्यतस्त्राणमदुग्धा त्वामुपस्थिता SamarāSū. 1. 14: औरसो रुद्रसोमायाः स जगाद यथातथम्। श्रमणोपासकादस्मादात्तधर्मोऽस्मि नान्यतः PariPar. 13. 68; 13. 194; एतच्च सति संभवे अन्यतो धनग्रहणनिषेधपरं न पुनरत्यन्तनिषेधाय SmṛtiCan. ii. 457. 3; यदा त्वपहृतं धनमन्यतो दापयितुं न शक्नोति तदा स्वयमेव राजा चौरहृतं दद्यात् VīraMi. 724. 3 (*on* 2. 271); **4Bii** from another person या नियुक्तान्यतः पुत्रं देवराद्वाप्यवाप्नुयात्। तं कामजमरिक्थीयं वृथोत्पन्नं प्रचक्षते ManuSm. 9. 147; वेश्याकामिनोऽयमदोषः। अन्यतोऽपि परिहार्यः स्यात् KāmSū. 171. 4 (2. 9) (JayaMa. असभ्यत्वाद्वदनसंसर्गाच्च); स चेदन्यतो बहुलभमानया निष्कासितः स्यात् ... तया रोषितो ममामर्षाद्बहु दास्यतीति संधेयः KāmSū. 335. 1 (6. 4) (JayaMa. अन्यस्माद् गम्यात्); 349. 5 (6. 5); KandaCū. vi. 5. 25; प्रतोदेन प्रयोगादन्यतो वारणादष्टभूत्यहस्ते ... पञ्चमया (?) समक्षेपत् AvantiKa. 84. 18; अन्यतो मातृतो जाता अन्यतस्त्या उदाहृताः। अप्यन्यतस्त्यजायी स्यात्सापत्नभ्रातृमर्दनः BṛĀraUBhVā. ii. 1. 64; अतो ब्रूहि कतमोऽत्र विवक्षितः। साक्षादित्यादिमानात्मा निर्धार्येदंतयान्यतः BṛĀraUBhVā. iii. 4. 64; अनुज्ञानं चान्यतोऽपीति केचित् BālaKrī. i. 60. 10 (*on* 1. 51); स विद्वान्स महाप्राज्ञः स धीमान्स च पण्डितः। यः स्वतो वान्यतो वापि नाधर्माय समीहते YaśasCam. ii. 329. 27; दुर्भगत्वमात्मनोऽप्रकटयितुं नायिकामन्यतो व्यावर्तयन्बहु ददाति JayaMa. 308. 10 (*on* 6. 1); विश्वकर्मकृता राज्ञा जीवता बलिनान्यतः। त्वया कुपतिना त्यक्ता शरणं कं व्रजाम्यहम् KīcaVa. 3. 19 (comm. कीचकादिसकाशाज्जीवता); अन्यतः चोरग्रामाधिपादितः BālamBha. ii. 327. 3 (*on* 2. 272); **4Ci** to another person त्यक्ष्याम्येनमन्यतः प्रतिसंधास्यामि ... स्थानभ्रंशो वास्य भविष्यति चलचित्तश्चेति मन्यमाना तदात्वे तस्माल्लाभमिच्छेत् KāmSū. 350. 3 (6. 5); 340.14 (6.4); **4Cii** to any one else, towards any one else वाचकः ... स तेषां गुरुरुच्यते। ... दानम् ...। देयं स्याच्छ्रावकैस्तात तं मुक्त्वा नान्यतो नृप BhaviP. 315A. 7 (i. 216. 144); एहि राज्ञः सखे नन्दाद् याचितुं गुरुदक्षिणाम्। गच्छामो नान्यतोऽस्माभिरियत् काञ्चनमाप्यते KathāSaSāg. i. 4. 95; **4D** in another person अन्तःपिहितज्योतिः संतुष्यत्यात्मनोऽन्यतो मूढः। तुष्यत्यात्मन्येव हि बहिर्निवृत्तभ्रमो ज्ञानी YogŚā. 12. 10; **4E** with another person अन्यथान्यकृतैर्दोषैः परिदेवनमन्यतः SāhiSā. 3. 18; **5** without, except, apart from धानारुह उ वै वृक्षोऽन्युतः प्रेत्य संभवः। यत्समूलमुद्बहेयुर्वृक्षं न पुनराभवेत् ŚatBr. XIV. vi. 9. 34; एकवचनमिह श्रूयमाणं प्राप्त एवैकस्मिन्द्रव्ये द्वितीयादिषु च किमन्यत्कुर्यादन्यतः परिसंख्यायाः ŚābaBh. 709.3 (*on* iii. 1. 14); चत्वारो वै महायज्ञाः अग्निहोत्रं दर्शपूर्णमासौ ज्योतिष्टोमः पिण्डपितृयज्ञ इति। ... कास्य महायज्ञता स्यादन्यतः फलवत्तायाः ŚābaBh. 1278. 18 (*on* iv. 4. 20); नानन्दादन्यतो मुख्यात्पण्डितः पर्यवस्यति BṛĀraUBhVā. (Sambandha.) 299; **6Ai** from another direction 'हन्ति शत्रुमभीत्य' इत्यन्यतो वात्येवाभीत्य शत्रुं हन्ति नैनं शत्रुः प्रत्युद्यामी भवति JaimiBr. 1. 95; ' वैरिणा वा सक्तस्य दण्डोपनयेन मूलमन्यतो हारयेत् ArthŚā. iii. 194. 11 (13. 3); सर्वा परोक्षार्थप्रतिपत्तिः प्र[माणभूता] न स्वतन्त्रा भवति। ... अन्यतोऽपि [यदि स्या]त् ... धर्म्यसंबन्धेऽपि सर्वत्र प्रतीतिं जनयेत् HetuBiṬ. 4.15; **6Aii** from another direction, i.e. the eastern direction दक्षिणस्मादुत्तरस्मादपरस्मात्तथान्यतः। कृष्णायास्मायवरस्मायधरस्मिन्न को नतः DvyāśraKā. 1. 144 (comm. पूर्वस्माच्च देशात्); **6Bi** to or towards some other direction औदुम्बरीमुच्छ्रयिष्यन् पूर्वेण देवयजनं गच्छेत् ...। उत्तरेण यद्यन्यतः LāṭyāŚS. i. 7. 2; दुर्व्याहृतम् ... अन्यतो मन्त्रणम् ... वर्जयेत् (भार्या) KāmSū. 236. 18 (4. 1) (JayaMa. तिर्यङ् अन्यतो मुखं कृत्वा भाषणम्); स्निग्धं वीक्षितमन्यतोऽपि नयने यत् प्रेरयन्त्या तया यातं यच्च ... मन्दं विलासादिव। ... सर्वं तत्किल मत्परायणम् Śāk. 2. 2; SubhāRaK. 17. 52; सा(उषा)। प्रद्युम्नदर्शने व्रीडादृष्टिं निन्येऽन्यतः ViṣṇuP. v. 32. 24; न्यस्ता न भ्रुकुटिः ... नीतं नाननमन्यतः ...। तन्व्या VeṇīSaṁ. 2. 262; प्राणेश्वरे पृच्छति। तन्व्या ... बाष्पभरस्तया वलितया निःश्वस्य मुक्तोऽन्यतः AmaŚ. 50; Subhāṣi. 1584; कन्याभिः ...। अन्यतश्च मुखं कृत्वा ... उपक्षिप्तं कथान्तरम् BṛKathāŚloSaṁ. 8. 20; 10. 55; तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता चान्यतः ... श्रोत्रे निरुद्धे मया Subhāṣi. 1581; योगशासनम् ... विदितं प्रमाणमिति तत्प्रधानाद्यपि। ... अन्यतः श्रुतिसंततीरपनयेद् भवद्ब्रह्मणः NayaMañ. II. i. 2. 3; **6Bii** to the other, i.e. opposite direction आददीध्वमिति ब्रुवन्। नागायोषघटीं सोऽदात् समं तेनान्यतो ययौ DvyāśraKā. 13. 99; **7Ai** from another source द्रोणकलशादधाराग्रहाः परिप्लवया गृह्यन्ते। वचनादन्यतः ĀpaŚS. xii. 18. 11; पुलस्त्यवंशादुद्भूता राक्षसा इति नः श्रुतम्। इदानीमन्यतश्चापि संभवः कीर्तितस्त्वया Rāmā. vii. 4. 4; न च ... ईश्वरम् मुक्त्वा अन्यतः ... उत्पत्त्यादि संभावयितुं शक्यम् BrahmSūBh. (Śaṅ.) 10. 15 (*on* i. 1. 2); 13. 13 (*on* i. 1. 3); 260. 5 (*on* i. 4. 18); अन्यतो भवने मानं न चेदस्त्विह संशयः BṛĀraUBhVā. (Sambandha.) 80; **7Aii** from any other source व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः। न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः RaghuVa. 2. 4; नान्यतो वेदविद्भ्यश्च सूत्रवृत्तिक्रियेष्यते ŚlokaVār. 1. 43 (14.3); न लभ्यते यद् भ्रमतामुपर्यधः। तल्लभ्यते दुःखवदन्यतः सुखम् BhāgP. i. 5. 18; ii. 5.6; न ह्येषामेकमप्यन्यतस्सिद्धम् IṣṭaSi. 103. 19; 242. 19; अस्माकं तु मन्वादिस्मृतिरेव प्रमाणम्। न हि वयं तामन्तरेणान्यतोऽष्टकादिकर्तव्यतामवगच्छामः ManuBh. i. 62. 25 (*on* 2. 6); i. 161. 1 (*on* 2. 165); ManuBh. i. 213. 13 (*on* 3. 12); मन्त्राः प्रयोगप्रकाशत्वेन रूपादेवावगतास्तस्य प्रयोगस्यान्यतोऽसिद्धेः ManuBh. i. 64. 27 (*on* 2. 6); i. 194. 22 (*on* 2. 238); न ह्यग्निहोत्रस्यैतद्वचनमन्तरेणान्यतः कुतश्चित् कर्तव्यतावगमः ManuBh. i. 228. 21 (*on* 3. 45); i. 464. 25 (*on* 5. 89); विशिष्टविधिर्विशेषणं गोचरयति यद्यन्यतो न लभ्यते TantrRa. 11. 10; न च दर्विहोमेषु अपूर्वत्वात् अन्यतः सर्वप्राप्तिः SaṅkarKāBh. 105. 18 (*on* ii. 4. 15); नान्यतो ज्ञायते धर्मो वेदादेवैष निर्बभौ। तस्मात् सर्वप्रयत्नेन धर्मार्थी वेदमाश्रयेत् SūktiRa. 4. 2; फलसिद्धिः न त्वन्यतोऽपि निर्वचनज्ञाने MīmāKau. i. 83. 16 (*on* i. 3. 10); ये लब्धाश्रयमन्यतः फलभृतं कुर्वन्ति कंचिद् गुणम् ... न कस्य विदितास्ते कर्ममीमांसकाः PadyāTa. 48; यथा तत्र सुखादिजनकतावच्छेदकवैजात्येन तेषां नान्यतो ग्रहस्तथा प्रकृतेऽपि VaiyāSiMañ. 150.11; **7B** from another cause or reason, extraneously (अध्यक्षाणां) हरणोपायाश्चत्वारिंशत् ... अन्यतः सिद्धमन्यतः कृतम् ArthŚā. i. 154. 6 (2. 8); अन्यतोऽवगतेऽर्थे सूत्रमेवमर्थमिदमित्यवगम्यते ŚābaBh. 20. 2 (*on* i. 1. 2); 183. 13 (*on* i. 3. 3); अविदितवेदनं च विधिरित्युच्यते। विदितं चात्रान्यतो गुणविधानम् ŚābaBh. 333. 11 (*on* i. 4. 4); लवयन् खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः Kirātā. 2. 18; करणत्वं च शब्दतोऽन्यतो वा धात्वर्थस्योभयत्राप्यविशिष्टम् BhāvanāVi. 39. 1; न चापरं परैरिष्टमतो नैवान्यतोऽपि तत् TattvSaṁ. 106; सिद्धस्य च पदार्थस्य यान्यतः कार्ययोग्यता। ... सा युक्त्या वार्यते कया ŚlokaVār. 6. 147 (767.6); न चैतत् कल्पनावसरोऽस्त्यन्यतः सिद्धत्वात् TantrVā. 21. 7 (*on* i. 2. 7); 60. 5 (*on* i. 2. 42); नियोज्यविशेषणतयैवार्थवादिकं फलं रात्रिसत्रवत् संबध्यताम्। न। अन्यतोऽनुष्ठानसिद्धेः। कुतोऽन्यतः। आचार्यकरणविधिप्रयुक्तेः PrakaPañ. 12. 6; तदन्यतो ग्राह्यम् KāvyālaṅSū. i. 3. 32 (3); मातोऽनधिगततत्त्वस्य सिद्धिः स्यादथवान्यतः BṛĀraUBhVā. (Sambandha.) 685; आत्मनैवं तमोयोगः ...। अन्यतः संगतिः सेयमविचारितसिद्धिका BṛĀraUBhVā. i. 4. 1323; प्रागभावादयः स्वतः अन्यतो वा सिध्यन्ति IṣṭaSi. 1. 7; 179. 16; पुमाँश्चान्यतोऽच्यापि ŚākaṭāVyā. i. 2. 8; ii. 2. 41; आलम्बनविभावः स ज्ञानकारणमुच्यते। ... आदृतः (v.l. अन्यतः) पटुरभ्यस्त आश्रयादेर्गुणेन सः SaraKaṇṭhā. 558. 10; विधिर्हि ... किमपि भाव्यमाक्षिप्य विशेषसमर्पणमन्यतोऽपेक्षमाणः ... धात्वर्थमपुरुषार्थत्वादुल्लङ्घ्य ... साकाङ्क्षोऽवतिष्ठते TantrRa. 170. 2; 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यत्र लोहितोष्णीषत्वमात्रं विधेयं हवनस्यान्यतः सिद्धेः KāvyPra. 227.2; वान्यतः पुमांष्टादौ स्वरे SiddhaHe. i. 4. 62; अन्यतोऽपि ... नियोगसिद्धौ का नाम विधेरपर्यवसानवाचोयुक्तिः TattvPradī. (Ci.) 50. 10; प्रामाण्यं स्वत एवागमस्य हि। अनवस्थान्यथा हि स्यादप्रामाण्यं तथान्यतः AnuVyā. 3B. 9 (*on* i. 1. 1); अमितेरन्यतो भावात् ... पृथिवीत्वमुपेयते TarkSaṁ. (Ā.) 26. 24; 44. 30; 'स्नात्वा भुञ्जीत' ... अत्र भुजिधातोर्विधिप्रत्ययान्तत्वाद् ... स्नानप्राङ्मुखत्वनियमयोरेव विधेस्तात्पर्यम् ... तत्र भोजनं चान्यतः प्राप्तम् ŚrutaPra. iA. 21. 10 (*on* i. 1. 1); न च स्वरूपमात्रस्वप्रकाशे अन्यतो धर्मसिद्धिरिति वाच्यम् ŚatDū. 79. 21; यदि कृत्या साधयितुमिच्छा सा तदा चिकीर्षितस्य पाकस्यान्यतः सिद्धौ सा नापगच्छेत् TattvCin. iv (2). 27. 2; अन्यत इत एव वा तत्सिद्धावनुमानवैयर्थ्यान्योन्याश्रयौ दुष्परिहरौ NyāySiA. 232. 9; अन्यतः प्राप्तत्वादप्राप्तविधित्वं मास्तु SarvaDaSaṁ. 12. 54; पदार्थानां सृष्ट्याद्यन्यतोऽपि प्रतीयते TattvSaṁkhyāṬ. 52. 15; अनुक्तमप्यपेक्षितमन्यतो ग्राह्यम् PāñcRāRa. 23. 3; न सर्वस्याप्रमाणत्वं स्वपक्षस्य स्वतः क्षतेः। न सर्वस्य प्रमाणत्वं स्वपक्षस्यान्यतः क्षतेः NyāyPari. 31. 10; यद्यप्यन्येऽपि गुणाः ... अनित्या एव तेषामन्यतोऽपि विनाशः Upask. 282. 6 (*on* vii. 1. 2); उत्साहनादेन कुतोऽपि कुपितोऽन्यतः। ... जग्राह भूपतेरंसम् HammīMaKā. 4. 67; उत्पत्तिश्च स्वीक्रियमाणा नोपपद्यते स्वतो न संभवति। अन्यतस्त्वनवस्था AṇuBh. 142. 20 (*on* ii. 3. 9); 279. 14 (*on* iii. 4. 19); तत्त्वपदार्थयोः प्रकृतवाक्यार्थानुकूल्योरन्यतोऽसिद्धत्वात् तावपि शास्त्रेणैव प्रमातव्यौ SiddhāBi. 3. 6; संख्या°...°निर्मलगुणः कुत्रान्यतो लभ्यताम् AlaṅkaŚe. 22. 4 (18); अग्निहोत्रादिशब्दाः विधेयगुणसमर्पकाः। उत अन्यतः प्राप्तगुणयोगेन धात्वर्थविशेषपरिचायकाः MīmāKau. i. 195. 21 (*on* i. 4. 4); यदि विधिनिषेधविषयत्वम्

इष्टानिष्टफलकत्वविशिष्टेतिकर्तव्यताकं वा गुणदोषत्वम् तदन्यतस्सिद्धत्वा-न्नार्थवादापेक्षम् MīmāKau. iii (1). 6. 3 (*on* i. 2. 1); iii (2). 227. 18 (*on* ii. 2. 19); iii (2). 284. 14 (*on* ii. 2. 26); नियतप्रमाणप्रतिपाद्यानामेव धर्मत्वप्रतीतेः अन्यतः प्रमितस्य फलसाधनत्वाभावात् तेषामप्रामाण्यम् BhāṭṭDī. i. 42. 3 (*on* i. 3. 3); प्रथममेव क्रियाधर्मप्रतीतौ कुतः साधारणप्रतिज्ञा। सूत्रस्यान्यतः साधारणप्रतिज्ञार्थत्वा-सिद्धावावृत्त्यसिद्धेः SiddhāSi. i. 41. 26; यूपस्यौदुम्बरत्वेन भवनस्यान्यतोऽप्राप्तत्वाद-प्राप्तार्थकत्वादेव विधिः कल्प्यताम् MayūMāli. 10. 22 (*on* i. 2. 2); 776. 23 (*on* x. 8. 5); होमचतुरवत्तयोरन्यतो लब्धयोरिह संबन्धमात्रविधानेन ... चतुरवत्तं जुहोति BhāṭṭCan. 49. 6 (*on* xiv. 2. 5); विधेये भेदकं तन्त्रमन्यतो नियमो न हि VaiyāBhū. 56 (229. 23); अधिकमन्यतोऽवगन्तव्यम् BālamBha. i. 15. 3 (*on* i. 11. 12); **7Ci** by any other means आनृण्यमधमर्णस्य धनदानत एव नान्यतः SmṛtiCan. iv. 335. 3; **7Cii** by another means अन्यत इति सिद्धे विकल्पार्थमिदम् LaŚabdeŚe. i. 396. 24; **7D** by another authority, cf. अन्यतःसिद्धAi; **8Ai** after another word or stem वर्णादनुदात्तात् तोपधात् तो नः। अन्यतो ङीष् P. iv. 1. 40; अन्यतोऽपि च Kātan. iv. 3. 49 (Vṛ. गमेरन्यस्मादपि संज्ञायामसंज्ञायामपि नाम्न्युपपदे डो भवति); दृश्यन्तेऽन्यतोऽपि JaineVyā. iv. 1. 79 (Vṛ. कामीपं च विहाय अन्यविभक्त्यन्तेभ्योऽपि दृश्यन्ते तसादयः); कर्मण्युपपद आकारान्तादनुपसर्गाद्धातोः को भवति। ... अन्यतोऽपि च इति डः KātanVṛ. *on* iv. 3. 4; अन्यत्रान्यतोऽपि चान्योऽपि दृश्यते SaraKaṇṭhā. (Gr.) i. 4. 121; तोपधादन्यतो वर्णादनुदात्तात् ङीष् स्यात् PrakriKau. i. 351. 2; पर्वतादिस्थितेस्तु यद्यपि स्वरूपेण भूतत्वादि न स्यात् तथाप्यन्यतो भविष्यति Prasā. ii. 7. 13; स्युः कर्तरीमनिज्भावे को घोः किः प्रादितोऽन्यतः KalpaK. 469.69; कलापिनो वचनसामर्थ्यादणसिद्धौ पुनरणुग्रहण-मन्यतो(ऽपि) विधानार्थम् LaŚabdeŚe. ii. 275. 8; **8Aii** after any other word or stem इदमदसोः कादेव नान्यत इति MahāBh. iii. 245. 3 (*on* vii. 1. 11); **8B** in comparision with another (word), from another (word) पूर्वप्रथमावन्यतोऽतिशये ŚākṭāVyā. ii. 3. 5 (Vṛ. पूर्वशब्दः प्रथमशब्दश्चान्यतोऽतिशये तदर्थस्य प्रकर्षे द्योत्ये द्विरुच्यते); SiddhaHe. vii. 4. 77 (comm. एतौ स्वार्थस्यान्यतः प्रकर्षे द्योत्ये द्विः स्याताम्); **9A** in another way, otherwise मूषकः ... हन्तव्योऽनुपकारकः। उपप्रदानैर्मार्जारो हितकृत्प्राप्यतेऽन्यतः Tantrākhyā. 10. 16; PañcT. 1. 47 (32. 6); अन्यतोऽपि बहुशो व्यवसितचारित्रा तस्यां वेश्यायामिव गमनम् ... न धर्मपीडां करिष्यति KāmSū. 63. 13 (1. 5); न हि भिन्नशाखा-धिगतत्वेऽप्यगृह्यमाणविशेषतास्ति ... इह तु स्वरूपस्यान्यतोऽधिगतेर्वैषम्यम् BālaKrī. i. 24. 17 (*on* 1. 7); मदनस्याङ्गाकरणे मन्ये जगदखिलमेकरूपमिदम् तिर्यञ्च इति नरा इति देवा इत्यन्यतो भेदः VairāŚ. (A.) 50; परस्परमन्यतो वा परिलङ्घना विधातव्या तदिदं धर्मदानम् ... सर्वैरपि प्रतिपालनीयम् EI. iii. 275. 69; xi. 59.10; **9B** in any other way न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वान्यतः सशरीरत्वं शक्यं कल्पयितुम् BrahmSūBh. (Śaṅ.) 31. 10 (*on* i. 1. 4); **10Ai** to or towards another (चुम्बनम्) प्रमत्तस्य ... वान्यतोऽभिमुखस्य ... निद्राव्याघातार्थं चलितकम् KāmSū. 113. 5 (2. 3); ; **10Aii** to or towards something else न शक्यते चित्तम् ... अन्यतः प्रवर्तयितुम् Nāgā. 2. 10 (36); भूयो भूय इमे वसन्तमरुतश्चेतः हरन्त्यन्यतः Subhāṣi. 1188; तस्य (भरतस्य) तस्मिन् मृगे दूरसमीपपरिवर्तिनि। आसीच्चेतः समासक्तं न ययावन्यतो द्विज ViṣṇuP. ii. 13. 22; **10Bi** from another thing or object यदि द्वितीयं पदार्थमन्यत आरभेत ततोऽधिकैरपि व्यवदध्यात् ŚābaBh. 1294. 3 (*on* v. 1. 8); नानुष्णशीतादप्यन्यतो व्यवच्छेदप्रसङ्गात् HetuBiṬ. 75. 16; चिक्रीडिषा ... कथं निवृत्तस्य सदान्यतः BhāgP. iii. 7. 3; वैशिष्ट्यमन्यव्यावृत्तिः (v. l. °अन्यतो व्यावृत्तिः)। समानाधिकरणं व्यावर्तकं विशेषणम् SaptaPa. 192 (55); यस्मिन्नसे च कण्ठोक्त्या ककारादिर्निषेधितः। तत्र तत्र निषेध्यस्तु तदौचित्यमतोऽन्यतः RāsRaSa. 11. 128; मधुकर तव करनिकरैः किं किं क्रान्तं कुलं न कुसुमानाम्। तद्वद सरसिजमुकुले लब्धं किंचिद्यदन्यतस्तत्किम् ŚārṅgaPa.815; **10Bii** from one thing क इह नेच्छेद् भवद्भिः सह ... संबन्धम्। किन्तु न शक्यते चित्तमन्यतः प्रवृत्तमन्यतः प्रवर्तयितुम् Nāgā. 2. 10 (36); **10Biii** from anything else निसर्गतः पवित्रस्य किमन्यत्पावनं तव। तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः MahāviC. 4. 27; UttaRāC. 1.13; न चान्यतो विशिष्टास्ते तुल्यपर्यनु-योगतः। सहकारिकलापानामनवस्था च ते भवेत् TattvSaṁ. 430; **10 C** for other things एतदर्थं पुरा प्रोक्तो वाल्मीकिर्मुनिसत्तमः। स तु रामायणं कृत्वा निरपेक्षोऽन्यतोऽभवत् BṛDharmaP. i. 27. 26; **10D** with regard to another, i.e. body सौक्ष्म्येण ह वा एषोऽवतिष्ठते स्थूलत्वेनोदेति सूक्ष्मश्चायो स्थूलश्च प्रकृतितः सूक्ष्मोऽन्यतः स्थूलोऽथैनमाहुः BrahmSūBh. (Ma.) 41A. 2 (*on* ii. 4. 9) (TattvPrakā. अन्यतः शरीरादितः); **11A** on the other hand अतिकोमलमेकतोऽन्यतः सरसाम्भोरुहवृन्तकर्कशम्। वहति स्फुटमेकमेव ते वचनं शाकपलाशदेश्यताम् ŚiśuVa. 16. 18 (comm. अन्यतः अन्यः); एकतस्तावत् अन्यतन्त्री क्रियादर्शनम् ... अन्यतस्तु क्रिया क्रियातो विभागः NyāyMañ. i. 117. 28; एकतो रोदिति प्रिया अन्यतः समरतूर्यनिर्घोषः। स्नेहेन रणरसेन च भटस्य दोलायितं हृदयम् Loc. 173. 14 (*on* 3. 24); (भरतः) एकत्र विश्वविजयी विनयी चान्यतो गुरौ। पारिपद्वैर्विचार्यालं द्वैतीयीकः प्रशस्यते TriṣaŚaPuC. i. 5. 101; एकतश्च सुरसुन्दरीजनः श्रीः प्रतीच्छति युयुत्सुमन्यतः। पाप्मना सह पलायतोऽयशश्चैकतः कुलकलङ्ककारणम् SūktiMu. 92. 30; अन्यतः स्मरनाराचाः शृण्वतस्तद् गुणान्मम JānaPa. 1. 48; **11B** on the contrary कपिप्रवरकक्षगो दुरपकर्षदोर्विंशतिः शिरोदशकमग्रतः पदचतुष्टयं चान्यतः JānaPa. 1. 53; **12** from the rest लक्ष्यार्थनिष्ठमुपलब्धमतोऽन्यतोऽर्थात् SaṁkṣeŚā. 1. 515 (i. 370. 13); तेषां त्रैवर्णिकत्वमेव नास्ति दूरे ब्राह्मणभावः, न हीन्द्रियसंप्रयोगसमनन्तरं केषुचिदेव देहविशेषेषु अनुवर्तमानमन्यतो व्यावर्तमानम् ... ब्राह्मण्यं नाम जातिविशेषमपरोक्षयामः ĀgaPrā. 7.8; **13** in addition to, additionally तत्रापि पर्वताः सप्त विज्ञेयाः ... कङ्कस्तु पञ्चमः ... । ककुद्मान्पर्वतवरः सरित्रामान्यतो द्विजा: BrahmP. 20. 27; **14** in some other sense मोक्षे ज्ञानं विज्ञानमन्यतः AbhidhāCin. 310; 'बभ्रुर्मुन्यन्तरे विष्णौ बभ्रु नकुलपिङ्गलौ चादन्यतोऽपि' SiddhāKau. 518A. 10 (*on* Uṇā. 1. 22); **15** in another time, at another time क्षयः कार्तिकादित्रये नान्यतः स्यात् तदा वर्षमध्येऽधिमासद्वयं च GrahaGa. 34. 4 (6. 6); **16A** in another case शब्दाभिलापविकलं प्रत्यक्षं निर्विकल्पकं – इत्यपि न। तन्मात्रस्पर्शशून्यत्वमसिद्धत्वादलक्षणम्। यावद् वाचकसंस्पर्शशून्यत्वं गतमन्यतः TarkSaṁ. (Ā.) 87. 18; **16B** in the case of one पञ्चनखापञ्चन-खभक्षणयोरन्यतः प्राप्तौ अन्यपरिवर्जनवत्, आत्मसाक्षात्कारस्योपनिपदतिरिक्तात् प्राप्त्यसंभवात् VivaPraSaṁ. 4. 2; **17** for another purpose, aim or objective राज्ञा ... स्मार्ताः शुभमरणं पृष्टाः। ... पुनरन्यतो गोकार्यमृतस्वपाकमानयित्वा(?) समेते तत्र पुनः स्मार्ताः पृष्टाः PurāPraSaṁ. 13. 6; **18** as being distinct or different, distinctly इति संकथयन्तीषु सखीष्वैक्षिष्ट सान्यतः Gaṅgāva. 4. 54 [from another motive, MW.; from another ground or motive, Apte]

अन्यतस्त्य (anyatas-tya) *m.* [Debru. 699] opponent, adversary, enemy (*lit.* born of another (mother) अन्यतस्त्यानां सपत्नानां जयनशीलो भवति BṛĀraUBh. 222. 17 (*on* ii.1.6); अन्यतो मातृतो जाता अन्यतस्त्या उदाहृताः BṛĀraUBhVā. ii. 1. 64.

अन्यतस्त्यजायिन् (anyatastya-jāyín) *adj.* [Debru. 699] conqueror of enemy, overwhelming adversary (*lit.* born of another (mother) स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ŚatBr. XIV. v. 1. 6; BṛĀraU. ii. 1. 6 (Śaṅ. अन्यतस्त्यानां सपत्नानां जयनशीलो भवति); स यो हैतमेवमुपास्ते जिष्णुर्ह वा अपराजिष्णुरन्यतस्त्यजायी भवति ŚāṅkhāĀ. 6. 7 (23. 12); अप्यन्यतस्त्यजायी स्यात् सापत्नप्रातृमर्दनः BṛĀraUBhVā. ii. 1. 64.

अन्यतःसङ्ग (anyatas-saṅga) *adj.* connected on one side (only) तस्येपोऽन्य-तस्सङ्गो गोआयुपी उक्थ्यावन्तरौ भवतः JaimiBr. 2. 321.

अन्यतःसिद्ध (anyatas-siddha) *adj.* **Ai** established by another authority ऋक्सामविशेषितस्तोत्रानुरागं यागस्यान्यतःसिद्धमुपादाय केवलफलसंबन्धमात्रं विधिनानेन बोध्यत इति कुतो वाक्यभेदः ŚāstrDī. 157. 1 (*on* ii. 2. 12); **Aii** obtained from another cause or source शूद्रस्य त्वन्यतःसिद्धविद्यत्वाभावात् तदर्जनमपि प्रयुङ्क्ते ŚāstrDī. 454. 8 (*on* vi. 1. 7); अन्यतःसिद्धतद्ग्रहणादेयोत्तरक्रतुविधि-प्रवृत्तौ आक्षेपशक्तिकल्पनाया गौरवग्रस्तत्वात् SiddhāTa. 21. 24; तिलैः शान्त्या इत्यादिविधीनामन्यतः सिद्धहोमाश्रयेण ... फलाय गुणविधिरूपत्वात् NityoNi. 123. 15; **B** referred to by another (word) सामान्यवान् अचलनात्मकः संयोगविभागयोर्न कारणं गुणः - इति निरस्तम्, अच(ल)नात्मकविशेषणस्य अन्यतःसिद्धकर्मव्यावृत्त्यर्थस्य निरर्थकत्वात् TarkSaṁ. (Ā.) 56. 16; दृष्टं लिङ्गेऽन्यतः-सिद्धकर्तव्यतानुवादिनीत्यम् NyāySu. (So.) 42. 14 (*on* i. 2. 7); प्रसङ्गस्थले अन्यत-स्सिद्धोपकारलाभात् पुरोडाशप्रयोगविधिलाघवेन नोपकारजनकीभूतं प्रयाजादिकमनुष्ठापयति BhāṭṭDī. iv. 219. 15 (*on* xii. 1. 1)

अन्यतःसिद्धत्व (anyatassiddha-tva) *n.* the state of being obtained from another source ह्रीं क्लीं सौः इति ...। अत्र मायाग्न्योर्व्यत्ययेन योगः बिन्दोरव्यवहितापू(च्यू)र्वताया: स्वरेष्वन्यतःसिद्धत्वात् SetuBa. 60. 3.

अन्यतःसिद्धि (anyatas-siddhi) *f.* **A** establishment by another authority सदनुभूतिरेव। सा च स्वतःसिद्धा। ... अन्यतःसिद्धौ घटादिवदननुभूतित्वप्रसङ्गः BrahmSūBh. (Rā.) 24. 6 (*on* i. 1. 1); **B** reference by another (word) यथाकथंचिदुपकारमात्रस्यान्यतःसिद्धिं पर्यालोच्य तमेवानुमन्यते MayūMāli. 811. 13 (*on* xi. 2. 8)

अन्यता (anya-tā) *f.* **1A** difference (from Brahman) एतत्ते कथितं राजन् योगम् ...। यं प्राप्य ब्रह्मणो योगी शाश्वतां नान्यतां व्रजेत् MārkP. 39. 8; अतद्भावोऽन्यता चेति न विशेषोऽस्ति कश्चन AnuVyā. 11B. 9 (*on* I. 2); 16A. 7 (*on* 1. 4); ब्रह्मैवेदं जगत् सर्वमन्यतायास्ततः कुतः। प्रसङ्गः YogVā.

iv. 45. 21; आहुर्नान्यतासङ्गे भोक्तृतादात्म्यकल्पनात् VedāntSiSūMañ. 2. 59; **1B** difference (from oneself) स्वात्मनोऽनन्यत्वादन्यत्र भवति। एवमन्यताया अभावः NyāyBh. 139. 7 (*on* ii. 2. 31); भावो भावान्तरं नो वा भावश्चेत् का भिदा स्वतः। न चेद् भावान्यते न स्तामेकोऽतो वस्त्विनामकः IṣṭaSi. 296. 23; [Inst.] by way of difference तदात्मनियतप्रतिभासज्ञानादेव तद्विपरीतस्यान्यतया तदाभासता प्रतीतेः HetuBiṬ. 7. 2; तस्माद् वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमय इत्यन्योन्यमन्यतयोक्तान्नमयादीनां कथं ब्रह्मता TattvPrakā. 19B.4 (*on* i. 1. 15); **1Ci** difference, i.e. mutual absence लब्धसौरभगुणो मदिराणामङ्गनास्य-चपकस्य च गन्धः। मोदितालिरितरेतरयोगादन्यतामभजतातिशयं नु ŚiśuVa. 10. 24; नान्यत्वादिति चानेन परोक्तादन्यतोच्यते ŚlokaVār. 2. 179 (99. 7); अन्यतान्यथाभावौ न स्वरूपात्र चान्यथा IṣṭaSi. 231. 14; ददाति यजतीत्यादौ भावनैक्यमुतान्यता NyāyMāVi. 79. 5 (*on* ii. 2. 1); अन्यता चान्योन्याभावः NyāySu. (Ja.) 382A. 12 (*on* ii. 2. 6); 199A. 9 (*on* i. 4. 6); अन्त्या विज्ञानवृत्तिः प्रकृतिपुरुषयोरन्यतां गाहमाना ... इति सांख्या: TattvMu. 2. 70; **1Cii** difference भेदकातिशयोक्तिश्चेदकस्यैवान्यतोच्यते Candrā. 5. 45 **1D** distinction, i.e. particularity शब्दस्य प्रत्यभिज्ञानान्नान्यतोच्चारणान्तरे TantrVā. 264. 9 (*on* i. 3. 26); दृष्टेति सर्वशब्दधीर्दुस्तरा, प्रत्यभिज्ञास्थितौ हि दृष्टान्यता NayaVi. 233. 1 (*on* i. 1. 7); **2A** another condition, i.e. wretched state सूनुः सगुणश्चन्दनाभिधः। पित्रा लोभान्धकारेण नीतः पद्म इवान्यताम् DarpaDa. 2. 19; **2B** another condition, i.e. gloominess, DarpaDa. 2. 19; **3** (Jain.) type of *bhāvanā*, eternal difference साम्यं स्याद् निर्ममत्वेन तत्कृते भावनाः श्रयेत्। अनित्यतामशरणं भवमेकत्वमन्यताम्। ... द्वादशीं बोधिभावनाम् YogŚā. 4. 55; **4** the word *anyatā* अन्यतापदं व्याचष्टे भेद इति Bhāsk. i. 275. 17 (*on* i. 5. 17)

अन्यताख्याति (anyatā-khyāti) *f.* knowledge of difference (between primordial matter and person) बुद्धेः सात्त्विके परिणामे कृतसंयमस्य या सत्त्वपुरुषयोरुत्पद्यते सा अन्यताख्यातिः RājMār. 61. 15.

अन्यतात्पर्य (anya-tātparya) *n.* devotion to the opposite, i.e. misunderstanding अनिरूपितकारित्वमुन्मादः परिकीर्तितः। ज्ञानाभावान्यतात्पर्य-शोकादिभ्यः स जायते SāhiSā. 5. 35.

अन्यतात्पर्यक (anyatātparya-ka) *adj.* meant to convey different (sense) न ... अपूर्वान्त एव प्रसादस्वीकरणमस्त्विति वाच्यम् अन्यतात्पर्यकस्य वाक्यस्यान्यत्र प्रामाण्यायोगात् BhāṭṭDī. iii. 52. 23 (*on* ix. 1. 4); यथा परेत्यादिवचनम् ... नामकीर्तनप्राशस्त्यैकतात्पर्यकम् ...। विश्वस्मादिन्द्र उत्तर इत्यादेरन्यतात्पर्यकान्मन्त्रा-दिन्द्रस्य सर्वोत्तमत्वसिद्धेरभावात् SetuBa. 64. 4.

अन्यतात्पर्यकत्व (anyatātparyaka-tva) *n.* the state of being meant to convey different (subject) न चेतिहासपुराणादि मानम्, तस्यान्यतात्पर्यकत्वात् BhāṭṭCin. i. 23. 13 (*on* i. 1. 4)

अन्यतात्मन् (anyatātman) *adj.* having (desire for knowing) the nature of difference (from the true one) देवासुरा ह वै च आत्मकामा ब्रह्मणोऽन्तिकं प्रयातास्तस्मै नमस्कृत्वोचुः। ... चिरं ध्यात्वामन्यत। अन्यतात्मानो वै तेऽसुराः MaiU. 7. 10.

अन्यतादर्शन (anyatā-darśana) *n.* observation of difference यस्य क्षीरस्य विकारो यद् दधि तस्मात् क्षीरादन्यता तस्य दध्नः केनापि क्कापि न दृश्यते ... एवमन्यतादर्शनस्य सिद्धा विकारविकारिभावाद् व्यावृत्तिः NyāySu. (Ja.) 199A. 10 (*on* i. 4. 6)

अन्यतादात्म्य (anya-tādātmya) *n.* **A** identity or oneness with another अभावत्रयेऽप्यन्यस्यान्यसंबन्धित्वनिषेधः, इतरेतराभावेऽन्यस्यान्यतादात्म्यनिषेधः NyāyRa. 481.18 (*on* 5 (8). 26); अन्यस्य द्रव्यान्तराद् व्यावर्तकधर्मस्यैव (स्व)त्वा(?त्वा)-वृत्तिरूपत्वसंभवः। स्वरूपे प्रतिपन्ने स्वस्यान्यतादात्म्यभ्रमविरोधिनश्च स्वरूपमेव व्यावृत्तिः ŚrutaPra. iA.115. 12 (*on* i. 1.1); धर्मविशेषाणां धर्मान्तरमनपेक्ष्यैव स्वस्मिन्नन्यतादात्म्याध्यासविरोधित्वात् ŚatDū. 92. 3; नापि तत्रान्यतादात्म्यारोपः TattvCin. i.348.5; एवकारस्याप्यन्यतादात्म्यव्यवच्छेदबोधकत्वेऽपि ... निषेधबोधकत्वम् GuruCandr. ii. 264.15; LaCandr. 524. 41; **B** similarity with another विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्। सारोपा स्यात् (लक्षणा) SāhiDa. 45. 2; 547. 2; सामान्यं प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः SāhiDa. 611.12; अन्यधर्मसंबन्ध-निमित्तेनान्यस्यान्यतादात्म्यसंभावनमुत्प्रेक्षा Kuval. 35(1)

अन्यतानवच्छेद (anyatānavaccheda) *m.* non-delimitation by difference जातिलक्षणदेशैरन्यतानवच्छेदात् तुल्ययोस्ततः प्रतिपत्तिः YogSū. 3. 53.

अन्यतापसी (anya-tāpasī) *f.* another female ascetic अन्यतापसीभिरुप-चर्यमाणापि भैषज्याभावात् ... राज्ञी मृता KathāK. 107. 3.

अन्यतापिन् (anya-tāpin) *adj.* (used as noun) (one) who scorches others नय। आमपाके च गर्भघ्नं शूलपाकेऽन्यतापिनम् SkandP. iv. 8. 80.

अन्यताप्रतियोगिन् (anyatā-pratiyogin) *adj.* counter-positive of difference, i.e. absence वक्तव्यं किं तदन्यताप्रतियोगीति KhaṇḍanKhā. 934.14.

अन्यताप्रतीति (anyatā-pratīti) *f.* **1** knowledge of distinction (from another) यदा निर्धूतरजस्तमोमलं बुद्धिसत्त्वं पुरुषस्यान्यताप्रतीतिमात्राधिकारं दग्धक्लेशबीजं भवति तदा पुरुषस्य शुद्धिसारूप्यमिवापन्नं भवति YogBh. 181. 1 (*on* 3. 55); **2** (anyatāpratīti) absence of knowledge of difference न चान्यताप्रतीतौ संबन्धप्रतीतिरुपपद्यते NyāySu. (Ja.) 332B. 9 (*on* ii. 2. 3)

अन्यताप्रत्यय (anyatā-pratyaya) *m.* knowledge of distinction or particularity येऽन्त्या विशेषास्तेऽन्यताप्रत्ययं कुर्वन्ति YogBh. 179. 1 (*on* 3.53)

अन्यताभाव (anyatābhāva) *n.* absence of distinction अन्यदन्यस्मादनन्य-त्वादनन्यदित्यन्यताभावः NyāySū. ii. 2. 31; TārkiRa. 297. 1; एकान्तेनान्यता-भावाज्ञात्याद्ययेन चेद् गतम्। विज्ञातार्थाधिगन्तृत्वात् स्मार्तज्ञानसमं परम् TattvSaṁ. 1298.

अन्यतामात्र (anyatā-mātra) *n.* mere difference न च प्रधानस्य प्रातिपदि-कार्थस्य तत्त्वेन प्रत्यभिज्ञाने तद्विशेषणस्य विभक्त्यर्थस्यान्यतामात्रेणान्यता युक्ता Bhām. 152. 11 (*on* i. 1. 24)

अन्यतार्किक (anya-tārkika) *m.* another logician सांख्याः ... अन्यतार्किककृतबुद्धिविषयास्तत्तो विहन्यन्ते PraśnaUBh. 298. 6 (*on* 6. 3)

अन्यताल (anya-tāla) *m.* different musical time or measure लयान्तरेऽ-न्यतालेन ध्रुवाभोगौ ... यस्यां सा ढेङ्किका मता SaṁgīRa. ii. 256. 1 (4.146); स्वराद्यकरणस्यैव वर्तन्या लक्ष्म किंत्विह। रासकादन्यतालः स्याल्लयो ज्ञेयो विलम्बितः SaṁgīRa. ii. 259. 3 (4. 153)

अन्यतालक्षण (anyatā-lakṣaṇa) *adj.* characterised by difference, i.e. mutual absence विभागो विदारणात्मा नान्यत्वम्। ... अन्यतालक्षणस्य भेदस्य वस्तुस्वरूपत्वे विदारणप्रसङ्गेनात्यल्पतापादनमप्यसंगतमेव NyāySu. (Ja.) 382A. 11 (*on* ii. 2. 6)

अन्यतिथि (anya-tithi) *f.* another lunar day कार्यं नवान्नप्राशनम् ...। रिक्तां दिनक्षयं नन्दां द्वादशीमष्टमीममाम्। त्यक्त्वान्यतिथयः श्रेष्ठाः प्राशने NāraS. 21. 2; CaturCin. iii (3). 900. 12.

अन्यतिमि (anya-timi) *m.* another kind of whale or fabulous fish अविवेकात् पुनर्मत्स्यस्तण्डुलोऽन्यतिमिष्वलम् PārśvC. 3. 393.

अन्यतिरश्चीन (anya-tiraścīna) *adj.* not related to, i.e. independent of any other (event) यज्यादिशब्दानामेवाङ्वाक्यगतानामधिकारनियोगान्वितस्वार्थाभिधानं नाभ्युपगम्यते। तथा सत्युत्पत्तावेवाङ्गयागस्वरूपस्यान्यतिरश्चीनस्य नियोगान्तरविषयत्वात् PrakaPañ. 443. 7; अन्यतिरश्चीनतयावगतस्य नियोगान्तरविषयता न स्यात् NyāyRaMā. 141. 4.

अन्यतिवर्जम् (anyativarjam) *adv.* excepting the verbal root *an* - (to breathe) नहिप्रभृतयोऽनुदात्ताः अन्यतिवर्जम् DhātuPra. 4. 86 (96. 20)

अन्यतीर (anya-tīra) *m.* other shore कीर्त्ति (Read कीर्तिः) ...। पारावारान्य-तीरोत्तरणमविरलं कुर्वतीव प्रयाता स्वर्ग्ग(Read स्वर्गं) गीर्वाणहारद्विरदसुरसरिद्धांत्तं (Read सरिद्धार्त) राष्ट्रच्छलेन EI. xviii. 244. 11.

अन्यतीर्थ (anya-tīrtha) *n., m.* **1A** any other holy water यत्र स्थाने तु यत् तीर्थं नदी पुण्यतमा तथा। तद् ध्यायेन्मनसा नित्यमन्यतीर्थं न चिन्तयेत् BṛParāSm. 2. 124; **1B** another holy water or river अन्यतीर्थसमं गङ्गां यो ब्रवीति नराधमः। स याति नरकम् PadmP. i. 31. 74; अन्यतीर्थप्रशंसाम् ... गङ्गायाम् ... नैव प्राणान्तेऽपि समाचरेत् BṛDharmaP. i. 54. 40; अन्यतीर्थातिशयप्रसङ्गे विश्राम्यति त्वय्युपमानभावः YātrāPra. 7. 176; **2A** another holy or sacred place अन्यतीर्थे यदा स्नानं कुर्यात्तत्र च योजयेत्। केवलं मूलमन्त्रम् JayāS. 9.29; PāraS. 2.76; मार्कण्डेयः ... अन्यतीर्थपराङ्मुखः। ... प्राह ... जगद्गुरुम् SkandP. ii (2). 3. 44; गङ्गातीरे ... यः कुर्याद्देवालयं सुधीः। अन्यतीर्थप्रतिष्ठातो भवेत् कोटिगुणं फलम् SkandP. iv. 27. 100; v (3). 51. 27; विशिष्टतरमभिलषन्त्या पुण्यमन्यतीर्थेष्वपि विहर्तव्यम् TilaMañ. 413. 18; तीर्थे बिन्दुसरो नाम ...। ये तत्र दानं विप्रेभ्यः प्रयच्छन्ति ...। अन्यतीर्थाच्छतगुणं फलं ते प्राप्नुवन्ति BrahmP. 41. 59; 177. 20; पुत्रस्य च महत्तीर्थं पित्रोश्चरणपङ्कजम्। अन्यतीर्थं तु दूरे वै गत्वा संप्राप्यते पुनः ŚivaP. ii (4). 19. 41 (217B. 2); गच्छन्तितोऽन्यतीर्थेषु च्यवमानोऽहम् TriṣaŚaPuC. i. 1. 679; iii. 1. 186; **2B** any other holy or sacred place (गङ्गायाः) तस्याः परतरं तीर्थं न स्यादिति मतिर्मम। अन्यतीर्थेन साधर्म्यं न युज्येत कथंचन BrahmP. 175. 8; मुख्यनद्यब्धितीर्थेषु नान्यतीर्थानि कीर्तयेत् ĪśānŚiPa. i. 9. 30; ii. 3. 25; नान्यतीर्थेषु तत् स्वर्णभूमिभूषणदानतः ViviTīKa. 3. 14; **3** any other portion of the hand तीर्थं कनिष्ठिकामूले कार्यं तेन प्रजापतेः। ... तीर्थैर्देवानां पितृभिः सह। सदा कार्याणि कुर्वीत नान्यतीर्थेन कर्हिचित् MārkP. 34. 107; **4** another school of philosophy, cf. **अन्यतीर्थयशस् 1.**

अन्यतीर्थकर (anya-tīrthakara) *m.* another Jaina Arhat तेषां तु मद्रकाराणां यथा मद्रंकरोऽभवम्। पूर्वतीर्थकरपथेनान्यतीर्थकरो यथा DvyāśraKā. 11. 70.

अन्यतीर्थयशस् (anyatīrtha-yaśas) *adj.* (used as noun) 1 (one) who has (defeated) glory of another school of philosophy अध्यापयन्तम् ... अन्यतीर्थयशसं श्रुतिभाष्यजातम्। आक्षिप्य पाशुपतवैष्णववीरशैवमाहेश्वराश्च विजिता हि सुरेश्वराद्यैः ŚaṅkaDigVi. (Mā.) 10. 115 (comm. तिरस्कृतान्यशास्त्रयशसम्); 2 (anya-tīrthayaśas) (one) possessing extraordinary thought and fame, ŚaṅkaDigVi. (Mā.) 10. 115 (comm. लोकविलक्षणे एव ... शास्त्रकीर्तिकुले यस्य तम्)

अन्यतीर्थयात्रा (anyatīrtha-yātrā) *f.* pilgrimage of another holy place तौ द्वावपि मुनिं नमस्कृत्यान्यतीर्थयात्रां कर्तुं गतौ विमानारूढौ KathāK. 39. 22.

अन्यतीर्थिक (anya-tīrthika) *m.* A member of another sect of philosophy, another heretic कुशल इति तदन्यकृत्योत्साहव्युदासाय(र्थं?) सम्यगित्यन्यतीर्थिकमोक्षार्थोत्साहव्युदासार्थम् MaYānaSū .105. 28; इदं च ... महावीरजिनवरप्रतिमया प्रसाधितस्य सिद्धायतनमैत्र्या पवित्रितं तीर्थमन्यतीर्थिकपरिगृहीतैरनेकसत्त्वप्रलयहेतुभिः प्रपातस्तीर्थैः समीकृतम् TilaMañ. 319. 23; एकांशग्राहकनयानुयायिनोऽन्यतीर्थिकाः SyādvāMañ. 22 (36); B other (than Buddhist) Sectarian अथ खलु अन्यतीर्थिकचरकपरिव्राजका ... श्रमणा आश्चर्याद्भुतसंविग्नसंहृष्टरोमजाता अभूवन्तुः MaVastuAva. iii. 412. 7; पश्चिमामुत्तरामेव दिं गच्छति स्म तत्र तत्र बोधिसत्त्वमेवाद्राक्षीत्। तेन खलु पुनः समयेन शुद्धावासकायिकैर्देवपुत्रैः सर्वेऽन्यतीर्थिका निगृहीता अभूवन् LaliVi. 195. 25 [DBHS.]

अन्यतीर्थिकपूर्व (anyatīrthika-pūrva) *adj.* (used as noun) formerly a member of another sect किं पुनरार्यमहाकश्यपो अन्यतीर्थिकपूर्वो समानो आर्यमानन्दं ... कुमारवादेन समुदाचरितव्यं मन्यति MaVastuAva. iii. 49. 12 [DHBS.]

अन्यतीर्थ्य (anya-tīrthya) *m.* another heretic महाबन्धनसंयुता अन्यतीर्थ्याः MaYānaSū. 124. 10.

अन्यतीर्थ्य (anya-tīrthya) *adj.* (used as noun) (one) who upholds other heretical views अप्रज्ञायमानकुलगोत्रः कोऽप्ययं मायापुरुष इत्येवं परिकल्पयेयुर्देवः पिशाच इति वा यथान्यतीर्थ्या अपभाषन्ते AbhidhKoBh. 119. 22 (*on* 3.9)

अन्यतुच्छजन (anya-tucchajana) *m.* other mean people अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः KāvyaPra. 647. 6; 648. 4.

अन्यतुरग (anya-turaga) *m.* another horse आरोहति क्षितिपतौ विनयोपपन्नः ... अन्यतुरगं प्रतिहेषितं च।... योऽश्वः स भर्तुरचिरात् प्रचिनोति लक्ष्मीम् YogYā. 11. 14.

अन्यतुलाविहीन (anyatulā-vihīna) *adj.* devoid of comparison with another, matchless भित्राकरप्रभवमन्यतुलाविहीनं धन्योत्तरैरपि दुरापमहो महार्धम्। रत्नद्वयं तदिदमेकसुवर्णपिण्डे ... विनिहितम् MadaKeC. 67.

अन्यतुल्या (anya-tulyā) *adj.(f.)* equal to any one else राधातुल्याश्च सर्वास्ता नान्यतुल्याः प्रियंवदाः BrahmVaiP. ii. 2. 64.

अन्यतेजस् (anya-tejas) *n.* 1Ai valour of an enemy वाहिनीपतौ पटुतरकरास्फालनोल्लस"...न्य(?अन्य)तेजस्तिरस्कारिणि रक्तचक्रधारिणि ... अभ्यवर्तन्त मन्त्रिणः AvantiKa. 52. 2; हरेरिव तवाभान्ति नान्यतेजांसि तेजसि SaraKaṇṭhā. 10. 22; अन्यतेजोऽसहस्यास्य पिधातुं घर्मदीधितिम्। कृपयेव शराश्चक्रुरस्तम्भं दिवि मण्डपम् PāṇḍaC. 10. 360; 1Aii valour of another, SaraKaṇṭhā. 10. 22; PāṇḍaC. 10. 360; 1B illumination or lustre of another उदयमारुरुक्षति ... न्य(?अन्य)तेजस्तिरस्कारिणि रक्तचक्रधारिणि ... प्रतिक्षणविजृम्भमाणदुःसहोष्मणि ... अभ्यवर्तन्त मन्त्रिणः AvantiKa. 52. 2; अपिदधद्यात्मभासान्यतेजांसि ... नः ... कौस्तुभः सोऽस्तु भूत्यै ViṣṇuPādāSt. 30; हरेरिव तवाभान्ति नान्यतेजांसि तेजसि SaraKaṇṭhā. 10. 22; 2 another lustre, brilliance or luminary, AvantiKa. 52. 2; आसीत्तमोमयं सर्वम् ... अन्यतेजोविवर्जितम् SkandP. iv. 26. 9; ŚivaP. ii (1). 6. 5 (43A. 11); अन्यतेजस्तिरस्कारजनिततेजस्समुद्गाररूपस्य हेतोः सूर्यकान्तेषु दर्शितत्वाद् दृष्टान्तः RasāSu. 251. 1 (3. 105)

अन्यतेजस्विन् (anya-tejasvin) *adj.* (used as noun) A another brilliant or refulgent person स हि ... कदाचिदसहमानोऽन्यतेजस्विषु ... उद्यचाल दिशो वशीकर्तुम् UdaySuKa. 4. 13; अन्यतेजस्विनां तेजस्तदपास्यति ते सुतः TriṣaŚaPuC. i. 2. 247; अन्यतेजस्विनां तेजो ग्रसमानो ग्रहेन्द्रवत् (नरेन्द्रः) TriṣaŚaPuC. i. 5. 411; अन्यतेजस्विमाहात्म्यग्रासोऽज्ञागरतेजसम्। प्रातः प्राचीव मार्तण्डं सा क्रमात् सुषुवे सुतम् PāṇḍaC. 17. 239; B another luminary, PāṇḍaC. 17. 239.

अन्यतेजोऽभिभव (anyatejo'bhibhava) *m.* 1 assault or overpowering by another luster स्पर्शानुकूला अपि सूर्यकान्तास्ते ह्यन्यतेजोऽभिभवाद्दहन्ति Śāk. 2.7; 2 existence of another luster on all sides, Śāk. 2. 7 (comm. अभितो भवो भवनं प्राप्तिः। संबन्धः इति यावत्)

अन्यतैलघृतादि (anya-tailaghṛtādi) *adj.* oil and clarified butter etc. (remaining) in another (lamp) न दग्धशेषवर्त्या तु पुनर्दीपं प्रवर्तयेत्। नोच्छिष्टाशुचितैलाद्यैर्नान्यतैलघृतादिना ĪśānŚiPa. i. 8. 79; ii. 5. 94.

अन्यतोगमनादि (anyato-gamanādi) *adj.* act of going away to some other place and the like चपलता। अमर्षप्रद्वेषेर्ष्यादिभिः। तां ताडनससंभ्रमान्यतोगमनादिभिः (निर्दिशेत्) NāṭaLaRaK. 2044.

अन्यतोघातिन् (anyato-ghātín) *adj.* [P. vii 2. 54; Debru. 346] striking from another end, i.e. from behind अथ य उत्तरामुपवसति यथा पराञ्चमावृत्तं संपिंष्यादप्रत्यालभमानं सोऽन्यतोघात्येव स्यात् ŚatBr. I. vi. 3. 33 (*but* PW.; MW.; Apte. striking in one direction)

अन्यतोजात (anyato-jāta) *adj.* produced from another source अन्यतोजातानिधूमादिव्याप्तिस्मृतौ सत्याम् ... तद्व्यापारकत्वासिद्धेः KhaṇḍanKhā. 493. 14.

अन्यतोज्योतिस् (anyáto-jyotis) *adj.* 1A having (performance of) Soma-sacrifice Jyiṣṭoma on one side (only) कस्मादुभयतोज्योतिषोऽभिप्लवा भवन्त्यन्यतोज्योतिः पृष्ठ्यः ŚatBr. xii. ii. 2.1; 1B having (the chanting of) the Jyotis (*stoma*) only on, one side अन्यतोज्योतिः पृष्ठ्यः ŚatBr. xii. ii. 2. 1; 2 having light on one side only ऋतवः पृष्ठ्योऽन्यतोज्योतिषो वाऽ ऋतव एष एषां ज्योतिर् एष तपति ŚatBr. xii. ii. 2. 1.

अन्यतोदत् (anyáto-dat) *adj.* [P. v. 4. 141-142] having teeth on one side (only) यत् श्मश्रुणस्तत् पुरुषाणां रूपं ... यदन्यतोदन् तद् गवाम् TaiS. II. i. 1. 5; किं तद् यज्ञे यजमानः कुरुते येनान्यतोदतश्च पशून् दाधार Tais. II. vi. 2. 2; अश्वों दद्भिरन्यतोदद्भ्यो भूयान् TaiS. V. i. 2. 6; V. v. 1. 3; KāṭhS. 19. 3; KapiKaS. 30. 1; श्वेतो लोमशस्तूपरो लप्स्युद्यन्यतोदश्चतुष्पादजायत JaimiBr. 2. 262; श्रेष्ठत एवैतत् सर्वा देवताः प्रीणन्ति। ... यदन्यतोदंस्तद् गवाम् JaimiBr. 2. 371.

अन्यतोदन्त (anyato-danta) *adj.* having teeth on one side (only) ये वा अन्यतोदन्ताः पशवस्ते राथन्तराः JaimiBr.1. 128; 2. 84; भक्ष्याः। अनुष्ट्राः पशूनामन्यतोदन्ताश्च VasiSm. 14. 31.

अन्यतोदृष्टहेतु (anyatodṛṣṭa-hetu) *m.* cause observed elsewhere कोलस्थानेऽत्र कर्षः स्यादन्यतोदृष्टहेतुना SiddhYo. 12. 24.

अन्यतोदेशीय (anyatodeś-īya) *adj.* (used as noun) (one) belonging to another country, foreigner जनमासन्नं कुर्वीत, नान्यतोदेशीयमकृतार्थमानम् ArthŚā. i. 103. 5 (1. 21)

अन्यतोद्वार (anyato-dvāra) *adj.* having an opening or a door on one side (only) तदेतत् सर्वतोद्वारमनिषेधं साम। अन्यतोद्वारं हैनदेक एवाभ्रङ्गमुपासते JaimiUBr. i. 30. 2.

अन्यतोऽभाव (anyato'bhāva) *m.* mutual absence सत्परिच्छेदकैर्नापि प्रत्यक्षाद्यैर्ग्रहो भवेत्। व्यावृत्तेरन्यतोऽभावमात्रायाः केनचित्क्वचित् BṛĀraUBhVā. ii. 1. 594.

अन्यतोऽभिमुख (anyato'bhimukha) *adj.* disposed or inclined to another स्वप्नाभिमुखोऽथवान्यतोऽभिमुखः। एते निद्राहतये चुम्ब्यन्ते KandaCū. ii. 3. 27.

अन्यतोभू (anyato-bhū) *adj.* arising from any other source नाभासा अन्यतोभुवः GauḍKā. 4. 49.

अन्यतोमद (anyato-mada) *adj.* (responsive call uttered) with the word *mada* on one side only यत्र होतुरभिजानाति प्र धावा यज्ञैः पृथिवी ऋतावृधेति तदन्यतोमदं प्रतिगृणाति BaudhŚS. i. 252. 5; iii. 111. 6.

अन्यतोमुख (anyáto-mukha) *adj.* 1 facing one quarter अथायमन्यतोमुखः पुरुषः। स एतत्सर्वतोमुखो भवति यत् परिवर्तयते ŚatBr. II. vi. 3. 16; ŚatBr. (K.) I. vi. 3. 10 (but pw. facing or looking at one side only); 2 devoted to or inclined towards another (religion) ब्राह्मणाद्यास्तु ये वर्णास्स्वधर्मादन्यतोमुखाः। यान्ति ते नग्नसंज्ञाम् ViṣṇuP. iii. 18. 48.

अन्यतोय (anya-toya) *n.* other water अन्यतोयैस्तदुत्सृष्टमर्घ्यपात्रे स्थितेतरैः। न गृह्णाति महादेवि दत्तं विधिशतैरपि TantrSā.(K.) 81. 32.

अन्यतोयुक्त (anyáto-yukta) *adj.* [P. vi. 2.2] yoked (with a bull) on one side अन्यतोयुक्तं यवाचितमच्छावाकाय ... ददाति ŚatBr. (K.) VII. iv. 1.21.

अन्यतोऽरण्य (anyáto'raṇya) *n.* land that is woody (only) on one side अन्यतोऽरण्याय दावपम् (आलभते) VājaS. 30. 19; TaiBr. III. iv. 11.1 [a land which is woody here and there, Apte]

अन्यतोवचन (anyato-vacana) *n.* expression by another word रोदनाभिधायिन एव पदादनन्तरमुत्प्रेक्षावादिनि पदे वाच्ये यत् तस्यान्यतोवचनं सोऽवाच्यवचनं दोषः VyaktiVi. 106. 18.

अन्यतोवात (anyato-vāta) *m.* name of a disease of eye (wherein an eye is deformed due to the disordered wind) कुर्याद्रुजोऽति भ्रुवि लोचने वा तमन्यतोवातमुदाहरन्ति SuśruS. vi. 6. 27; यत्रयनं परिताम्यति ... अन्यतोवातवात-पर्यायशुष्काक्षिपाकाल्पशोफादिरोगातुरमपगतरागाश्रुदूषिकावेदनं तत्र तर्पणं योजयेत् AṣṭāSam. i. 165. 24(6.33); तमन्यतोवातमुदाहरन्ति RugVi. 59. 18; सर्वाक्षिरोगाश्चाष्टौ ...। अल्पशोफोऽन्यतोवातस्तथा पाकात्ययः स्मृतः ŚārṅgaS. i. 7.170.

अन्यतोवात (anyato-vātā) *adj.* suffering occasional wind (rheumatism), Apte.

अन्यतोवैश्वानर (anyáto-vaiśvānara) *adj.* having Vaiśvānara on one side न वा एषोऽन्यतोवैश्वानरः सुवर्गाय लोकाय प्राभवत् TaiS. VII. ii. 10.1.

अन्यतोऽसंभवत्फल (anyato'sambhavat-phala) *adj.* (used as noun) (one) whose fruit or effect is impossible from any other cause प्रयागात् फलमिच्छता कृतका मन्त्रा वाच्याः, पौरुषेयाश्च पुरुषाधिष्ठानमन्तरेणान्यतोऽसंभवत्फलानां फलदर्शनात् PramāVāSvopVṛ. 110. 14.

अन्यतोहन् (anyato-hán) *m.* striking from another end, i.e. from behind स यथा पुराश्वमावृत्तमप्रत्यालभमानं संपिंष्यात्सोऽन्यतोहेत्याहुः ŚatBr. (K.) II. vi. 1. 23.

अन्यत्करण (anyat-karaṇa) *n.* another means आत्मा ... हा(ज्ञा?)नस्वभाव एवान्यत्करणैः प्रतिपद्यते ĀtmaSi. 66. 3.

अन्यत्कर्मोपयुक्त (anyat-karmopayukta) *adj.* (used as noun) other artisan (one engaged in arts and crafts) गेहं कुर्यात् ... । तत्रैव नापितानां अन्यत्कर्मोपयुक्तानाम् MayaMa. 9. 89.

अन्यत्काम (anyat-kāma) *adj.* having desire for another thing एको ह वै नारायण आसीत् ... सोऽन्यत्कामो मनसाध्यायत MahāU. 1(8)

अन्यत्कारक (anyat-kāraka) *m., n.* 1 another performer or doer अन्यत्कारकः CāndraVṛ. *on* v. 2. 116; अन्यः कारकः, अन्यत्कारकः KāśiVṛ. *on* vi. 3. 99; छे कारके च परतोऽन्यस्य दुगागमो भवति। ... अन्यः कारकः अन्यत्कारकः JaineVṛ. 313. 26 (*on* iv. 3. 204); किमन्यदाशीर्वचनानि ... न व्यधत्ताम्। तदान्यदुत्सुक्यमिमौ जयस्यान्यत्कारके स्याद्धि यशोऽन्यदीयम् DvyāśraKā. 6.91 (comm. अन्यो यः कारकस्तस्मिन्नन्यत्कारके स्वस्मादितरस्मिन्धातरि सति); 2 doing different thing, i.e. making mistake अन्यस्य कारकः अन्यत्कारकः PrakriKau. i. 665. 1; SiddhāKau. 217B. 9 (*on* vi. 3. 99); 3 another syntactic relation, i.e. agent राजते रञ्जतेर्वापि रागः करणभावयोः। घञान्यत्कारके भावे नलोपेन नियम्यते SaraKaṇṭhā. 561. 12

अन्यत्कीट (anyat-kīṭa) *m.* other insect सर्वत्र स्कन्नच्छिन्नभिन्नमग्ननष्ट-विपरीतहीनेषु हविःस्यन्दनास्रावितपतितस्फुटितेष्वद्विजश्वानबिडालकाक° ... °सरीसृपादी-नामन्यत्कीटानामृत्विजोऽग्नीनामन्तरागतानाम् ... स्रुचं पूरयित्वा ... तिस्रो जुहुयात् BaudhŚS. iii. 360. 8.

अन्यत्कुलोत्पन्न (anyatkulotpanna)[irr.] *adj.* born in another family श्राद्धे ... एकस्मिन्नेव प्रयोगे ... अन्यत्कुलोत्पन्नानामपि सरीसृपादीनां च तृप्तिः स्यात् CaturCin. iii (1). 12. 6.

अन्यत्कृत (anyat-kṛta) *adj.* (used as noun) 1 (manuscript) made, i.e. written by another लिखितं तावद्विविधं स्वहस्तकृतमन्यत्कृतं च। तत्रान्त्यं साक्षिमत्कार्यम् ViraMi. 520. 9 (*on* 2. 89); 2 humiliated निकृतोऽन्यत्कृतेऽधमे Anekā.(Pa.) 3145.

अन्यत्कृ (anyat-kṛ-) viii·u. to make a mistake, MW.

अन्यत्पक्षिविवर्जित (anyatpakṣi-vivarjita) [irr.] *adj.* devoid of other birds (खगौ) तावादायोड्डयांचक्रे श्येनः ...। चिन्तयन्भक्षणस्थानमन्यत्पक्षिविवर्जितम् SkandP. v (2). 45. 59.

अन्यत्पार्श्वी (anyat-pārśvī) [irr.] *adj.* (*f.*) (used as noun) (evil spirit) being on the other side, i.e. with face downwards (कृत्याम्) अन्यत्पार्श्वी संवेशयति KauśiSū. 39. 16.

अन्यत्प्रविष्ट (anyat-praviṣṭa) *adj.* who had entered by side way अन्यत्प्रविष्टो धन्योऽथ स्वार्चामकथयत्कृती RājTa. (Ka.) 8. 3238.

अन्यथाख्यात्यापत्ति (anyathākhyāty-āpatti) *f.* undesired contingency of invalid knowledge अनिष्टाभेदग्रहस्य निवर्तकत्वे च रजत एव नेदं रजतमिति कृत्वा न निवर्तेत अन्यथान्यथाख्यात्यापत्तेः TattvCin. i. 463. 1; नापसिद्धान्तो नान्यथाख्यात्यापत्तिर्न वा ग्रन्थविरोध इत्यनवद्यम् AdvaiSi. 134. 1; न चाविद्यानिष्ठस्य सत्तादात्म्यस्य घटादौ भाने अन्यथाख्यात्यापत्तिः GuruCandr. i. 9. 7; व्यावहारिकस्य शुक्तिगतनिषेधप्रतियोगित्वे तत्र तस्यैव प्रसक्तेर्वाच्यतया अन्यथाख्यात्यापत्तिः GuruCandr. i. 66. 9; व्यावहारिकरजतस्यैव स्वरूपेण निषेधस्वीकारे भ्रमबाधवैयधिकरण्यादिवारणाय तस्यैव भ्रमे भानस्य वाच्यत्वेऽन्यथाख्यात्यापत्तिरिति दोषोऽपि न LaCandr. 134. 6; व्यक्त्यंशे शक्तेरबाधेनान्यथाख्यात्यापत्तिविरहात् ŚaktiVā. 203. 10; त्वन्मते योग्यताविशिष्टज्ञानस्यैव शाब्दबोधे हेतुत्वादन्यथाख्यात्यापत्तेः BhāṭṭCin. i. 65. 27 (*on* i. 1. 4)

अन्यथाख्यात्यापात (anyathākhyāty-āpāta) *m.* undesired contingency of invalid knowledge बाह्यपुत्रादिसाकल्यवैकल्यधर्मसदृशान्धर्मानात्मनि देहादिविशिष्टेऽध्यस्यति अन्यथा अन्यथाख्यात्यापातात् PrakaVi. 19. 18; शब्दोऽभ्यासार्थक इतीत्यादि निरस्तम्, अभिध्यानादेः प्रागरमार्थसदादौ परमार्थसत्त्वादिप्रतीत्यभ्युपगमे अन्यथाख्यात्यापातात् JñānBiPra. 25. 13.

अन्यथाख्यान (anyathākhyāna) *n.* 1 description in a wrong way, wrong discussion सुसर्वज्ञाश्च किं कुर्युरन्यथा ग्रन्थदेशनम्। अर्थस्य वान्यथाख्यानं प्रमाणं तन्मतं यतः PadmP. (Ra.) 11. 193; 2 invalid knowledge अन्येषां तु ज्ञातस्य रूप्यादेर्बाधासंभवस्योक्तत्वाद् भ्रान्त्यसिद्धेः भ्रान्त्याप्यन्यथाख्यानं न सिध्येत् IṣṭaSi. 121. 7; न चानाकारस्याकारत्वेनान्यथाख्यानम् ŚrutaPra. iB. 37. 20 (*on* i. 1. 1); तथा बाधकस्य ज्ञानस्य बाध्यप्रतिसंबन्धिसापेक्षत्वात् बाध्यस्यान्यथाख्यानस्य सिद्धिः NyāyKu. 47. 10.

अन्यथाख्यानादि (anyathākhyānādi) *adj.* invalid knowledge etc. सत्त्वे सति अन्यथाख्यानादिभिस्तत्तद्वाद्यभिमतैरेव ख्यातिबाधोपपत्तेः ŚrutaPra. iB. 7. 8 (*on* i. 1. 1)

अन्यथाख्यापन (anyathākhyāpana) *n.* 1 act of causing illusion अर्थस्य ... अन्यथाख्यापनस्य ... मायां विना असिद्धेर्वक्ष्यमाणत्वात् IṣṭaSi. 218. 16; 2 act of causing invalid knowledge अन्यथाख्यापनान्यथाभावयोश्च धियः अर्थान्यथाभावनिरासेनैव निरस्तत्वात् IṣṭaSi. 235. 17; ब्रूह्यन्यथात्वं बुद्धेः किमन्यथाख्यापनं न चेत् IṣṭaSi. 288. 2.

अन्यथाख्यापिका (anyathā-khyāpikā) *adj.* (*f.*) which causes invalid knowledge अतोऽन्यथाख्यापिका धीर्नान्यथाख्यातिरिष्यते IṣṭaSi. 287. 3.

अन्यथागण (anyathā-gaṇa) *m.* different group न चाहरुपहितोऽन्यथागणो द्वादशाहः MayūMāli. 555. 20 (*on* viii. 1. 10)

[1]**अन्यथागति** (anyathā-gati) *f.* 1 another way or alternative अन्यथागत्यसंभवाद्विकल्प इति मन्यते TantrVā. 283. 23 (*on* i. 4. 1); मायाश्रयचिन्मात्रयुते तथोपचारः। न पुनस्तदुपाधियोगतोऽन्तःकरणस्येति समान्यथागतिर्हि ŚaṅkaDigVi. (Mā.) 15. 101; 2 act of going elsewhere निरुद्धोक्तिः सहस्थानं वैयर्थ्यं चान्यथागतिः। युक्तयः पूर्वपक्षस्य AnuVyā. 38A. 4 (*on* 3. 1)

[2]**अन्यथागति** (anyathāgati) *f.* absence of means otherwise क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे। इति श्रुतिपुराणादिवचनेभ्योऽन्यथागतेः AnuVyā. 52A. 10 (*on* 3. 3)

अन्यथागम (anyathāgama) *m.* scripture which is other than the Vedic one मद्याद्यैर्गर्हितैर्यत्र संकरः शिवयोगिनाम्। नृपराष्ट्रभयं तत्र कारणं चान्यथागमः ... अन्यथागमस्त्रयीबाह्यः शैवाद्यागमः DaṇḍaVi. 271. 13.

अन्यथागोत्र (anyathā-gotra) *adj.* of different descent or family. ये केचन समानगोत्रा अव्यवेता अन्यथागोत्राः स्युरेकस्यार्षेयश्च वरण एव तेषां वरणं स्यात् BaudhŚS. iii. 163. 8.

अन्यथाग्रह (anyathā-graha) *m.* 1 illusion अध्यासो नाम खल्वेष वस्तुनो योऽन्यथाग्रहः SarvaVeSāSaṁ. 497; चक्षुरादिदोषान्तराद्रूप्ये अन्यथाग्रहो न केवलात् सदृशार्थग्रहात् इति चेत् सोऽस्तु दोषान्तरादेव तस्यैव भ्रमान्वयात् IṣṭaSi. 281. 3; 2 act of grasping, i.e. knowing otherwise, invalid knowledge or erroneous knowledge किं त्वेतदिति जिज्ञासोर्निषिद्धेऽप्यन्यथाग्रहे। तावतो व्यवधानत्वाद् बुभुत्सा च न युज्यते BṛĀraUBhVā. i. 4. 466; वाक्यप्रवृत्तेस्तुल्यत्वान्न युक्तोऽत्रान्यथाग्रहः BṛĀraUBhVā. ii. 3. 61; ii. 4. 317; अल्पत्वाग्रहणं नाम न प्राचुर्यग्रहणम् अपि त्वल्पत्वविषयज्ञानसंकोच इति अन्यथाग्रहाभावात् ŚrutaPra. iB. 33. 30 (*on* i. 1. 1)

अन्यथाग्रहण (anyathā-grahaṇa) *n.* 1 acceptance otherwise यथाश्रुतादन्यथाग्रहणं निष्प्रमाणकम् TantrVā. 47. 5 (*on* i. 2. 29); 2 act of grasping, i.e. knowing otherwise, invalid knowledge or erroneous knowledge अस्माद्यदपरं रूपं नास्तीत्येव निरूप्यते। अन्यथाग्रहणाभावाद्बीजं तत्स्वप्नबोधयोः NaiṣkaSi. 192. 3; अन्यथाग्रहणवदन्यथाग्रहणबीजमग्रहणमनात्मधर्म एवेत्याह NaiṣkaSi. 193. 8; तत्पदार्थेन संसृज्यमानस्त्वंपदार्थः पराकृत्यैव निर्लेपमनर्थहेतुमग्रहणमन्यथाग्रहणं च तथा निश्चीयते PañcPā. 38. 7 (*on* i. 1. 0); बाह्यं चेद्वस्तु स्याद् यथाव्यवस्थितमेव ग्रहीतव्यम्, अन्यथाग्रहणे न किंचित् कारणम् NyāyRa. 327. 9 (*on* 5 (3). 207); अद्वैतस्य वस्तुनोऽन्यथाग्रहणं नाम द्वैतरूपेण प्रतिभासः JīvanVi. 112. 1; अन्यथाग्रहणरूपभ्रमादिज्ञानसद्भावात् तन्निरासार्थं तत्त्वपदम् MānaMe. 5.5;

3 illusion पूर्वत्र मोहो मृत्युः संमतो यः इत्यनेनाग्रहणान्यथाग्रहणात्मिका अविद्योक्ता SanatBh. 193.5 (*on* 1.7); 4 wrong interpretation अन्यथाग्रहणनिग्रहदक्षं भाष्यमस्य भगवन् करणीयम् ŚaṅkaDigVi. (Mā.) 5. 156.

अन्यथाग्राहिन् (anyathā-grāhin) *adj.* which grasps, i.e. refers to otherwise, invalid यद्ययमन्यथाग्राही प्रत्ययः स्यात् कथं न विपर्येति Bṛha. 55. 2 (*on* i. 1. 5)

अन्यथाग्राह्यत्व (anyathāgrāhya-tva) *n.* the state of being known by another means (than itself), i.e. extraneously प्रामाण्यस्य स्वग्राह्यत्वे बाधात्परिशेषेणान्यथाग्राह्यत्वं परतो ग्राह्यत्वमिति कश्चित् TattvCin. i. 246. 1.

अन्यथाङ्गीकार (anyathāṅgīkāra) *m.* acceptance in another way एतद्दोषपरिहारायान्यथाङ्गीकारे कार्यं सति हेतौ उत्पद्यते इत्यङ्गीकारे यौगपद्यं स्यात् VedāntKau. 195. 15 (*on* ii. 2. 21)

अन्यथाचर (anyathā-cara) *adj.* moving in opposite way समीरणः श्रोत्रगतोऽन्यथाचरः समन्ततः शूलमतीव कर्णयोः। करोति SuśruS. vi. 20. 6 (comm. विमार्गगः)

अन्यथाचरत् (anyathā-carat) *adj.* moving in opposite way समीरणः श्रोत्रगतोऽन्यथाचरन् समन्ततः शूलमतीव कर्णयोः। करोति RugVi. 57. 1 (comm. प्रतिलोमं चरन्)

अन्यथाचार (anyathācāra) *adj.* [*f.*-ā] 1 behaving in wrong, i.e. sinful way नैर्गुण्येन च संयुक्ता भ्रष्टलोकपरावराः। असत्स्त्रियोऽन्यथाचारा ह्यनिष्टं लोकमासते Rāmā. ii. 2374*(2); 2 (used as noun) (one) who transgresses (rule) शासनादन्यथाचारान् विनेष्यामि यमालयम् ŚukraNī. 4 (7). 389.

अन्यथाचार (anyathācāra) *m.* wrong behaviour तदेवं ज्ञात्वा स्वरूपानुसंधानं विनान्यथाचारपरो न भवेत् NāraPaU. 5. 1.

अन्यथाचेष्टित (anyathā-ceṣṭita) *n.* activity in different manner व्याजलज्जादयो विभावाः। अनुभावा अन्यथाचेष्टितान्यथाव्यवहारादयः RasTa. 138.6.

अन्यथाजात (anyathā-jāta) *adj.* 1 appeared in opposite way, i.e. doubtful नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम्। किंचित्तदन्यथाजातं त्रेतायां द्वापरे BrahmSūBh. (Ma.) 1A. 5 (*on* 1.1); (स्कान्दे ... किंचित्तदन्यथाजातम्) अन्यथाजातमिदमदो वेति संदिग्धम् TattvPrakā. 3A. 3 (*on* i. 1. 1); 2 taken wrongly, mistaken अन्यथाजातम् ... अन्यदेवेति मिथ्यादृष्टिदु(दृ)ष्टं च TattvPrakā. 3A. 3 (*on* i. 1. 1)

अन्यथाजातीय (anyathā-jātīya) *adj.* of different kind अङ्गत्वाविशेषेऽपि सत्यन्यथाजातीयोऽन्यस्याङ्गस्योपकारोऽन्यथाजातीयोऽन्यस्य ŚābaBh. 2152. 13 (*on* xi. 2. 45)

अन्यथाजातीयक (anyathājātīya-ka) *adj.* 1 belonging to one kind अन्यथाजातीयकेन शब्देन निर्देशः क्रियते MahāBh. i. 171. 21 (*on* i. 1. 66); 2 belonging to another kind अन्यथाजातीयकेन शब्देन निर्देशः क्रियतेऽन्यथाजातीयक उदाह्रियते MahāBh. i. 171. 21 (*on* i. 1. 66); अन्यथाजातीयकः खल्वपि प्रत्यक्षेणार्थसंप्रत्ययोऽन्यथाजातीयकः संबन्धात् MahāBh. i. 384. 6 (*on* ii. 1. 24); ii. 393. 4 (*on* v. 2. 94)

अन्यथाज्ञात (anyathā-jñāta) *adj.* (used as noun) (that) which is known otherwise or erroneously न च - संदिग्धस्यैव साध्यत्वम्, अन्यथाज्ञातस्य अज्ञातत्वभावाभ्युपगमात् TarkSaṁ. (Ā.) 94. 21; तत्किमन्यथाज्ञातस्य सम्यग्ज्ञातत्वं प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं वा Vādā. 13. 3.

अन्यथाज्ञान (anyathā-jñāna) *n.* 1 knolwedge otherwise, invalid knowledge or erroneous knowledge अन्यथाज्ञानसंदेहविपर्यासानुषङ्गिणि। पुंसि कर्तरि नैवास्य प्रामाण्यं स्यात्तदन्यवत् TattvSaṁ. 3126; अज्ञानं चान्यथाज्ञानं मायामेतां वदन्ति ते SadācāAnu. 40; संसरत्यन्यथाज्ञानात्सम्यग्ज्ञानाद्विमुच्यते BṛĀraUBhVā. ii. 4. 260; अज्ञानमन्यथाज्ञानं संशयज्ञानमेव च। घटादावेव तद्दृष्टं न ज्ञातृज्ञानसाक्षिषु TaiUBhāVā. 176. 13 (2); अज्ञानं नाम स्वरूपाज्ञानमन्यथाज्ञानं विपरीतज्ञानं वा BrahmSūBh. (Rā.) 52. 8 (*on* i. 1. 1); न अन्यथाज्ञानमज्ञानम् NītiMā. 21. 7; अन्यथाज्ञानं तु पुरुषस्य तात्पर्याज्ञानात् PrakaVi. 411. 24; अज्ञानं समक्षदर्शनश्रवणसमय एवान्यथाज्ञानम् SmṛtiCan. iii. 216. 3; धर्मैक्ये सति प्रकारान्तरारोपणेन ज्ञानमन्यथाज्ञानम्, यथा पीतः शङ्ख इति ŚrutaPra. iA. 171. 23 (*on* i. 1. 1); अन्यथाज्ञानविपरीतज्ञानहेतुभूतरजस्तमोमूलत्वाभावाद्दुष्टकारणपुराणान्तरसाम्यं न संभावनीयम् ŚrutaPra. iA. 227. 18 (*on* i. 1. 1); iA. 231. 6 (*on* i. 1. 1); अन्यथाज्ञानं वस्तुनो वस्त्वन्तरतया भासनम् NyāyPari. 56. 8; अन्यथाज्ञानं निन्दन्ती श्रुतिः कथं फलसाधकत्वेन तदुपासनां वदेत् AṇuBh. 207. 22 (*on* iii. 3. 1); अविद्या अनवधारणम् अन्यथाज्ञानं वा VīraMi. (Saṁskāra.) 323. 13; यथावस्थितपदेन संशयान्यथाज्ञानविपरीतज्ञानव्यावृत्तिः YatīndraDī. 3. 18; अन्यथाज्ञानं नाम धर्मविपर्यासः YatīndraDī. 3. 20; 2 illusion शिष्यस्य च व्यवहारविशेषादिभिरन्यथाज्ञानादिकमनुमाय तस्मै तत्त्वमुपदिश्यते ŚatDū. 110. 5; 3 knowledge (produced) from another means अन्यथाज्ञानं नोपनिषदुक्तं फलं समर्पयति AṇuBh. 2. 23 (*on* i. 1. 1)

अन्यथाज्ञानजनन (anyathājñāna-janana) *n.* production of invalid knowledge न चादृष्टभेदात्कार्यभेदः ... कार्यभेदस्य च विप्रतिपन्नत्वात्। दोषसहकृतादिन्द्रियादेवान्यथाज्ञानजननमित्यप्यसत् NyāySu. (Ja.) 43A. 10 (*on* i. 1. 1)

अन्यथाज्ञानवाचकत्व (anyathājñānavācaka-tva) *n.* the state of being expressive of invalid knowledge व्यामोहशब्दस्यान्यथाज्ञानवाचकत्वेनासामर्थ्यावाचकत्वात् AṇuBh. 337. 9 (*on* iv. 3. 6)

अन्यथाज्ञानहेतु (anyathājñāna-hetu) *m.* cause of invalid knowledge सर्वमेतत्समञ्जसं कर्तृत्वाद्यन्यथाज्ञानहेतुत्वादात्मरूपिणः BṛĀraUBhVā. i. 4. 379; तात्त्विकार्थनिर्धारणशक्तस्यापि कदाचिदन्यथाज्ञानहेतुभूतमनवधानं हि प्रमादः ŚivārkaMaDī. i. 157. 30 (*on* i. 1. 3)

अन्यथात्मक (anyathātma-ka) *adj.* of the nature of being other (than itself) शङ्क्येतायं तथा वेदो न ग्रन्थार्थान्यथात्मकः। अन्यथेच्छाप्रवृत्तौ तु नाशङ्का विनिवर्तते TattvSaṁ. 2675.

अन्यथात्व (anyathā-tva) *n.* 1 the state of being different, difference [Inst.] by way of difference 2A (change for the worse) depression, distrees, disturbed (mental) state B the state of being changed or transformed C the state of being altered, alteration 3 the state of being opposite or contrary, contrariness 4A [Inst.] by way of being wrong (assumption) B the state of being invalid (knowledge), invalidity C illusoriness 5 the state of being of various kinds or types, variation 6Ai the state of being otherwise ii the state of being otherwise, i.e. uselessness B the state of being other (than itself) 1 the state of being different, difference एके वृक्षे च संपश्येन्नानात्वं फलपुष्पयोः। व्यत्यासमन्यथात्वं वा परचक्रागमो भवेत् AVPari. 70B (4). 5; नास्यान्यथात्वं प्रति विक्रिया मे BuddhaC. 1. 68; अन्यथात्वं शब्दादिति चेन्नाविशेषात् BrahmSū. iii. 3. 6; यत्पुनरेतद्विप्रतिपत्तौ संप्रतिपत्तेरिति न संज्ञान्यथात्वादर्थस्यान्यथात्वम् NyāyVār. 187. 12 (*on* ii. 1. 6); 557. 1 (*on* v. 2. 1); अन्यथात्वं यदीष्येत हेतोरपि फलात्मनः NyāyVi. 2. 266; न हीन्द्रियविषयसंबन्धादेर्व्यवहारस्य प्रतिसर्गमन्यथात्वं षष्ठेन्द्रियविषयकल्पं शक्यमुत्प्रेक्षितुम् BrahmSūBh. (Śaṅ.) 201. 2 (*on* i. 3. 30); तदपेक्षमन्यथात्वं कूटस्थस्याप्यस्ति IṣṭaSi. 231. 11; भूतोऽप्यर्थः साक्षिणां चित्तवैचित्र्यादन्यथात्वमायाति ManuBh. ii. 4. 9 (*on* 7. 12); परिकरसाम्ये सत्यपि परिकार्यस्यान्यथात्वादेकपरिकार्यः KāvyMī. 70. 25; शब्दालंकारस्यार्थालंकारेणान्यथात्वं धातुवादः KāvyMī. 76. 12; तेषां देशकालान्तरवशेनान्यथात्वेऽपि तथात्वेनोपनिबन्धो यः स कविसमयः KāvyMī. 78. 21; काले करणेतिकर्तव्यते ततोऽन्यथात्वात् 'तयो'रेव 'करणेतिकर्तव्यतात्व'मेव' न स्यात् TantrRa. 249. 6; Kāsi. ii. 49. 13 (*on* 5(2). 24); तदेतत्त्रितयमपि क्रमकालपरिमाणात्मकमाचमनादिभिरन्यथात्वमापद्यते ŚāstrDī. 28. 12 (*on* i. 3. 4); बलवता कारणान्तरेणान्यथात्वं प्रतिपद्यते ŚāstrDī. 124. 3 (*on* ii. 2. 2); 146. 3 (*on* ii. 2. 8); रूपान्यथात्वं हि शब्दादेव प्रतीयते BrahmSūBh. (Rā.) 619. 4 (*on* iii. 3. 6); तुलाग्रस्यान्यथात्वं – नामोन्नामलक्षणम् इत्यर्थः Pradī. iv. 298A. 23 (*on* v. 1. 119); हेतुफलयोर्यौ देशकालौ प्रसिद्धौ तयोरन्यथात्वमसंगतिः AlaṅkāRa. 55 (1); अन्यथात्वं विद्यैक्यात्स्वीकृतादन्यथात्वं तन्नानात्वमस्ति VedāntKau. 303. 2 (*on* iii. 3. 6); क्वचिदंशे गुणदोषसंभावनया दृष्टमन्यथात्वम् NyāyPari. 352. 5; TattvMu. 4. 32; य एव लौकिकास्त एव वैदिका इति न्यायात्। क्वचित् प्रयोगवशादन्यथात्वम् PrakriKau. ii. 700. 3; वैदिकानां शब्दानामन्यथात्वं बहुषु स्थलेषु दृश्यते Prasā. ii. 700. 13; आचारस्य त्ववाक्यात्मकत्वेनान्यथात्वस्यापि कल्पयितुमशक्यत्वात् MīmāKau. i. 61. 3 (*on* i. 3. 9); [Inst.] by way of difference नान्यथात्वेन तत्र भ्रमितव्यम् SiddhāTaVi. 72. 1; 2A (change for the worse) depression, distress, disturbed (mental) state यदि एकेन द्वारेण प्रविशामि, अपरेषां भवति अन्यथात्वम् Divyāva. 30. 17; 31. 15 [DBHS.]; 2B the state of being changed or transformed अद्य श्वो वा मरणमशिवं प्राणिनां कालपाशैराकृष्टानां जगति भवतो नान्यथात्वं कदाचित् VijñāŚ. 34; परिणामो हि नामान्यथात्वम् MaYānaSū. 150. 23; कोऽयं परिणामो नाम। संततेरन्यथात्वम् AbhidhKoBh. 64. 5 (*on* 2. 36); तदेकस्य चित्तस्य प्रतिक्षणमिदं संस्कारान्यथात्वं निरोधपरिणामः YogBh. 124. 4 (*on* 3. 9); यद्यान्यथात्वं द्विज याति भूयो न तत्तथा तत्र कुतो हि तत्त्वम् ViṣṇuP. ii. 12. 41; कालानुरोधेन पदार्थो नान्यथात्वमभ्युपगच्छेत् ŚābaBh. 200. 1 (*on* i. 3. 7); ते खल्वपि संयोगादिविशेषैरन्यथात्वं प्रतिपद्यन्ते AṣṭāSaṁ. i. 64. 12 (1. 10); दोषैः स दिग्विभागाद्यैस्त्वन्यथात्वं न याति PāraS. 10. 307; विभिन्नानां च काण्डानां भङ्गादेकतरस्य च। उत्पद्यतेऽन्यथात्वम् PāraS. 12. 548; विक्रियायाश्च सद्भावे नित्यत्वमवहीयते। अन्यथात्वं विकारो हि

तावदस्थ्ये च तत्कथम् TattvSaṁ. 295; स्वाभाविकाज्ञानासङ्गप्रयुक्तेन कर्मणा मृत्युना प्रतिक्षणमन्यथात्वमापद्यमानं वशीकृतम् BṛĀraUBh. 358. 15 (*on* iii. 1. 4); अन्यथात्वे हि न कारणाधीनं भावानां रूपम् NyāyMañ. ii. 27. 2; सोऽयमुत्पत्तिप्रभृति किंचित् किंचिदन्यथात्वमन्तरेण नोपपद्यते ŚāstrDī. 144. 10 (*on* i. 1. 6); अन्यथात्वे महादोषा वैपरीत्ये कुलक्षयः SamarāSū. 51. 23; क्रियते ये तु नियतेरन्यथात्वं सनायताम् RājTa. (Ka.) 8. 1470; 7. 791; रूपभेदा(द)न्यथा(त्व)स्य प्रतीतेः उभयत्रापि (वि)शेषात् TarkSaṁ. (Ā.) 39. 15; एकद्रव्यस्य सर्वात्मनान्यथात्वं कार्त्स्न्यम्। सर्वस्यानेकद्रव्यस्यान्यथात्वमभिविधिः PrakriKau. i. 950. 4 (*on* v. 4. 53); आनर्थक्यप्रतिहतानां विपरीतं बलाबलम् इति न्यायेन विधेरेवान्यथात्वमाश्रयणीयम् VīraMi. (Saṁskāra.) 603.1; **2C** the state of being altered, alteration आकारो विकारः। स्वाभाविकानां हि स्वरादीनामन्यथात्वम् ManuBh. ii. 83. 21 (*on* 8. 25), वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् ... रचनावृत्तिवर्णानामन्यथात्वमपीष्यते KāvPra. 487. 8; Kāvyānu. (He.) 244. 13; 245.14; AlaṅkāŚe. 22. 2; **3** the state of being opposite or contrary, contrariness दृढं व्यवस्थितायाः कथमन्यथात्वम् BrahmSi. 9. 25; प्रायूपादन्यथात्वं स्यान्नित्यतास्य विरुध्यते ŚlokaVār. 5 (17). 21 (694. 2); स च ... विज्ञाताश्रयप्रमाणपरिमाणः सन्नन्यथात्वम् ... प्रतिपाद्येत TantrVā. 120. 1 (*on* i. 3. 6); दोषाणामयथार्थज्ञानहेतुत्वात्तज्ज्ञानादन्यथात्वमर्थस्य TātpaṬ. (U.) 59. 8 (*on* 2. 58); शास्त्रम् ... मन्त्रेषु प्रमाणान्तरप्रमितार्थेषु तत्त्वमन्यथात्वं वार्थस्यान्यतोऽवधारयितुं शक्यते PrakaPañ. 256. 2; त्रीन् पक्षानन्यथात्वेऽस्य, मासषट्केन पश्चता। पक्षद्वयं विपर्यासेऽभीष्टबन्धुवियद्भवेत् YogŚā. 5. 70; सौम्यैरष्टमसंस्थैर्द्वितीयसंस्थैस्तथैव दीर्घायुः। भवति प्रष्टुर्नित्यं तदन्यथात्वेऽन्यथात्वं स्यात् DaivaVa. 14. 3; न च ज्ञानाज्ञानयोरपि मिथ्याकल्पितत्वं दृष्टम्। तद्विषयस्यैवान्यथात्वं भ्रान्तौ ViṣṇuTaNi. 15A. 11; प्रमितत्वे प्रमाभङ्गान्निषेधस्तस्य नेष्यते। अन्यथात्वे तदप्राप्तेर्निषेद्धुं नैव शक्यते TarkSaṁ. (Ā.) 130. 20; प्रतिपत्तौ वा व्यवहारोदयेऽपि वा। तथाभावान्यथात्वाभ्यां प्रमाप्रामाण्यव्यवस्थितिः NyāyPari. 39. 4; स्वरूपाणामन्यथात्वमग्रहत्वं स्यादित्यर्थः AṇuBh. 215. 15 (*on* iii. 3. 6); अवयवरूपके विवर्तनात्तत्स्वरूपगोपनेनान्यथात्वेन वर्तनादेकदेशविवर्ति RasGaṅ. 306. 8; यावानंशो बाधितस्तावानेवान्यथात्वेन पर्यवस्यति RasGaṅ. 558. 16; भैषज्यं तु यथाकामं पथ्यं तु कठिनं वदेत्। आरोग्यं वैद्यमाहात्म्यादन्यथात्वमपथ्यतः KaliViḍ. 25; **4A** [Inst.] by way of being wrong (assumption) स्तोकेनाप्यन्यथात्वेन शास्त्रार्थो निष्फलो भवेत् TantrVā. 147. 9 (*on* i. 3. 8); **4B** the state of being invalid (knowledge), invalidity अन्यथात्वं पुनरस्य बलवद्बाधकप्रत्ययवशात् Bhām. 13. 23 (*on* i. 1. 0); 'यद्यथा प्रतिभासते तत्तथैव' इत्यौत्सर्गिकान्यथात्वं (इत्यौत्सर्गिकम्। अन्यथात्वं?) तु बलवद्बाधकप्रत्ययोपनिपातात् NyāyMa. 99. 5; अन्यथात्वमसत्तस्मादभ्रान्तावेव प्रतीयते AnuVyā. 2B. 1 (*on* 1. 1); प्रत्यक्षस्य हि दूरे मन्दग्राहित्वं परिमाणादावन्यथात्वं च ततो बलवत्प्रत्यक्षेणैव निश्चितम् ViṣṇuTaNi. 16B. 2; नापि फलेऽन्यथात्वम् VivaPraSaṁ. 40. 2; अन्यथात्वं हि वैपरीत्यमपीष्यते NyāyPari. 39. 6; उपधेरन्यथात्वं भ्रमांशे TattvMu. 4. 103; नान्यथात्वं वास्तुविद्यायाः सर्वज्ञभाषितत्वात् KumāDeCa. (So.). 42. 35; अर्थस्य शुक्तिरजतादेर्विसंवादादन्यथात्वात्तज्ज्ञानितस्येदं रजतम् BālamBha. ii. 89. 8 (*on* 2. 80); **4C** illusoriness कालत्रो भागद्वयस्यान्यथात्वं युक्तम् TattvPrakā. 3A. 4 (*on* i. 1. 0); यदन्यथात्वं शुक्तिकेदमंशस्य रजतत्वसंसर्गो रजतस्येदंतासंसर्गस्तत्तद्वदसदेव NyāySu. (Ja.) 58B. 8 (*on* i. 1. 1); **5** the state of being of various kinds or types, variation ननु चान्यथात्वं विद्यायाः BrahmSū. (Bhā.) 176. 27 (*on* iii. 3. 6); न तस्यात्मवदन्यथात्वं कारणैः शक्यं कर्तुम् Bhām. 105. 6 (*on* i. 1. 4); ब्रह्मणोऽन्यथात्वाद्विनाशप्रसङ्गः TātpaṬ. (Vā.) 239. 4 (*on* i. 1. 22); अन्यथात्वं विद्याभेद इति व्याख्यातम्, तदयुक्तम् ŚrutaPra. ii. 469. 21 (*on* iii. 3. 9); **6Ai** the state of being otherwise मातुस्तु शैशवाद्बाल्येनान्यथात्वम् ManuBh. i. 143. 8 (*on* 2. 133); पूर्वोक्तयोरप्रमादयोरन्यथात्वे दोषमाह ManuBh. ii. 42. 3 (*on* 7. 143); विनिपातोऽन्यथात्वं प्रत्यनन्तरस्य देशान्तरे गमनादि ManuBh. ii. 163. 14 (*on* 8. 185); यत्समारोपितं रूपमन्यथात्वमिति यावत् तत्प्रतिषिध्यते TātpaṬ. (Vā.)36. 19 (*on* i. 1. 1); बाधकादन्यथात्वमिति चेन्न। तदनिरूपणात् PramāMā. 1. 19; **6Aii** the state of being otherwise, i.e. uselessness आत्मेत्येवोपासीतेतिशब्दादुपसंहारस्यान्यथात्वमिति चेन्न BrahmSūBh. (Ma.) 53B. 2 (*on* iii. 3. 7); **6B** the state of being other than (itself) त्रयो गुणास्त्रैगुण्यं तस्य विपर्ययः अन्यथात्वम् SāṁkhyaTaKau. 320. 2 (*on* 18)

अन्यथात्वकरण (anyathātva-karaṇa) *n.* **1** act of altering, alteration तदा वेदपाठादेरन्यथात्वकरणाशक्तिः पुंसः सिध्येत् TattvSaṁPañ. 715. 4 (*on* 2675); पाद एवान्यथात्वकरणं न स्वीकरणं पादोनहरणं वा KāvyMī. 59. 16; **2** act of causing the contrariness दुष्करमभिशापवरदानादि अन्यथात्वकरणम्। यथा संवर्तस्यान्यदेवतासृष्टिः ManuBh. ii. 445. 15 (*on* 2. 237)

अन्यथात्वकल्पन (anyathātva-kalpana) *n.* **1** assumption of the state of being contrary or opposite आप्तप्रत्ययमात्रेण श्रोतृणां प्रमाणानि भवन्ति तेषां नैवान्यथात्वकल्पनं लभ्यते TantrVā. 11. 5 (*on* i. 2. 7); हेतुविधिपक्षे तु प्रमाणान्तरसिद्धार्थानुवादकत्वाभावाद्यथाश्रुतादीपदप्यन्यथात्वकल्पनं दोष एव MīmāKau. iii. 54. 13 (*on* i. 2. 29); **2** assumption of the state of being invalid लौकिकवाक्ये तु प्रमाणं प्रत्यक्षादेरन्यथात्वकल्पनम् NyāySu. (So.) 4. 33 (*on* i. 2. 1); **3** assumption of the state of being otherwise किं च पर्यायप्रयोगस्यान्यथात्वकल्पनं क्वचिदपर्यायप्रयोगे सति स्यात् NyāySu. (Ja.) 168B. 8 (*on* i. 2. 6); शब्दबलविचार एव मुख्यः। न तु प्रातीतिकविरोधादन्यथात्वकल्पनम् AṇuBh. 72. 9 (*on* i. 2. 32)

अन्यथात्वग्रहण (anyathātva-grahaṇa) *n.* comprehension of the state of being contrary or opposite 'नेदं रजत'मिति बाधकप्रत्ययेनान्यथात्वग्रहणादप्रामाण्यम् TātpaṬ. (U.) 219. 21 (*on* 5 (2). 108)

अन्यथात्वद्योतन (anyathātva-dyotana) *n.* indication of the state of being different पूर्वप्रक्रान्तस्य वाक्यार्थस्यान्यथात्वद्योतनायाकारः प्रयुज्यते Pradī. i. 275B. 15 (*on* i. 1. 14); PadMañ. *on* KāśiVṛ. *on* P. i. 1. 14 (113. 13)

अन्यथात्वधी (anyathātva-dhī) *f.* notion of the state of being contrary or opposite यद्यथा वर्तते तस्य तत्त्वं हित्वान्यथात्वधीः। विपरीता भावना स्यात् PañcDa. 7. 110.

अन्यथात्वपरिग्रह (anyathātva-parigraha) *m.* acceptance of the state of being contrary or opposite पुंवाक्येऽप्यन्यथोक्तव्यं यावन्नान्येन गम्यते। तावद्यथाश्रुतं मुक्त्वा नान्यथात्वपरिग्रहः TantrVā. 715. 12 (*on* iii. 1. 13)

अन्यथात्वप्रकाशन (anyathātva-prakāśana) *n.* manifestation of the state of being contrary or opposiate आरूपालोचितेष्वस्ति ह्यन्यथात्वप्रकाशनम् SphoṭSi. 139.2.

अन्यथात्वप्रतिपत्ति (anyathātva-pratipatti) *f.* knowledge of difference आमुखग्रहणं पर्यवसानेऽन्यथात्वप्रतिपत्त्यर्थम् AlaṅkāSa. 17. 2.

अन्यथात्वप्रत्यय (anyathātva-pratyaya) *m.* knowledge of alteration न चायं वर्णविषयोऽन्यथात्वप्रत्ययो मिथ्याज्ञानम्, बाधकप्रत्ययाभावात् BrahmSūBh. (Śaṅ.) 192. 17 (*on* i. 3. 28); उदात्तानुदात्तादिभावेन यो वर्णेष्वन्यथात्वप्रत्ययः स विभ्रमः PrakaVi. 277. 12.

अन्यथात्वप्रथा (anyathātva-prathā) *f.* knowledge of the state of being different न च शब्दस्य क्षणिकत्वं, तत्साधकाभावात्। प्रत्युच्चारणम् अन्यथात्वप्रथा तु व्यञ्जकभेदात् उत्प(उपप?)द्यते TarkSaṁ. (Ā.) 119. 17.

अन्यथात्वभान (anyathātva-bhāna) *n.* knowledge of the state of being different न तु धीद्वये वेद्यनिरन्तरतान्यथात्वभानम् NayaVi. 91. 4 (*on* i.15)

अन्यथात्वभी (anyathātva-bhī) *f.* **1** fear of the state of being invalid इति ब्रह्माण्डपुराणमसंगतं स्यात् इति चेत्, नूनं सामन्तादपि सार्वभौमो बिभेति येन एतदन्यथात्वभिया श्रुतिमन्यथयितुं प्रवृत्तोऽसि VīraMi. (Tīrtha.) 60. 15; **2** fear of the state of being other न हि स्मृतेरन्यथात्वभिया श्रुतेरन्यथात्वं वर्णयितुमुचितम् VīraMi. (Tīrtha.) 315. 7.

अन्यथात्वभ्रम (anyathātva-bhrama) *m.* illusion of the state of being different व्यवहारोऽपि ... चतुरब्धिमेखलायामवनौ प्रसिद्ध इति कोऽयमत्रान्यथात्वभ्रमः NyāyMañ. i. 232. 23.

अन्यथात्वविवर्जितम् (anyathātvavivarjitam) *adv.* without change एतद्धेतुरूपे सर्वमन्यथात्वविवर्जितम्। ततस्ते विद्यते शान्तिः PadmP. (Ra.) 34.90.

अन्यथात्वविषया (anyathātva-viṣayā) *adj.* (*f.*) referring to the state of being contrary or opposite मिथ्यात्वेऽन्यथात्वविषयैव या धीः ... सा कारणं दुष्टकारणविषया वा Kāśi. i. 105. 25 (*on* 2. 86)

अन्यथात्वशङ्का (anyathātva-śaṅkā) *f.* **1** doubt regarding the state of being contrary or opposite न चाधारोऽस्य नियतो घृतादावपि दर्शनात्। तत्रान्यथात्वशङ्का च प्रागेव विनिवारिता TarkSaṁ. (Ā.) 115. 25; प्रमाणेन साध्यमानस्यार्थस्य अन्यथात्वशङ्कायां तन्निरासार्थमन्यथात्वे दोषकथनं तर्कः MānaMe. 35. 2; वाक्यं प्रयुक्तमिति यावन्नानुमीयते तावदन्यथात्वशङ्का न निवर्तते MānaMe. 103. 7; **2** doubt regarding being wrong समस्तश्रुतिसमन्वयो यः प्रथमाध्यायेऽभिहितः तस्य सांख्यादिसमयविरोधेनान्यथात्वशङ्कायां तन्निराकरणार्थमयं द्वितीयः पाद आरभ्यते NyāySu. (Ja.) 313B. 2 (*on* ii. 2. 1)

अन्यथात्वहेतु (anyathātva-hetu) *m.* cause of the state of being contrary or opposite तत्प्रतीतिर्भ्रान्तिरस्तु न स्वप्नप्रतीतिरिति भावः। तत्कृता अन्यथात्वहेतुकृता। ईश्वरकृतेति वा TattvPrakā. 150B. 2 (*on* iii. 2. 3)

अन्यथात्वातिरेकतस् (anyathātvātireka-tas) *adv.* due to the distinction of being different परिणामिनः ... विक्रियावदपि द्रव्यम् ... नित्यमेवेति चेन्नैवमन्यथात्वातिरेकतः BṛĀraUBhVā. i. 4. 591.

अन्यथात्वाधिकरण (anyathātvādhikaraṇa) *n.* section dealing with the difference (of Udgīthas) अन्यथात्वाधिकरणम्। अन्यथात्वं शब्दादिति चेन्नाविशेषात् VedāntSā. (Rā.) 288. 4 (*on* iii. 3. 6)

अन्यथात्वानुपपत्ति (anyathātvānupapatti) *f.* untenability of any change सत्क्रियाकताव्यतिरेकेण प्रकृत्युपधानेऽप्यन्यथात्वानुपपत्तेः SyādvāMañ. 15 (92)

अन्यथात्वापत्ति (anyathātvāpatti) *f.* undesired contingency of the state of being contrary or opposite नञो निपातत्वेन क्रियान्वयनैयत्याभावात्क्रियान्वयाङ्गीकारे च प्रधानभूतायास्तस्या एवान्यथात्वापत्तेः BhāṭṭDī. ii. 243. 5 (*on* vi. 2. 5)

अन्यथात्वापादक (anyathātvāpādaka) *adj.* causing change यद्विघ्युद्देशजन्यं ज्ञानं तदेवार्थवादस्यान्यथात्वापादकं वाच्यम् MayūMāli. 232. 20 (*on* iii. 3. 1)

अन्यथात्वापादन (anyathātvāpādana) *n.* facilitating cause of the state of being contrary or opposite न ... असंहतपरार्थत्वस्यान्यथात्वापादनादुभयविशेषविरुद्धत्वं हेतोः अहंकारान्वयव्यतिरेकानुविधानेन देवा वैकारिकाः स्मृताः ĀtmaSi. 38. 18.

अन्यथात्वाभाव (anyathātvābhāva) *m.* 1 absence of being of various kind एकरूपवस्तुविषयत्वेन पुरुषभेदेऽपि विद्यायाः अन्यथात्वाभावान्नास्ति तत्फले कश्चिदतिशयनियमः PrakaVi. 997. 19; 2 absence of alteration or modification मूलग्रन्थान्यथाकरणं तु युक्त्यनुरोधेन न दोषः। सिद्धान्तेऽन्यथात्वाभावादिति ध्येयम् BhāṭṭDī. ii. 8. 14 (*on* iii. 5. 6)

अन्यथात्वायोग (anyathātvāyoga) *m.* untenability of the state of being contrary or opposite न हि स्थिरात्मनो निर्वृत्तस्यान्यथाभावः तदात्मा शक्यते कर्तुम् ... तस्यैवान्यथात्वायोगात् HetuBiṬ. 78. 2; प्रत्यक्षावगतस्यार्थस्य कल्पनयान्यथात्वायोगात् VedāntKau. 152. 24 (*on* ii. 1. 4)

अन्यथात्वावधारण (anyathātvāvadhāraṇa) *n.* ascertainment as being otherwise तथा हि चन्द्रदिग्मो(ङ्गो)हवेदवर्णस्वरादिषु। पुरुपान्तरसंप्रश्नादन्यथात्वावधारणम् TattvSam. 2880.

अन्यथात्वासंभव (anyathātvāsambhava) *m.* impossibility of being wrong व्यवहारसमाप्तेरन्यथात्वासंभवात् पुनर्न्यायानन्तरमपि प्राङ्न्यायपराजित एवाङ्गीकृतदण्डेन दण्ड्यः SmṛtiCan. iii. 303. 12.

अन्यथात्वोपपत्ति (anyathātvopapatti) *f.* 1 tenability of the state of being different अन्यपाठ्यानामुत्थापनादीनां प्रयोगवशादन्यथात्वोपपत्तिर्दृश्यते AbhinBhā. i. 217. 13 (*on* 5. 22); 2 tenability of being explained otherwise ब्राह्मणादेव ब्राह्मण इति नियमस्य क्वचिदन्यथात्वोपपत्तेः TattvPrakā. 56B. 8 (*on* i. 3. 29); निरवकाशेन प्रथमप्रतीतस्य सावकाशस्यान्यथात्वोपपत्तेः NyāySu. (Ja.) 155B. 11 (*on* i. 2. 1)

अन्यथादत्त (anyathā-datta) *adj.* given or offered in different manner अद्भिरित्यनेन अन्यत्रोक्तविधिनोदकपूर्वमित्यर्थकेन अन्यथादत्तस्य अतत्त्वं सूचितम् BālamBha. ii. 237. 23 (*on* 2. 135)

अन्यथादर्शन (anyathā-darśana) *n.* 1A act of seeing or observing differently क्वचित्तथाहष्टानामपि देशकालसंस्कारभेदेन अन्यथादर्शनात् PramāVāSvopVṛ. 6. 21; 1B act of seeing otherwise अन्यथादर्शनादेव दोषत्वम् IṣṭaSi. 255. 7; Kiraṇā. 124. 4; 2 different cognition न हि वस्तुबलभाविना प्रत्यक्षेण अन्यथादर्शनसंभवो भ्रान्तताप्रसङ्गात् HetuBiṬ. 24. 27; 3 wrong judgement न भयादन्यथादर्शनं कर्तव्यम् ManuBh. ii. 80. 5 (*on* 8. 15); अतश्चादर्शनेऽन्यथादर्शने राज्ञो दोषो न ब्राह्मणानाम् Mitā. 125. 15 (*on* 2. 1); VīraMi. (Vyavahāra.) 10. 20; एवं चैतन्मतेऽन्यथादर्शननिमित्तोऽयं सभ्यदण्डः DaṇḍaVi. 339.7; एवं सति लोकेऽन्यथादर्शनेऽपि धर्मिग्राहकप्रमाणेन तथैव सिद्धत्वान्नात्र काचन शङ्का AṇuBh. 205. 18 (*on* iii. 2. 40); कुलादीनां ज्ञात्यादिरूपाणां दाक्षिण्यादिनान्यथादर्शनमपि संभाव्यते VīraMi. (Vyavahāra.) 30.2.

अन्यथादर्शिन् (anyathā-darśin) *adj.* treating wrongly or unjustly अहं वा त्वयि सम्यग्वर्तमाने यद्यन्यथादर्शी स्यामेनोभाग्भवेयमफलविद्यश्च SuśruS. i. 2. 7 (comm. अन्यप्रकारदर्शी)

अन्यथादृष्ट (anyathā-dṛṣṭa) *adj.* seen or observed in one way ऊहो नाम प्रकृतावन्यथादृष्टस्य विकृतावन्यथाभावः BhāṭṭDī. iii. 38. 6 (*on* ix. 1. 1)

अन्यथादृष्टि (anyathā-dṛṣṭi) *f.* invalid or erroneous knowledge स [स्वप्ने] मृषान्यथादृष्टिः परस्परविरोधिनाम्। अत्यन्ताननुभूतत्वमस्ति तत्कारितं यतः VibhraVi. 139.

अन्यथाद्वित्व (anyathā-dvitva) *n.* twofoldness in another way द्विविधवचनेन द्वित्वे प्राप्ते प्रत्यक्षमनुमानं चेति पुनर्यदुक्तं तदन्यथाद्वित्वनिरासार्थम् TarkBhā. (Mo.) 4. 4.

अन्यथाधिकरण (anyathādhikaraṇa) *n.* section dealing with difference 'सिद्धान्ते द्वैरशन्यमेवेत्येतत्प्रयोजनं' भाष्योक्तमेकदेशिनः केचिदन्यथाधिकरणपूर्वपक्षं मन्यमाना 'नेच्छन्ति' TantrRa. 221. 16.

अन्यथाधी (anyathā-dhī) *f.* invalid or erroneous knowledge एवं सत्यन्यथाधीस्तत्सामग्री वापि लाघवात्। अयथाव्यवहारस्य हेतुः NyāyPari. 39. 9; ततश्चान्यथाधीर्वा तद्धेतुमतिरेव वा। भ्रान्तिर्वस्तुविरूपस्य व्यवहारस्य कारणम् NyāyPari. 52. 4; योऽसौ बोधोऽन्यथाधीजनक इति जगे भ्रान्तिरित्युच्यतेऽसौ TattvMu. 4. 14; 4. 25; 4. 29.

अन्यथाध्यवसान (anyathādhyavasāna) *n.* act of determining or ascertaining otherwise अतद्रूपस्य अन्यथाध्यवसानमतिशयार्थमुत्प्रेक्षा KāvyālanSū. iv. 3. 9.

अन्यथाध्यवसाय (anyathādhyavasāya) *m.* apprehension in another way तत्राद्ये पक्षे अन्यस्यान्यथाध्यवसायो विपर्ययः NyāyPari. 54. 2.

अन्यथानयन (anyathā-nayana) *n.* act of interpreting differently, different analysis अन्यथानयनप्रकारमविद्वानन्यथानुपपद्यमानैकापि श्रुतिर्वह्वीरन्यथयेदिति मन्वानः पूर्वपक्षयति Bhām. 506. 1 (*on* ii. 4. 1); गुणभूतवाक्यार्थप्रतीतेर्युक्तमन्यथानयनम् VedāntaKa. 127. 13 (*on* i. 1. 28); पारमेश्वरलिङ्गद्वयस्यान्यथानयनप्रकारमेव दर्शयति VedāntKa. 410. 13 (*on* iii. 3. 16); अनित्यतावादिभिरपि ध्रुवेत्यस्यान्यथानयने आवश्यके दृष्टिसृष्टिप्रतिपादकश्रुत्यनुरोधेन आकल्पं संतानाविच्छेदपरत्वस्यैव युक्तत्वात् AdvaiSi. 536. 7; तृतीयाश्रुत्यनुसारेण न मनुत इत्यस्यैवापक्रमनोविषयतयान्यथानयनसाम्यमिति वाच्यम् AdvaiSi. 877. 10; छेकापह्नुतिरस्त्वाश्रयं विशेषः तस्यां वचनस्यान्यथानयनेनापह्नवः Kuval. 153 (7); AlaṅkāMaṅ. 208. 8; सांख्यस्मृत्यनुसारेण न वेदान्तानामन्यथानयनं कार्यम् ŚivārkaMaDī. ii. 4. 15 (*on* ii. 1.1); ii. 7. 13 (*on* ii. 1. 3); प्रथमश्रुतस्याप्यन्यथानयनं स्यादिति वाच्यम् PāṇiTaVāNaMā. 29. 2; विरोधात् उपक्रमस्य प्राबल्येनार्थवादे अन्यथानयनं न दोषः MīmāKau. i. 215. 4 (*on* i. 4. 5); षष्ठीबहुवचनमेकत्वादौ विभक्त्यन्तरादार्थे वा न विहितम्। अतो न तस्यान्यथानयनसंभवः LaCandr. 834. 14; किमित्यपूर्वसदसद्भावविषयतयान्यथानयनं क्रियते MayūMāli. 108. 14 (*on* ii. 1. 4); एवं चात्रापेक्षावल्लब्धिभक्तेरन्यथानयनं न प्रातिपदिकानुरोधेन MayūMāli. 361. 14 (*on* iv. 1. 14); न चोत्तरतन्त्रे ... प्रकृतश्लोकस्य कादिविद्यापरस्याप्यन्यथानयनमुचितमिति वाच्यम् SetuBa. 65. 16; ननु ... योगिनीनाम् ... कथनमात्रेण न्यासविधेरभावात् कथम् ... अन्यथानयनमिति चेत् SetuBa. 285. 10; एतदनुरोधेन तयोरन्यथानयनस्य कर्तुमशक्यत्वात् BālamBha. ii. 209. 14 (*on* 2. 135-136)

अन्यथानवगम्यत्व (anyathānavagamya-tva) *n.* the state of not being known in any other way अन्यथानवगम्यत्वाद्यद्यप्यङ्गपुरस्सरः। उपकारः प्राकृतोऽसौ विकृतौ संनिधाप्यते PrakaPañ. 492. 12.

अन्यथानामन् (anyathā-nāman) *n.* distinct or specific name स्वाभाविकान्यथानामसहभावान्यथोक्तयः। ... युक्तयः पूर्वपक्षस्य AnuVyā. 38A. 3 (*on* 3.1)

अन्यथानिचित (anyathā-nicita) *adj.* collected through other, i.e. unauthorized agency क्रेतृविक्रेत्रोरन्तरपतितमदायादं भवति। तेन धान्यपण्यनिचयांश्चानुज्ञाताः कुर्युः। अन्यथानिचितमेषां पण्याध्यक्षो गृह्णीयात् ArthŚā. ii. 127. 1 (4. 2)

अन्यथानिनीषु (anyathā-ninīṣu) *adj.* who desires to interpret differently आदिग्रहणात् स्मृत्यर्थं चान्यथानिनीषव इत्यभिप्रायः BālaKrī. i. 203. 5 (*on* 2.4)

अन्यथानिर्णय (anyathā-nirṇaya) *m.* wrong decision पापविषयसंदेहेऽन्यथानिर्णय उक्तः ManvaVi. 1370. 22 (*on* 11. 55)

अन्यथानिर्मित (anyathā-nirmita) *adj.* formed, i.e. decided otherwise राज्ञा शास्त्रदृष्टान् व्यवहारान् पुनः शास्त्रज्ञैर्बहुभिर्ब्राह्मणैः सह दृष्ट्वान्यथानिर्मिते नृपेण ... पृथक्पृथक् दण्डनीयाः DīpKa. 74. 9 (*on* 2. 305)

अन्यथानिर्वचनीय (anyathā-nirvacanīya) *adj.* which is to be described otherwise अन्यथानिर्वचनीयस्य पञ्चमप्रकारस्य वा ज्ञाननिवृत्तिरूपस्याङ्गीकारे ... उदाहृतश्रुतयः ... कदर्थिताः स्युः SarvaDaKau. 142. 13.

अन्यथानिश्चय (anyathā-niścaya) *m.* contrary or opposite decision अपि च अन्यथानिश्चयेऽपि रङ्गगता भरतादयो मिथ्यावभासेन शोकभयादिहेतवः BrahmSi. 35. 22.

अन्यथानुगत (anyathānugata) *adj.* (used as noun) (that) which is derived contrarily अन्यथानुगतानां तु प्रयोगं बाधते स्मृतिः TantrVā. 202. 1 (*on* i. 3. 18)

अन्यथानुत्पत्तिमुख (anyathānutpatti-mukha) *n.* [Inst.] through the non-production in any other way अनादराख्योऽलंकारः। अस्य चान्यथानुत्पत्तिमुखेन दोषाद्यन्तराविर्भावापेक्षिणस्तुल्यादिच्छापूर्वतुल्यान्तरप्राप्तिफलप्रयत्नानादररूप एव भेदः AlaṅkāRa. 70. 3.

अन्यथानुपपत्ति (anyathānupapatti) *f.* A untenability or inexplicability otherwise, i.e. negative concomitance केयमन्यथानुपपत्तिर्नाम Bṛha. 110.8 (*on* i. 1.5); Kāśi. iii. 157. 20 (*on* 5 (7). 1); अन्यथानुपपत्त्यैव शब्ददीपादिवस्तुषु। अपक्षधर्मभावेऽपि दृष्टा ज्ञापकतापि च TattvSaṁ. 1378; अन्यथानुपपत्त्या च वेत्ति शक्तिं द्वयश्रिताम्। अर्थापत्त्यावबुध्यन्ते संबन्धं त्रिप्रमाणकम् TattvSaṁ. 2651; अन्यथानुपपत्त्या हि सिद्धा जन्मान्तरेऽस्तिता ŚlokaVār. 5 (3). 206 (326. 10); अन्यथानुपपत्तौ तु प्रमेयानुप्रवेशिता ŚlokaVār. 5 (7). 29 (457. 5); 5 (7). 32 (458. 5); अन्यथानुपपत्तिश्च भवेदर्थमतिं प्रति ŚlokaVār. 5 (11). 95 (534.3); अन्यथानुपपत्त्या च बुद्ध्येच्छक्तिं द्वयाश्रिताम् ŚlokaVār. 5 (16). 141 (680.6); NyāyMañ. i. 225. 2; KāvyPra. 220. 1; ŚlokaVār. 5 (17). 141 (725. 1); 6. 308 (808. 6); प्ररोचना गम्यमानापि न कार्यान्तरोपयुक्तशास्त्रार्थत्वेनावतिष्ठते। अन्यथानुपपत्त्या चेयं तेभ्यः कल्प्येत TantrVā. 15. 2 (*on* i. 2. 7); 304. 17 (*on* i. 4. 9); अर्थवत्त्वाद्वाक्यस्य क्षीणान्यथानुपपत्तिर्नापूर्वान्तरस्य प्रमाणं भवति TantrVā. 339. 18 (*on* ii. 1. 1); अन्यथानुपपत्त्या कामश्रुतिभिराक्षिप्येत ṬupṬ. 2. 16 (*on* iv. 1. 2); न चान्यथानुपपत्त्याध्ययनं तस्यान्ययाप्युपपद्यमानत्वात् ṬupṬ. 97. 18 (*on* vi. 1. 24); यथाविषयं प्रमाणषट्कप्रमितोऽर्थोऽन्यथानुपपत्त्या यदर्थान्तरं कल्पयति सार्थापत्तिः TātpaṬ. (U.) 387. 16 (*on* 5 (7). 1); अन्यथानुपपत्त्या चेद्विश्वजिद्वत्प्रकल्प्यते BṛĀraUBhVā. iii. 3. 84; सदसत्सदसद्विकल्पितप्रतिपक्षैकवपुर्निवर्तनम्। तमसोऽभ्युपगम्यतेऽन्यथानुपपत्त्यापतनैकहेतुतः SaṁkṣeŚā. 4. 12 (ii. 367. 5); शब्दकरणिकार्थप्रतीत्यन्यथानुपपत्त्या शब्दस्य वाचकशक्तिमवगत्य तदन्यथानुपपत्त्या तस्य नित्यत्वकल्पना NyāyMañ. i. 34. 13-14; जगद्वैचित्र्यान्यथानुपपत्त्या तु विचित्रं कारणमात्रमनुमीयते NyāyMañ. i. 230. 2; i. 295. 15; ii. 103. 18; प्रतिकर्मनियमान्यथानुपपत्तेरवश्यं साकारमेव ज्ञानम् NyāyMañ. ii. 105. 18; लभ्यते च समभिव्याहारान्यथानुपपत्त्या पदानामन्वितार्थपराणां स्वाभिधेयार्थरूपसमवेतान्वितावस्थाप्रत्यायनं लक्षणया TattvBi. 131. 7; उत्तरार्धे व्यतिरेकमुखेन त्रयस्याप्येतस्य कान्तिमत्त्वादेर्विशेषणैरन्यथानुपपत्तिरुपपादिता VakroJī. 141. 13; 210. 9; तद्ग्रहणकाले बुद्धेरेवान्यथानुपपत्तिप्रमाणिकाया ग्राहकत्वम् Kāśi. ii. 126. 9 (*on* 5 (3). 66); iii. 157. 20 (*on* 5 (7). 52); यदि व्यवहारसिद्धयेऽन्यथानुपपत्तिरप्युच्यते तत् उच्यतां कामम् PratyabhiVi. i. 389. 1 (*on* i. 7. 13); निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि। अन्यथानुपपत्त्यैव पयोधरभरस्थितेः SaraKaṇṭhā. 392. 20; सोऽयं कर्तव्यतात्मा नियोगार्थोऽन्यथानुपपत्त्या स्वविषयस्य कर्तव्यतां बोधयन्नुष्ठापक इत्युच्यते ŚāstrDī. 33. 3 (*on* i. 1. 2); अश्रुतेऽपि प्रधानोपादानत्वे ब्रह्मणो जगत्कारणत्वश्रुत्यन्यथानुपपत्त्यैव प्रधानस्वरूपम् ... सिध्यति BrahmSūBh. (Rā.) 384. 3 (*on* i. 4. 23); विशिष्टप्रतिपत्त्यन्यथानुपपत्त्या हि शब्दस्य तत्र शक्तिः परिकल्पनीया NyāyKuA. ii (1). 215. 10; अन्यथानुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकाम् KāvyPra 220. 1; तत्र संज्ञाविधानान्यथानुपपत्त्या तयोर्भूते विधानमनुमास्यते Pradī. iii. 180B. 39 (*on* iii. 2. 102); अन्यथानुपपत्त्यैकलक्षणाद्धेतोः साध्यस्य जिज्ञासितार्थस्य प्रतीतिर्यत्र वर्ण्यते तदुमानम् Kāvyānu. (He.) 339. 14; यद्यदन्यत्र दृष्टवैधर्म्यं स्वप्रकाशे पर्यवसास्यति(?ॅवस्यति) तत् सर्वमन्यथानुपपत्तिरेव ... प्रदर्शिता स्वीकारयिष्यति KhaṇḍanKhā. 121. 22; एतेषु पक्षेषु विरुद्धेषु अन्यथानुपपत्त्या उत्पत्तिवाक्योपनीतद्रव्यदेवतासंबन्धिनोऽपि यागस्यानुवादेन गुणफलसंबन्धो घटिष्यति SaṅkarKāBh. 24. 1 (*on* i. 2. 31); अन्यथानुपपत्तिमाह PrakaVi. 536. 19; अत्र स्वेदच्छद्मामृतद्रवोत्पत्तेरन्यथानुपपत्त्या पारिजातपल्लवकथनादियमर्थापत्तिः RasāSu. 253. 12 (3. 109); कथं तर्ह्यत्र बाधप्रसङ्गः 'अन्यथानुपपत्त्यैव' इति वदामः NyāyMāVi. 510. 3 (*on* x. 2. 28); अनिर्वचनीयस्य ज्ञानार्थरूपद्विविधाध्यासस्यान्यथानुपपत्त्या तदुपादानस्याज्ञानस्यानिर्वचनीयत्वम् VivaPraSaṁ. 21. 14; परमात्मन्येव किं न स्यात्सुप्तिः किं नाडीस्थविशेषणेनेति चेत्। न। उभयविधश्रुतेरन्यथानुपपत्तेः TattvPrakā. 151B. 10 (*on* iii. 2. 7); न भोगविशेषः तद्बुद्ध्यादौ कारणमित्यत्र लिङ्गमन्यथानुपपत्तिरिति भावः TattvPrakā. 223B. 12 (*on* iv. 4. 22); भाष्यकारादिवर्णितलिङ्गविशिष्टपरिभाषाया अन्यथानुपपत्त्यानुमीयते PariVṛ. (Sī.) 59. 4; दृष्टान्ते उत्पत्तिवाक्यान्तराभावेनान्यथानुपपत्त्या तथात्वाश्रयणात् ArthSaṁ. 31. 2; नाशकान्तरमस्तीत्यन्यथानुपपत्त्या तथात्वाश्रयणात् ArthSaṁ. 31. 2; नाशकान्तरमस्तीत्यन्यथानुपपत्त्या संयोगनाश एव नाशकः कल्प्यते Upask. 345.1 (*on* vii. 2. 21); न ह्यपराधाधिक्यमाततायिनो वधाभ्यनुज्ञाबीजमाहुरपि तु विहितस्यात्मगोपनस्यान्यथानुपपत्तिः DaṇḍaVi. 236 .1; किं च ज्ञानादज्ञाननिवृत्तेरन्यत्रादर्शनमकिंचित्करम्। स्वानुभवसिद्धत्वात् अन्यथानुपपत्तेश्च सर्वतो बलवत्त्वात् SiddhāBi. 63. 2; तात्पर्यान्यथानुपपत्तिगतिसामान्यानामेव विनिगमकत्वात् AdvaiSi. 425. 5; अन्यथानुपपत्त्या 'नैव विज्ञायते' इति भाष्यं कथंचित्पक्षद्वयाङ्गीकारपरतयावश्यं योजनीयम् PāṇiTaVāNaMā. 5. 5; पुण्यवान् स्वर्गे जायते ... इत्यादेः श्रुतिस्मृतिव्यवस्थाया विभागस्यान्यथानुपपत्त्या पुरुषा बहव इत्यर्थः SāṁkhyaPaBh. 67. 10 (*on* 1. 149); अन्यथानुपपत्तेः सर्वप्रमाणप्रत्यस्तमयानुसंधानसापेक्षत्वेन विधिवेलायामेवानुदयात् MīmāKau. i. 297. 16 (*on* i. 4. 24); तात्पर्यग्राहकलिङ्गषट्केत्यर्थः। अन्यथानुपपत्तिश्च वक्ष्यमाणा GuruCandr. i. 454.10; क्वचिदपि स्वरूपसंबन्धेन न प्रतीकारः अन्यथानुपपत्तेर्दुर्वारत्वात् GuruCandr. ii. 53. 14; घटत्वादिकमपि ज्ञानस्यैव धर्मः, घटपटादिज्ञानानां मिथो वैलक्षण्यानुभवस्यान्यथानुपपत्तेः LaCandr. 63. 20; 66. 21; उक्तविरोधितयोरन्यथानुपपत्तिरेव संयोगादिना घटाद्यधिकरणे समवायादिना तदभावसाधिका LaCandr. 152.18; अत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्यत्वस्य अन्यथानुपपत्त्या बन्धस्य मिथ्यात्वं कल्प्यते VedāntPari. 237.5; यत्तु स्वजन्यबोधविषयत्वप्रकारकेच्छाविषयत्वमर्थे पदस्य संबन्धः पदे चार्थस्य विपरीतः, अस्य संबन्धत्वमन्यथानुपपत्त्या कल्प्यते ŚaktiVā. 17. 21; न चान्यथानुपपत्त्या तद्विधिरिति वाच्यम् VīraMi. (Tīrtha.) 61.17; लोके ... व्यभिचारस्य वारणाय जन्मान्तरीयमन्यथानुपपत्त्या कारणं धर्माधर्मादि कल्प्यते RasGaṅ. 10. 4; तस्माद्रूपादिसंदर्शनान्यथानुपपत्तितः। चक्षुराद्याः प्रसाध्यन्ते MānaMe. 62.7; अन्यथानुपपत्त्या यदुपपादककल्पनम्। तदर्थापत्तिः MānaMe. 118. 2; इत्थं भगोले वसतिर्मुनीनां नैव संगता। अन्यथानुपपत्त्यातः सार्वभौमेऽन्यथोदिता SiddhāTaVi. 350.17; अनुवषट् कृत्यं देवतानां तृप्त्या इति तृप्त्यर्थतावादस्यान्यथानुपपत्तेः BhāṭṭCan. 1. 17 (*on* xiii. 1.1); केसराणि तु नाक्षिप्यन्ते। अन्यथानुपपत्तेरभावात् SetuBa. 35.27; द्विवचनबहुवचनान्यथानुपपत्त्यापि नास्ति युगपद्वाचितानुप्रतिपत्तिरिति VaiyāBhū. 152.11 (*on* 30); अन्यथानुपपत्त्या प्रसृताया लक्षणायाः साधारणधर्मविशिष्ट एवौचित्यात् VaiyāSiMañ. 124. 20; 139. 7; B untenability, i.e. unaccountability without (probandum) नापि स्वलक्षणानुभवानन्तरमेकाकारपरामर्शप्रत्ययादन्यथानुपपत्त्या सामान्यपरिकल्पनं युक्तिसंगतम् TarkBhā. (Mo.) 30.9; यथा सन्त्यद्वैतवादिनोऽपि प्रमाणानि इष्टानिष्टसाधनदूषणान्यथानुपपत्तेः PramāMī. 40.17 (*on* i. 2. 9); 44. 21 (*on* i. 2. 12); तत् ... द्वेधा। तथोपपत्त्यन्यथानुपपत्तिभेदात् PramāMī. 49. 23 (*on* ii.1.4); 50.7 (*on* ii.1.5); 53.3 (*on* ii.1.12); सिद्धो मोक्षः सुखसंवेदनस्वभावः। प्रेक्षावत्प्रवृत्तेरन्यथानुपपत्तेः SyādvāMañ. 8 (313); अनन्तधर्मात्मकत्वं साध्यो धर्मः। सत्त्वान्यथानुपपत्तेरिति हेतुः। अन्यथानुपपत्त्येकलक्षणत्वाद्धेतोः SyādvāMañ. 22(13); 28(241)

अन्यथानुपपत्तितस् (anyathānupapatti-tas) *adv.* A through untenability, i.e. unaccountability without (probandum) अदृश्यपरिचित्तादेरभावं लौकिका विदुः। तदाकारविकारादेरन्यथानुपपत्तितः Laghīya. 1. 15; संतानान्तरसद्भूतेश्चान्यथानुपपत्तितः NyāyVi. 2. 65; तदभावेऽपि तद्वादस्यान्यथानुपपत्तितः NyāyVi. 2.178; निरतिशयसुखप्रतीत्यन्यथानुपपत्तितः परिकल्पितः कनकगिरिशिखरादिर्देशः स्वर्गः NyāyMañ. i. 304. 27; B through untenability or inexplicability otherwise शब्दोत्पत्तेर्निषिद्धत्वादन्यथानुपपत्तितः। विशिष्टसंस्कृतेर्जन्म ध्वनिभ्योऽध्यवसीयते ŚlokaVār. 762. 6 (*on* 6. 126); येऽपि स्थूलविनाशानामन्यथानुपपत्तितः। कल्पयन्त्यन्तरासूक्ष्मं विनाशित्वं प्रतिक्षणम् ŚlokaVār. 839. 3 (*on* 6. 424); मात्राकाङ्क्षी नियम्यते ... योग्यत्वसंनिधानाभ्यामन्यथानुपपत्तितः ŚlokaVār. 917. 7 (*on* 7. 261); यथाभिधीयमानार्थादन्यथानुपपत्तितः। प्रतीयमानो वाक्यार्थो यः BhāvPra. (Śā.) 147. 21 (6); तत्तदर्थस्वरूपात्तेरन्यथानुपपत्तितः। अर्थापत्तिप्रमाधीना क्रियाकर्त्रादिकल्पना BhāvPra. (Śā.) 164. 9 (6); सामर्थ्याधिक्यतस्तत्र छाया तद्वशतो भवेत्। नान्यात्तदूर्ध्वदेशात्यादन्यथानुपपत्तितः SiddhāTaVi. 231. 22.

अन्यथानुपपत्तिपक्ष (anyathānupapatti-pakṣa) *m.* view of untenability or inexplicability otherwise प्रत्यक्षवचने सत्यन्यथानुपपत्तिपक्षे सत्यर्थापत्तिलभ्यश्रुत्यपरिग्रहाद्य TantrVā. 596. 16 (*on* ii. 3. 4)

अन्यथानुपपत्तिपरिक्षय (anyathānupapatti-parikṣaya) *m.* loss of untenability or inexplicability otherwise तदपि हि स्वभावान्तरमन्यथानुपपत्तिपरिक्षयादेव नाद्रियामहे NyāyKu. 96. 15.

अन्यथानुपपत्तिप्रसूता (anyathānupapatti-prasūtā) *adj.* (*f.*) produced from untenbility otherwise सर्वत्र ह्यन्यथानुपपत्तिप्रसूता लक्षणा VīraMi. (Saṁskāra.) 608. 1.

अन्यथानुपपत्तिबल (anyathānupapatti-bala) *n.* [Abl.] on account of the strength of untenability otherwise न हि पक्षधर्मत्वं हेतोर्लक्षणं तदभावेऽप्यन्यथानुपपत्तिबलाद्धेतुत्वोपपत्तेः PramāMī. 54. 21 (*on* ii. 1. 17)

अन्यथानुपपत्तिमत् (anyathānupapatti-ma(n)t) *adj.* having untenability, i.e. unaccountability without (probandum) असिद्धधर्मिधर्मत्वेऽन्यथानुपपत्तिमान्। हेतुरेव यथा सन्ति प्रमाणानीष्टसाधनात् NyāyVi. 2. 176.

अन्यथानुपपत्तिमात्र (anyathānupapatti-mātra) *n.* mere untenability or inexplicability otherwise यत्रापि केवलार्थवाददर्शनादेव विधित्वं तत्राप्यन्यथानुपपत्तिमात्रं शरणम् TantrVā. 22.17 (*on* i. 2.7); न केवलमन्यथानुपपत्तिमात्रसिद्धेयं व्यवस्था TattvPrakā. 12B.13 (*on* i. 1.5); [Inst.] on account of mere untenability or inexplicability otherwise अनङ्गस्यापि अभिक्रमणादिवदन्यथानुपपत्तिमात्रेण प्रधानविधिप्रयुक्ततोपपत्तेः MīmāKau. ii.26. 19 (*on* ii. 3. 4)

अन्यथानुपपत्तिमूल (anyathānupapatti-mūla) *adj.* based on untenability or inexplicability otherwise (विधिः) अन्यथानुपपत्तिमूलश्चासौ न च तद्धिते संभवत्यन्यथानुपपत्तिः TantrVā. 303. 24 (*on* i. 4. 9)

अन्यथानुपपत्तिमूलकत्व (anyathānupapattimūlaka-tva) *n.* the state of being based on untenability or inexplicability otherwise न चायन्यतेऽनेनेति करणव्युत्पत्तिर्बहुव्रीहिर्वा गौरवात्। कदाचित्तदाश्रयणस्यान्यथानुपपत्तिमूलकत्वात् VīraMi. 68. 14 (*on* 1. 23)

अन्यथानुपपत्तिरूप (anyathānupapatti-rūpa) *adj.* A of the form of untenability or inexplicability otherwise (अर्थापत्तिः) सा चान्यथानुपपत्तिरूपत्वादनन्यलभ्ये विषये भवति TantrVā. 944. 15 (*on* iii. 4. 13); अन्यथानुपपत्तिरूपे प्रमाणान्तरे योऽयं विद्यमानत्वसंसृष्टगेहाभावबुद्धावेव प्रमेयस्य बहिर्भावस्यानुप्रवेशः स न दोषः NyāyRa. 457. 18 (*on* 5 (7). 29); योग्यता ... सा चान्यथानुपपत्तिरूपत्वात् व्यतिरेकव्याप्तिरूपा MīmāKau. ii. 224. 2 (*on* iii. 2. 1); B of the form of untenability, i.e. unaccountability without (probandum) अन्यथानुपपत्तिरूपहेतुलक्षणविरहादयमसिद्धः PramāMī. 54. 20 (*on* ii. 1. 17)

अन्यथानुपपत्तिलक्षण (anyathānupapatti-lakṣaṇa) *adj.* characterized by the untenability or inexplicability otherwise श्रुतविध्युपपत्त्यान्यथानुपपत्तिलक्षणार्थापत्त्यनुत्पादात् TantrVā. 12. 11 (*on* i. 2. 7); प्रतिसमाधानं तु सर्वजातीनामन्यथानुपपत्तिलक्षणानुमानलक्षणपरीक्षणमेव PramāMī. 62. 17 (*on* ii. 1. 29)

अन्यथानुपपत्तिलिङ्ग (anyathānupapatti-liṅga) *n.* probans of the form of untenability or inexplicability otherwise न च दिवावाक्यपदार्थानामन्यथानुपपत्तिलिङ्गं चान्तरेण रात्रिवाक्यप्रतिपत्तौ व्यापार इत्याह TātpaṬ. (U.) 403. 20 (*on* 5 (7). 71)

अन्यथानुपपत्तिविधा (anyathānupapatti-vidhā) *f.* [Inst.] in the form of untenability or inexplicability otherwise अन्यार्थदर्शनस्यापि अन्यथानुपपत्तिविधया लिङ्गत्वाद्य MīmāKau. ii. 367. 6 (*on* iii. 3. 14)

अन्यथानुपपत्तिसंभूत (anyathānupapatti-sambhūta) *adj.* produced from untenability or inexplicability otherwise अन्यथानुपपत्तिसंभूतोऽनुभवोऽर्थापत्तिः SarvaMaSaṁ. 13. 14.

अन्यथानुपपत्तिसहकृत (anyathānupapatti-sahakṛta) *adj.* helped by untenability or inexplicability otherwise अज्ञोऽहं नेशः सुखी दुःखी इत्यादिप्रत्यक्षमप्यन्यथानुपपत्तिसहकृतं तद्बोधकम् GuruCandr. ii. 117. 17.

अन्यथानुपपत्त्यभाव (anyathānupapatty-abhāva) *m.* absence of untenability or inexplicability otherwise काम्येषु तु कर्मसु कामनावशादेव प्रवृत्तिसिद्धेस्तत एव विधिः सिध्यन्नन्यथानुपपत्त्यभावान्न स्वयमनुष्ठानमाक्षिपति ŚāstrDī. 32. 5 (*on* i. 1. 2); महावाक्यार्थधीसंभवात् कुतः स्मृतिसमबोधस्वीकारः। अन्यथानुपपत्त्यभावात् LaCandr. 672. 5.

अन्यथानुपपत्त्युन्नीयमाना (anyathānupapatty-unnīyamānā) *adj.* (*f.*) inferred from untenability or inexplicability otherwise अन्यथानुपपत्त्युन्नीयमाना शब्दशक्तिस्तदुपपादककार्यपर्यवसायिन्येवावसीयते ĀgaPrā. 20. 19.

अन्यथानुपपत्त्युपयोगिनी (anyathānupapatty-upayoginī) *adj.* (*f.*) conducive to the untenability or inexplicability otherwise कारणत्वश्रुतेरन्यथानुपपत्त्युपयोगिनीं व्याप्तिं शिक्षयति ŚrutaPra. ii. 160. 29 (*on* i. 4. 23)

अन्यथानुपपद्यमान (anyathānupapadyamāna) *adj.* [*f.*-ā] being untenable or inexplicable otherwise प्रत्यक्षया श्रुत्याक्षिप्तचित्ततया तत्प्रामाण्येनान्यथानुपपद्यमानेन स्मृत्यप्रामाण्यं कल्पयन् पूर्वावधारितमूलव्यत्ययमेव प्रतिपद्यते TantrVā. 96. 10 (*on* i. 3. 3); शब्दादयोऽपि संबन्धग्रहणसदृशग्रहणान्यथानुपपद्यमानग्रहणसापेक्षत्वात् सविकल्पक विज्ञानेन प्रवर्तन्ते TātpaṬ. (U.) 181. 11 (*on* 4. 248); प्रमाणषट्कप्रमितोऽर्थः ... अवगतोऽन्यथानुपपद्यमानश्च यथैवावगतस्तथैवोपपद्यमानो यदर्थान्तरं कल्पयति TātpaṬ. (U.) 387. 17 (*on* 5 (7). 1); यस्तु मन्यते - गृहाभाव एवान्यथानुपपद्यमानो बहिर्भावस्य गमक इति। तदयुक्तम् PrakaPañ. 277. 4; स खल्वयमेको वाक्यात्मा वाक्यार्थधीहेतुरनुभवाद्वा व्यवस्थाप्यते, अर्थधीभेदाद्वा अन्यथानुपपद्यमानात् TattvBi. 9. 2; अर्थापत्तिरप्यन्यथानुपपद्यमानार्थविषया दर्शनप्रभवा Kāśi. iii. 13. 6 (*on* 5 (4). 12); यत्रार्थोऽन्यथानुपपद्यमानोऽर्थान्तरं गमयति सा दृष्टार्थापत्तिः NyāyKa. 222. 11; श्रुत्योरन्यथोपपद्यमानान्यथानुपपद्यमानयोरन्यथानुपपद्यमाना बलवती Bhām. 472. 4 (*on* ii. 3. 5); अन्यथानुपपद्यमानस्फोटादिकार्यरूपार्थजन्यार्थापत्तिः शक्तादिविषयोदेष्यति VedāntKa. 468. 13 (*on* iii. 3.53); अन्यथानुपपद्यमानश्रुत्यनुरोधेन लक्षणाङ्गीकारेऽपि VīraMi. (Paribhāṣā.) 106. 4.

अन्यथानुपपद्यमानता (anyathānupapadyamāna-tā) *f.* the state of being untenable or inexplicable otherwise ननु 'दृष्टः श्रुतो वार्थः अन्यथा नोपपद्यते' इति गमकस्यान्यथानुपपद्यमानतां दर्शयति Bṛha. 113. 3 (*on* i. 1. 5); Kāśi. iii. 158. 13 (*on* 5 (7). 1); का गृहाभावस्यान्यथानुपपद्यमानता PrakaPañ. 277. 5; कार्यस्यान्यथानुपपद्यमानताव्यवस्थाप्यत्वं वा अनन्यथासिद्धत्वम् TattvCin. ii (2). 155.12.

अन्यथानुपपद्यमानत्व (anyathānupapadyamāna-tva) *n.* the state of being untenable or inexplicable otherwise संशयापादनं चान्यथानुपपद्यमानत्वापादनम् Kāśi. iii. 158. 25 (*on* 5 (7). 1)

अन्यथानुपपन्न (anyathānupapanna) *adj.* [*f.*-ā] A untenable, i.e. unaccountable without (probandum) यत एते स्वभावकारणकार्यव्यापका अन्यथानुपपन्नाः स्वसाध्यमुपस्थापयन्ति तत एव तदभावे स्वयं न भवन्ति PramāMī. 45. 11 (*on* i. 2. 12); नासन्ननिश्चितसत्त्वो वान्यथानुपपन्न इति सत्त्वस्यासिद्धौ संदेहे वासिद्धः PramāMī. ii. 1. 17; B untenable or inexplicable otherwise न चैवं विश्वं सत्यमित्यादिश्रुतेरपि प्रत्यक्षागृहीततात्त्विकसत्त्वग्राहकत्वमिति वाच्यम्। अन्यथानुपपन्नाद्वैतश्रुतिविरोधादिना निरस्तत्वात् GuruCandr. i. 460. 8; संबन्धे लिङ्गसंख्यान्वयासंभवादन्यथानुपपन्नलिङ्गसंख्यादिभिरेवाक्षेपः VaiyāBhū. 17. 11 (*on* 2); एवं चाधारशक्त्यैवान्यथानुपपन्नयाकाशसद्भावावगमः VaiyāSiMañ. 202. 7.

अन्यथानुपपन्नता (anyathānupapanna-tā) *f.* the state of being untenable or inexplicable otherwise आद्यधीवेद्यभेदीयाप्यन्यथानुपपन्नता KhaṇḍanKhā. 166.15.

अन्यथानुपपन्नत्व (anyathānupapanna-tva) *n.* A the state of being untenable, i.e. unaccountable without (probandum) अन्यथानुपपन्नत्वं हेतोर्लक्षणमीरितम् Nyāyāva. 22; अन्यथानुपपन्नत्वमसिद्धस्य न सिध्यति NyāyVi. 2. 12; सामान्यभेदरूपार्थसाधनस्तद्गुणोऽखिलः। अन्यथानुपपन्नत्वनियमस्यात्र संभवात् NyāyVi. 2. 304; 2. 343; 2. 370; अविनाभावो ह्यन्यथानुपपन्नत्वम् PramāMī. 40. 12 (*on* i. 2. 9); B the state of being untenable or inexplicable otherwise अन्यथानुपपन्नत्वं यस्य तस्यैव हेतुता। दृष्टान्तौ द्वावपि स्तां वा मा वा तौ हि न कारणम् TattvSaṁ. 1368; प्राभाकरास्तु प्रकारान्तरेणानुमानाद्भेदमत्राचक्षते अनुमाने गमकविशेषणमन्यथानुपपन्नत्वम् NyāyMañ. i. 41. 2; सिद्धपिष्टमुपादाय पुरोडाशादिस्वरूपनिष्पत्तिसंभवेऽन्यथानुपपन्नत्वाभावेन पुरोडाशादि श्रपणविधेस्तदनाक्षेपकत्वात् VīraMi. (Saṁskāra.) 933.23.

अन्यथानुभव (anyathānubhava) *m.* contrary experience, i.e. experience of sorrow न चान्यथानुभवे सुखमिति परामर्शः BrahmSi. 6. 1.

अन्यथानुमान (anyathānumāna) *n.* inference, i.e. conclusion (being shaped) otherwise तुल्यमत्रापि परमगम्भीरस्य जगत्कारणस्य तर्कानवगाह्यत्वम्, तर्कस्य चाप्रतिष्ठितत्वम्, अन्यथानुमानेऽप्यविमोक्षः BrahmSūBh. (Śaṅ.) 305. 19 (*on* ii. 1. 12)

अन्यथानुष्ठान (anyathānuṣṭhāna) *n.* performance in a different way कर्तव्यतया शास्त्रेण यावज्जीवादिपदैर्निनैव विश्वजित्या(?त्या)येन फलकल्पनयावगमितं तस्यान्यथानुष्ठाने प्रसङ्ग एव नास्ति ManuBh. i. 53. 29 (*on* 2. 2)

अन्यथान्यथा (anyáthānyathā) *adv.* 1 in a different manner स्वयं जुह्वुदि वास्यान्यो जुहुयादय योऽन्यान्यथा जुहोति यथापो वाभिषुन्नन्यद्वाम्नाय्रं स सामि निर्वर्तितैवम् ŚatBr. II. iii. 2. 14; 2 in various ways, in one way or other तस्मादनिर्वचनीयस्यैवाज्ञानस्यान्यथान्यथा स्फुरणम् IṣṭaSi. 139. 3; सूत्रक्रीडेति। नालिकासंचारनालादिसूत्राणामन्यथान्यथा दर्शनम् JayaMa. 36. 23 (*on* 1. 3); प्रलपन्तोऽन्यथान्यथा। कथं तरन्तु कवयः कामपारम्यवादिनः KaliViḍ. 39.

अन्यथान्यथाकरण (anyathānyathā-karaṇa) *n.* act of effecting, i.e. explaining in various ways व्याकरणादिष्वन्यथान्यथाकरणस्वीकाराद्य NyāyPari. 8. 7.

अन्यथान्यथाभाव (anyathānyathā-bhāva) *m.* A various changes यथा चितिशक्तिरन्यथान्यथाभावं भजमानेष्वपि गुणेषु स्वरूपादप्रच्युता कूटस्थनित्यैवं सुवर्णाद्यपि स्यात् TattvVai. 129. 7 (*on* 3. 13); B different (mental) conditions तत्त्वम् ... अवनद्धवाद्यर्गीति नियतप्रतिष्ठितत्वात्मकत्वम्। नाट्ये च प्रयोज्यचित्तवृत्तिपरिवृत्तानुसारेणान्यथान्यथाभावेन AbhinBhā. i. 165. 14 (*on* 4. 252)

अन्यथान्यथाविवक्षित (anyathānyathā-vivakṣita) *adj.* intended in one way or other अन्यथान्यथाविवक्षितमन्यथा प्रतिपादयतीत्यप्रेक्षापूर्वकारी स्यात् PramāVārBh. 7. 27.

अन्यथान्यथिक (anyathānyathi-ka) *m.* one who holds the view of relative change ते भावलक्षणावस्थान्यथान्यथिकसंज्ञिताः AbhidhK. 5. 26; अन्यथान्यथिको भदन्तबुद्धदेवः AbhidhKoBh. 297. 1 (*on* 5. 26); TattvSaṁPañ. 504. 23 (*on* 1787-1790)

अन्यथान्यास (anyathā-nyāsa) *m.* placing of words or wording (in the aphorism) otherwise यथान्यासे त्रीणि ग्रहणानि भवन्ति द्वे विसर्जनीयग्रहणे तृतीयं सग्रहणम्, अन्यथान्यासे तु द्वे ग्रहणे - 'स'ग्रहणं 'रु'ग्रहणं च Pradī. vii. 171. 13 (*on* viii. 3. 34)

अन्यथान्वय (anyathānvaya) *m.* distinct syntactic-semantic relation

वर्णतत्त्वेऽप्यभिधानान्यत्वान्नानात्वम्, अभिधाविधान्यत्वात् समासासमासयोरन्यथान्वय इतीयं दिक् NayaVi. 271. 2 (*on* i. 1. 24); अन्यथान्वयावश्यकत्वे उक्तान्वयकल्पनया उपजीव्यत्वकल्पने मानं चिन्त्यम् GuruCandr. i. 342. 17.

अन्यथापक्षगत (anyathāpakṣa-gata) *adj.* gone to the opposite side दैत्यगुरुः ... अथान्यथापक्षगतो न राजते VarāP. 11. 54.

अन्यथापतित (anyathā-patita) *adj.* fallen in another direction अन्यथापतितस्त्याज्यो वृक्षः सः सर्वगर्हितः ŚilpaRa. i. 14. 110.

अन्यथापत्ति (anyathāpatti) *f.* becoming otherwise, change स्थितस्यान्यथापत्तिः प्रत्यादेशः AlaṅkāRa. 74.

अन्यथापदप्रचार (anyathā-padapracāra) *m.* 1 wrong use of foot-step तत्कथं कृतवानसि ... लास्यस्येवान्यथापदप्रचारम् NalaCam. 5. 0 (19); 2 use of word in a different sense, NalaCam. 5. 0 (19)

अन्यथापन (anyathāpana) *n.* act of making otherwise, i.e. interpreting differently अतः सर्वोत्तरादेशसंनिधावन्यथापनम् NyāyPari. 353. 14.

अन्यथापर (anyathā-para) *adj.* given to wrong thing अन्यथापरेण प्रकारेण वृत्ता निर्व्यूढा या रससंपत् VakroJī. 238. 16.

अन्यधर्मप्रतिपत्ति (anyadharma-pratipatti) *f.* knowledge of another characteristic or attribute धर्मयोरेकनिर्देशेऽन्यधर्मप्रतिपत्तिः साहचर्यादित्यन्ये मन्यन्ते VyaktiVi.95.20; हेतुहेतुमद्भावस्तयोरसिद्ध इति साहचर्यासिद्धौ कुतोऽन्यधर्म-प्रतिपत्तिसिद्धिः VyaktiVi. 95. 27.

अन्यधर्मप्रापक (anyadharma-prāpaka) *adj.* causing to obtain another duty or practice अपेक्षासामर्थ्यं चोदककल्पनयैव अन्यत्र अन्यधर्मप्रापकम् PūrvottaVāNaMā. 314. 18.

अन्यधर्मबाहुल्य (anyadharma-bāhulya) *n.* abundance of other attributes समुच्चयोपमातोऽन्यधर्मबाहुल्यकीर्तनात् AgniP. 343. 13.

अन्यधर्ममात्र (anyadharma-mātra) *n.* mere attribute or property of one अन्यधर्ममात्रमन्यत्रोपदध्यादिति कालस्य स्वभावः क्रियामात्रं वा Kiraṇā. 124.4.

अन्यधर्मयोग (anyadharma-yoga) *m.* association with another characteristic or attribute अन्यधर्मयोगादार्थमौपम्यं प्रतिमा AlaṅkāRa. 13.

अन्यधर्मरत (anyadharma-rata) *adj.* taking delight in a different philosophical view मायाया: समुत्पन्ना आसुराः कर्मजडा अन्यधर्मरता एव भवन्ति SāmaraU. 220. 8.

अन्यधर्मरहित (anyadharma-rahita) *adj.* devoid of, i.e. not cherishing any other philosophical view ये अन्यधर्मरहिता अन्यासक्तिरहितास्ते तन्मण्डलं प्राप्नुवन्ति SāmaraU. 273. 8.

अन्यधर्मरहितत्व (anyadharmarahita-tva) *n.* the state of being devoid of, i.e. not cherishing any other philosophical view ते अन्यधर्मरहितत्वेन प्रेमानन्दे प्रीतिमापद्यन्ते SāmaraU. 256. 16.

अन्यधर्मराहित्य (anyadharma-rāhitya) *n.* absence of other attribute साक्षी चेता केवलो निर्गुणश्च इत्यादिश्रुतिषु चान्यधर्मराहित्यलक्षणा केवलतोक्ता सा लीलात्मिकैव AṇuBh. 353. 25 (*on* iv. 4. 14)

अन्यधर्मवत्त्व (anyadharmavat-tva) *n.* the state of possessing the characteristic or attribute of another ब्राह्मणे भगवत्त्वेन जीव उक्तः। ननु कथमन्यस्यान्यधर्मवत्त्वेन कथनम् AṇuBh. 149. 13 (*on* ii. 3. 29)

अन्यधर्मविजातीय (anyadharma-vijātīya) *adj.* dissimilar in nature to other attribute or property यत्तु बाह्येन्द्रियत्वादि प्राप्यकारित्वसाधनम्। अन्यधर्म-विजातीयाद्विरोधाद्व्यभिचारि तत् TattvSaṁ. 2528.

अन्यधर्मविधि (anyadharma-vidhi) *m.* injuction or prescription of the characteristics of another (sacrifice) परप्रकरणे अन्यधर्मविधेरन्याय्यत्वात् TantrVā. 885. 5 (*on* iii. 3.16); Bhām. 275. 2 (*on* i. 3. 40)

अन्यधर्मशक्तित्व (anyadharmaśakti-tva) *n.* the state of being the expressive power with regard to another attribute or property न त्वन्यधर्मशक्तित्वेनार्पीति न घटपदस्य नानार्थत्वम् LaCandr. 669. 15.

अन्यधर्मसंग्रह (anyadharma-saṅgraha) *m.* obtainment of quality or attribute of another लवणाचलादिसकलशैलदानप्रकृतिभूतस्य धान्यपर्वतस्य कथमन्यधर्मसंग्रहः CaturCin. i. 365. 19.

अन्यधर्मसमावेश (anyadharma-samāveśa) *m.* presence or existence of another attribute or property अन्यधर्मसमावेशे प्राप्ता तत्र च धर्मता। द्रव्यादेरपि धर्मित्वमस्मादेव च संमतम् TattvSaṁ. 578.

अन्यधर्मसंबन्ध (anyadharma-sambandha) *m.* 1 relation with the quality of one अन्यधर्मसंबन्धादन्यत्वेनोपतर्कितम्। प्रकृतं हि भवेत् प्राज्ञास्ता-मुत्प्रेक्षां प्रचक्षते PratāYaBhū. 383.6; CitraMī. 73.16; अन्यधर्मसंबन्ध-निमित्तेनान्यस्यान्यतादात्म्यसंभावनमुत्प्रेक्षा Kuval. 35(1); 2 relation with the quality of another धर्मस्य प्रकृताप्रकृतसाधारण्यादन्यधर्मसंबन्धः CitraMī. 81.20; मिलितेनोभयेन विषयस्यान्यधर्मसंबन्धनिर्वाहः CitraMī. 84.3.

अन्यधर्मस्वीकार (anyadharma-svīkāra) *m.* acceptance of attribute of another अन्यधर्मस्वीकारस्तद्गुणः AlaṅkāRa. 97.

अन्यधर्माधर्म (anya-dharmādharma) *m.* other merit and demerit संस्कृताच्छब्दात्सत्यात् धर्मोऽन्यस्मादधर्म इति नियमे चान्यधर्माधर्मोपायानुष्ठानवैयर्थ्यम् PramāMī. 69. 20 (*on* ii. 1. 34)

अन्यधर्माध्यारोप (anyadharmādhyāropa) *m.* superimposition of the attribute or property of another अन्यधर्माध्यारोपादयं निरुद्भेदः समाधिभेदः SaraKaṇṭhā. 453. 9.

अन्यधर्माध्यास (anyadarmādhyāsa) *m.* 1 superimposition of the attribute or property of one तं केचित् अन्यत्रान्यधर्माध्यास इति वदन्ति BrahmSūBh. (Śaṅ.) 2. 7 (*on* i.1.0); Bhām. 13. 17 (*on* i.1.0); अध्यासोऽन्य-स्मिन्नन्यधर्माध्यासः ŚrutaPra. ii. 580. 8 (*on* iv. 1.7); 2 superimposition of attribute or propety of another ब्रह्मस्वरूपं कृत्स्नं सर्वदा स्वयमेव प्रकाशते चेन्न तस्मिन्नन्यधर्माध्यासः संभवति VedāSaṁ. 87. 11.

अन्यधर्मानावृत्ति (anyadharmānāvṛtti) *f.* non-obstruction by another attribute तत् अनावरणस्वभावमाकाशम्। तदप्रत्यक्षविषयत्वादन्यधर्मानावृत्त्यानुमीयते Sphuṭā. i. 17. 4.

अन्यधर्मनिवृत्ति (anyadharmānivṛtti) *f.* non-removal or lack of cessation of another attribute or property दर्शनमात्रेणान्यधर्मानिवृत्तिः AṇuBh. 308. 12 (*on* iv. 1. 6)

अन्यधर्मानुवृत्ति (anyadharmānuvṛtti) *f.* continuation of the attribute of another सत्त्यापोऽमूः शून्यतत्त्वाः सशब्दस्पर्शसंयुताः। रूपवत्योऽन्यधर्मानुवृत्त्या स्वीयो रसो गुणः PañcDa. 2. 92.

अन्यधर्मानुसंधान (anyadharmānusandhāna) *n.* recollection of the attribute of one अध्यासो हि नाम चेतनस्यान्यस्मिन्नन्यधर्मानुसंधानम् BrahmSūBh. (Rā.) 477. 10 (*on* ii. 2. 9); अन्यधर्मानुसंधानरूपोऽध्यासो निर्विकारपुरुषस्य न संभवति VedāntSā. (Rā.) 146. 1 (*on* ii. 1. 10); ŚivārkaMaDī. ii. 14. 28 (*on* ii. 1. 10)

अन्यधर्मापेक्षा (anyadharmāpekṣā) *f.* [Inst.] in comparison to another practice वेदोक्तेन प्रकारेण ...। शरीरशोषणं यत् तत् तप इत्युच्यते बुधैः। परं युगान्तरापेक्षया मनुष्यसामर्थ्याधिक्यात् सुशकतया अन्यधर्मापेक्षया प्रचुरतरम् ViraMi. (Paribhāṣā.) 48.16.

अन्यधर्मापोह (anyadharmāpoha) *m.* exclusion of other attribute or denial of other property एतत् संवृतिसत्यम्। अतोऽन्यथा परमार्थसत्यम्। तत्र भिन्नेऽपि तद्बुद्धिर्भवत्येव। अन्यधर्मापोहेऽपि बुद्ध्या तत् परमार्थसत् AbhidhKoBh. 334. 7(*on* 6.4)

अन्यधर्माभाव (anyadharmābhāva) *m.* absence of another property मुमुक्षुत्वे सति अन्यधर्माभावापराधेन प्रवृत्त्यभावो न दृष्टचरः VivaPraSaṁ. 217. 20.

अन्यधर्मारोप (anyadharmāropa) *m.* superimposition of the attribute of another साधर्म्येणान्यत्रान्यधर्मारोपे सविकल्पकप्रत्यक्षस्य निर्विकल्पकपूर्वत्वनियमदर्शनात् MānaMe. 245. 6.

अन्यधर्मालय (anya-dharmālaya) *n.* other building (built) in charity (for public), i.e. public building तत्रैव सत्रशाला वा आ(चा)ग्नेये पानीयमण्डपम्। अन्यधर्मालयं सर्वं यथेष्टं दिशितो(तु) भवेत् MānaSā. 9.70.

अन्यधर्मावच्छिन्न (anyadharmāvacchinna) *adj.* (used as noun) (one) delimited by another attribute or property अन्यावच्छिन्ने प्रमितित्वमन्यधर्मावच्छिन्ने चाभावत्रयसंबन्धः KhaṇḍanKhā. 637. 3; अन्यधर्मावच्छिन्नं बुद्धिस्थीकृत्य प्रयुक्ते पदे ... तत्र तदवगाहिज्ञानस्य भ्रमत्वनियमात् ŚaktiVā. 113. 11; एकधर्मावच्छिन्नप्रतियोगिताया अन्यधर्मावच्छिन्नसंसर्गत्वे मानाभावात् VyutpaVā. 129. 19.

अन्यधर्मावभासता (anyadharmāvabhāsa-tā) *f.* the state of having the manifestation of the attribute of another कोऽयमध्यासो नाम ... सर्वथापि तु अन्यस्य अन्यधर्मावभासतां न व्यभिचरति BrahmSūBh. (Śaṅ.) 2. 10 (*on* i. 1. 0)

अन्यधर्मावभासित्व (anyadharmāvabhāsi-tva) *n.* the state of manifesting the attribute of another अन्यस्यान्यधर्मावभासित्वं नाम लक्षणम् PañcPā. 12.1 (*on* i. 1. 0)

अन्यधर्मासक्त (anyadharmāsakta) *adj.* attached to, i.e. believing in different philosophical view अन्यधर्मासक्ता इदं मण्डलं न जानन्ति SāmaraU. 272. 19.

अन्यधर्मिज्ञान (anyadharmi-jñāna) *n.* knowledge of any other substratum शक्तिज्ञानं हि नान्यधर्मिज्ञानसापेक्षम् SāṁkhyaPraBh. 137. 28 (*on* 5. 95)

अन्यधर्मिधर्म (anyadharmi-dharma) *m.* attribute or property of another substratum आद्ये पक्षे स्फोटाख्यधर्मिधर्मो वा हेतुर्भवेत् अन्यधर्मिधर्मो वा TattvSaṁPañ. 721. 9 (*on* 2705-6)

अन्यधर्मिन् (anya-dharmin) *m.* A substratum of another attribute or property यैव चास्य साध्यधर्मिणि स्वसाध्याविनाभाविता सैव गमकत्वे निबन्धनं नान्यधर्मिणि HetuBiṬ. 15. 12; B another substratum अगृह्यमाणे तु रजताख्ये अन्यधर्मिणि कथं तद्धर्मत्वेन लौकिकत्वं गृह्यते NyāyMañ. i. 172. 16.

अन्यधर्मोपजीवन (anyadharmopajīvana) *n.* subsistence by means of the practice of another यत्र समसंख्यानां धर्मविप्रतिषेधस्तत्र कस्य स्वधर्मलाभः कस्य वान्यधर्मोपजीवनम् ŚāstrDī. 864. 7 (*on* xii. 2. 8)

अन्यधर्मोपनयन (anyadharmopanayana) *n.* application of the attribute or property of another अन्यस्मिन्नन्यधर्मोपनयननियमः प्राग्वदत्र TattvMu. 1. 65.

अन्यधर्मोपाधिक (anyadharmopādhika) *adj.* having one attribute as the adjunct or condition न हि कालोऽपि अन्यधर्मोपाधिकं व्यवहारमन्यत्र कुर्वाणः प्रमातृनियममपेक्षते Kiraṇā. 123. 9.

अन्यधा (anya-dhā) *adv.* in the other, i.e. wrong way, wrongly यथा मध्वासिच्य लाजानावपेत् तदन्यधेव स्यात् ·ताहक् तत् JaimiBr. 2. 79.

अन्यधातु (anya-dhātu) *m.* 1 another (tissue) element, i.e. secretion अष्टौ रेतोदोषा इति तनु शुष्कं फेनिलम् ... अन्यधातूपहितमवसादि च CaraS. i. 19.5 (1922 Ed.); दोषाः ...। शुक्रे संदूषयन्त्याशु ...। अन्यधातूपसंसृष्टमवसादि तथाष्टमम् CaraS. vi. 30. 140 (1941 Ed.); 2 different metal तथा चान्यधातूत्थानां महामते। ईषत्सुवर्णमिश्रेण पूरयेत्त्वेन धातुना PauṣkS. 38. 102; गोलः ...। सीसस्य लघुनालार्थे ह्यन्यधातुभवोऽपि वा ŚukraNī. 4 (7). 204; 3 (Gr.) another verbal root अन्यधातुव्यवच्छेदार्थम् एतत् Nyās. i. 295. 18 (*on* i. 4. 51); नटस्य गाथां शृणोतीत्याद्यन्यधातुव्यवच्छेदार्थं परिगणनं करोति Prasā. i. 387. 15; 4A (Mus.) composition of melody by other कुट्टिकारोऽन्यधातौ तु मातुकारः प्रकीर्तितः SaṁgīRa. ii. 151. 10 (3. 12); 4B dissimilar or different tonal composition उद्ग्राहश्चान्यधातुः स्याद्ध्रुवकश्चान्यधातुकः। मेलापकोऽन्यधातुः स्यादाभोगश्चान्यधातुकः। चतुर्धातुकमेतद्धि रूपकं कीर्त्यते बुधैः ŚārṅgaPa. 2035.

अन्यधातुक (anyadhātu-ka) *adj.* having dissimilar or different tonal structure or composition स प्रलम्भो ध्रुवस्थाने यत्रोद्ग्राहोऽन्यधातुकः SaṁgīRa. ii. 265. 1 (4. 171); उद्ग्राहश्चान्यधातुः स्याद्ध्रुवकश्चान्यधातुकः ŚārṅgaPa. 2035.

अन्यधातुज (anyadhātu-ja) *adj.* made of different metal लोहसारमयं वापि नालास्त्रं ह्यन्यधातुजम् ŚukraNī. 4 (7). 205.

अन्यधातुत्व (anyadhātu-tva) *n.* the state of having dissimilar tonal structure or composition केनापि रूपकं गीतं निजादन्येन धातुना। येन तस्यान्यधातुत्वाद्भ्रञ्जनीसंश्रितं मतम् SaṁgīRa. ii. 346. 17 (4. 371)

अन्यधान्ययुत (anyadhānya-yuta) *adj.* mixed with other grains जन्तुजुष्टं जले मग्नम् ...। अन्यधान्ययुतं हीनवीर्यं जीर्णतयापि च। धान्यं त्यजेत् AṣṭāSaṁ. i. 41. 4 (1. 7); AṣṭāHṛ. i. 6. 139.

अन्यधान्यवत् (anyadhānya-vat) *adv.* like other grains क्षेत्रेषु सिक्तेपूप्यन्ते गोधूमा अन्यधान्यवत् PariPar. 2. 364.

अन्यधामन् (anya-dhāman) *adj.* [P. iv. 1. 13] having a distinguished or extraordinary lustre देवी दुरीरन्दममरतनता नन्दिनोमान्यधामा SaraKaṇṭhā. 285. 16.

अन्यधामा (anya-dhāmā) *adj. (f.)* [P. iv. 1. 13] having a distinguished or extraordinary lustre देवी दुरीरन्दममरतनता नन्दिनोमान्यधामा SaraKaṇṭhā. 285.16.

अन्यधारण (anya-dhāraṇa) *n.* act of holding by another person धारयेदिति च प्रयोजकत्वेनाप्युपपत्तेरन्यधारणेऽपि कमण्डलोरविरोधः BālaKrī. i. 107. 3 (*on* 1. 132)

अन्यधार्मिक (anya-dhārmika) *m.* 1 heretic अन्यधार्मिकाः – शाक्यादयः SthānṬ. 164A. 9; 2 house-holder अन्यधार्मिकाः ... गृहस्था वा SthānṬ. 164A. 9.

अन्यधिक्करण (anya-dhikkaraṇa) *n.* disregarding other person अथ गर्वः। अन्यधिक्करणादात्मोत्कर्षो गर्वो बलादिजः PratāYaBhū. 252. 7.

अन्यधी (anya-dhī) *adj.* devoted to different (god) सर्व एव यजन्ति त्वां सर्वदेवमयेश्वरम्। येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो BhāgP. x. 40.9 [one whose mind is alienated, MW; whose mind is turned away from God, APTE]

अन्यधी (anya-dhī) *f.* 1A knowledge of another thing or object कश्च शुक्त्यग्रहो नाम ग्रहाभाव उतान्यधीः IṣṭaSi. 271. 13; अन्यशब्दोऽन्यत्र वर्तमानः प्रथमं तावदन्यधियमुत्पादयति TātpaṬ. (Vā.) 479. 13 (*on* ii. 2. 65); ऐक्यसाधर्म्यवैधर्म्यभावैः स्यादेकतोऽन्यधीः NyāySiA. 227. 24; 1B knowledge of another person प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः। प्रमाणान्तरसद्भावः प्रतिषेधाद्य कस्यचित् TarkBhā. (Mo.) 4.7; 2 knowledge of the rest तदवच्छित्तये नालं प्रत्यग्बोधाद्दतेऽन्यधीः BṛĀraUBhVā. i. 4. 1410; 3 knowledge or notion of difference सुप्तस्य विषयालोको ध्यायतो वा मनोरथः। नानात्मकत्वाद्विफलस्तथा भेदात्मधीर्गुणैः(v.l. अन्यधीर्गुणैः) BhāgP. xi. 10. 3; 4 different impression or idea परिणामविशेष॰ ... ॰विटपादिरेष पन्थाः। कुरुतेऽन्यधियं चिरेण दृष्टः प्रवसन्मर्त्यः इवादिकाल इव RasSa. 58.

अन्यधीनिषेध (anyadhī-niṣedha) *m.* prohibition of the knolwedge of another person व्यवस्थान्यधीनिषेधानां सिद्धेः प्रत्यक्षेतरप्रमाणसिद्धिः PramāMī. i. 1. 11.

अन्यधीपरिच्छेदा (anyadhī-paricchedā) *adj. (f.)* delimited by, i.e. distinguished from the knowledge of other स्मृतिर्भवेदतीते च सा गृहीते कथं भवेत्। स्याद्यान्यधीपरिच्छेदा भिन्नरूपा स्वबुद्धिधीः PramāVār. 3. 179.

अन्यधीमात्र (anyadhī-mātra) *n.* knowledge of another thing in general मुमुक्षोः ... ब्रह्मनिर्विकल्पस्य अन्यधीमात्रविरोधित्वं सर्वसंमतम् GuruCandr. i. 363. 10.

अन्यधीसापेक्षत्व (anyadhīsāpekṣa-tva) *n.* the state of being expectant or dependent on the knowledge of another नीलान्तरापेक्षयातिशयत्वादिरूपेण ज्ञाने

अन्यधीसापेक्षत्वेऽपि तत्स्वरूपनिष्ठानवच्छिन्नविषयताशालिज्ञाने न तत् LaCandr. 791. 33.

अन्यधीहेतु (anyadhī-hetu) *m.* **1** cause of another knowledge न चानवस्था अस्ति किं चित्प्रमाणं यस्त्वज्ञानेनान्यधीहेतुः, यथा धूमादिः TātpaṬ. (Vā.) 370. 5 (*on* ii. 1. 16); **2A** cause of the knowledge of another person स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः VyaktiVi. 15. 8; **2B** cause of the knowledge of another thing एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया SāhiDa. 58. 8 (comm. अन्यस्यार्थान्तरस्य धीहेतुर्बोधोपायः)

अन्यधीह्नुति (anyadhī-hnuti) *f.* denial of, i.e. contradiction with knowledge of another thing or difference आत्मनोऽस्य चेद्धर्मा अस्थूलत्वादयो मताः। अज्ञेयत्वेऽस्य किं तैः स्यात् आत्मत्वे ह्यन्यधीह्नुतिः UpadeSā. 141.1; अनात्मत्वेऽस्य किं तैः स्यादात्मत्वे त्वन्यधीह्नुतिः TaiUBhāVā. 58. 10 (2)

अन्यधृत (anya-dhṛta) *adj.* worn or used by another person वस्त्रोपानहमाल्योपवीतान्यधृतानि न धारयेत् ViṣṇuSm. 71. 47; न रक्तमुल्बणं चान्यधृतं वासो बिभृयात् GautDS. i. 9. 5; KūrmaP. 548. 11 (2. 15); वस्त्रं नान्यधृतं धार्यं न रक्तं मलिनं तथा ViṣṇuDhaP. ii. 89. 4; ब्रह्मसूत्रं यज्ञोपवीतमन्यधृतं सर्वथा न धारयेत् VīraMi. 89. 17 (*on* 1. 29); **(used as noun)** (that) which is worn by another person विपर्ययं न कुर्वीत वाससो बुद्धिमान्नरः। तथा नान्यधृतं धार्यं न चापदशमेव च MahāBhā. xiii. 107. 78; अन्यधृतं तु प्रक्षाल्य कामं बिभृयात् Aparā. 173. 6 (*on* 1. 131a)

अन्यधेनु (anya-dhenu) *f.* one cow अन्यधेनुमेव अन्यवत्सेन तद्धेनुदोहाशक्तौ व्यवस्थितविकल्पः HārLa. 139. 5.

अन्यध्यान (anya-dhyāna) *n.* **1** thought of another person ये च वीरासनारूढा ये च मञ्चकस्थिताः (v.l. चान्यध्यानसंस्थिताः)। शृण्वन्ति सत्कथां ते वै भवन्त्यनृजुपादपाः SkandP. iii (3). 22. 36; **2A** meditation or contemplation on one नह्यन्यध्यानमन्यज्ञानौन्मुख्यमुत्पादयति BrahmSūBh. (Rā.) 156. 12 (*on* i. 1. 4); **2B** meditation or contemplation on something else भवत्यन्यध्यानात् क्वचिदपि न हि प्राप्तिरन्वेक्षणस्य क्षये पापौघानां प्रभवति न च ध्यानमन्यावलम्बनम् NayaMañ. I. iii. 4. 8.

अन्यध्रुव (anya-dhruva) *m.* other polar star, i.e. pole of ecliptic ध्रुवस्याधःस्थितत्वेऽन्यध्रुवस्योर्ध्वस्थितत्वं भवति SiddhāTaVi. (ŚeṣaVā.) 43. 20.

अन्यध्रुष् (anya-dhruṣ) *adj.* who offends other निकृतः स्याद्विप्रकृतोऽन्यध्रुट् स्वस्थानगोऽपि सः KośaKaTa. 2. 150.

अन्यध्वंस (anya-dhvaṃsa) *m.* destruction of another entity अतो अन्यजन्म विनाप्यन्यध्वंसः स्यात् IṣṭaSi. 368. 5.

अन्यध्वजारोह (anyadhvajāroha) *m.* act of raising another flag विना त्वन्यध्वजारोहमुत्सवं परिकल्पयेत्। तत्राप्यन्यध्वजारोहं कुर्याद्वा विभवे सति PāraS. 16. 39.

अन्यनक्त (anya-nakta) *n.* vow of eating only at night pertaining to other deity (than Viṣṇu) अन्यनक्तं तु संक्रान्त्यादावपि रात्रावेव NirṇaSi. 16.2.

अन्यनक्षत्रवत् (anyanakṣatra-vat) *adv.* like (that on) other constellation तेनानिषिद्धं पुनर्वस्वोरूपनयनमन्यनक्षत्रवद्भवत्येव BālamBha. i. 61. 17 (*on* 1. 14)

अन्यनगर (anya-nagara) *n.* another town or city दैवज्ञाः ...। ततोऽन्यनगरेभ्यश्च भृत्यराष्ट्रेभ्य एव च। ... प्राचुर्येणाभ्युपागमन् MārkP. 109. 41; एषोऽचलत्ततः। पुरस्कृत्य सुतौ शून्यमुखोऽन्यनगरं प्रति PārśvC. 2. 794.

अन्यनतभ्रू (anya-natabhrū) *f.* another (beautiful) woman (*lit.* another one having arched eyebrows) स्पृशति भर्तरि हृत् हृदयेशयः सचकितं मदनोऽन्यनतभ्रुवः। समुदतिष्ठदसंशयमत्रुटन् इतरथा किमु कञ्चुकसंधयः HammīMaKā. 7. 66.

अन्यनदी (anya-nadī) *f.* ordinary river पश्यन्ति मोहिता विष्णो गङ्गामन्यनदीमिव SkandP. iv. 27. 54.

अन्यनमस्कार (anya-namaskāra) *m.* salutation to other (than deity) अन्येऽपि भगवत्समक्षमन्यनमस्कारः देवं पृष्ठतः कृत्वा अवस्थानम् ... इत्यादयोऽपराधा अन्यतोऽनुसंधेयाः VīraMi. (Pūjā.) 191. 13.

अन्यनर (anya-nara) *m.* **1** other, i.e. third or neutral person तेनान्यनरसादरम्। सा दरं पृतना निन्ये हीयमाना रसादरम् ŚiśuVa. 19. 23 (comm. अन्येषां तटस्थानामपि नराणाम्); 2 one person क्षणभङ्गिषु भावेषु प्रत्यभिज्ञा च दुर्घटा। न ह्यन्यनरदृष्टेऽर्थः प्रत्यभिज्ञायते परैः TattvSaṁ. 493; 3 other person (than husband) रूपोत्तमान्यनरलोचनगोचरेषु। यस्या न सन्ति सुतरां कथितेङ्गितानि कान्तासु सैव गृहिणी बहुमाननीया NāgaSa. 15.14; ललनाया नायातः स्मृतिपथमपि पत्युरन्यनरः ŚṛṅgāMañ. (A.) 3. 18.

अन्यनरपति (anya-narapati) *m.* another king भगवत्पादः ... अपरान्तादिदेशपतिः ... अन्यनरपतिप्रतिविशिष्टः ... श्रीमहाराजव्याघ्रसेनः EI. xi. 220.5.

अन्यनरसंसक्ता (anyanara-saṃsaktā) *adj.* (*f.*) attached to other person (than husband) पुरान्यनरसंसक्ता चण्डी ... ददौ पुत्राय मोदकम् BṛKathāMañ. xiii. 1. 110.

अन्यनरसक्ति (anyanara-sakti) *f.* attachment to other person (than husband) शीलक्षतये यासां तासामतिरागतोऽन्यनरसक्तिः KuṭṭaMa.509.

अन्यनरसंगता (anyanara-saṅgatā) *adj.* (*f.*) united sexually with other person (than husband) उद्यानमथ संप्राप्य तामन्यनरसंगताम्। दृष्ट्वैव जीवितत्यक्तां रागी प्रायात्स पञ्चताम् BṛKathāMañ. ix. 2. 1138.

अन्यनरागम (anyanarāgama) *m.* (sexual) approach of other person (than husband) मूर्तिर्जाया च सत्येव राज्यो यान्यनरागमे। निष्फला सकला चैव सद्यः स्वपतिसंगमे PārśvC. 3. 307.

अन्यनरासक्ता (anyanarāsaktā) *adj.* (*f.*) attached to other person (than husband) गूढमन्यनरासक्तां निजजायां ददर्श सः BṛKathāMañ. vii. 1. 593.

अन्यनरेन्द्र (anya-narendra) *m.* another king कुमारः ... कनकधातून् ... रूप्यधातूनन्यनरेन्द्रप्रार्थनीयानभिज्ञोऽपि सत्रकौतुकमवलोकमानः ... कमपि चीरवाससं ददर्श AvantiKa. 225. 15; एवं नृपस्यान्यनरेन्द्रपुर्यां व्यामिश्रयोगेन सुखासुखेन। कालोऽगमत् VarāṅgaC. 16. 3.

अन्यनश्य (anya-naśya) *adj.* to be destroyed by any other (means) पापमूलानि दुःखानि विविधान्यपि तान्यतः। शिवार्चनैकनश्यानि नान्यनश्यानि सर्वथा ŚivaP. ii (1). 4. 46 (41B. 6)

अन्यनाग (anya-nāga) *m.* **A** another elephant प्रत्यन्यनागं चलितः ... अरोधि द्विरदो निषादिना ŚiśuVa. 12. 12; **B** another, i.e. rival elephant क्रुध्यन् गन्धादन्यनागाय ... नागः पर्यणंसीत् स्व एव ŚiśuVa. 18. 27 (comm. प्रतिगजाय)

अन्यनागाधिरूढ (anyanāgādhirūḍha) *adj.* mounted on another, i.e. rival elephant तूर्णं यावन्नापनिन्ये निषादी वासश्चक्षुर्वारणं वारणस्य। तावत्पूर्णरन्यनागाधिरूढः कादम्बानामेकपात्रैरसीव्यत् ŚiśuVa. 18. 29.

अन्यनागाभियुक्त (anyanāgābhiyukta) *adj.* affected by another, i.e. rival elephant आत्मानमेव जलधेः प्रतिबिम्बिताङ्गमूर्मौ महत्यभिमुखापतितं निरीक्ष्य। क्रोधादधावदपभीरतितूर्णमन्यनागाभियुक्त इव युक्तमहो महेभः ŚiśuVa. 5. 32.

अन्यनाडि (anya-nāḍi) *f.* other versal (in the body) सुषुम्नायामन्यनाडीः प्राणवायुनैकीकृत्य ...। शिवविषयान् षड्गुणानापादयेत् ĪśānŚiPa. ii. 18. 120(9)

अन्यनाडी (anya-nāḍī) *f.* other vessal in the body सुषुम्नायामन्यनाडीः प्राणवायुनैकीकृत्य ... शिवविषयान् षड्गुणानापादयेत् ĪśānŚiPa. ii. 18. 120(9)

अन्यनाथ (anya-nātha) *m.* another lord or master लग्नपतिः सहजनवमस्थेन कुरुते यदीत्यशालं तदान्यनाथो भवेत्प्रष्टुः TājiNī. iii (1). 5. 58 (345)

अन्यनाद (anya-nāda) *m.* different, i.e. inauspicious sound पिङ्गः ...। कुर्वन् शान्ते शुभादन्यनादं शंसत्यशोभनम् Mānaso. ii. 13. 917.

अन्यनानालेख्य (anya-nānālekhya) *n.* other various paintings तदाज्ञया विमुच्यान्यनानालेख्यं मनोरमम्। यस्मिंश्चित्रद्वयं चित्रं कृतं चित्रकरैः परम् KathāKau. 13. 56.

अन्यनाभि (anyá-nābhi) *adj.* [P.vi. 2.1] **(used as noun)** (one) hailing from another family, i.e. unrelated मेमं सनाभिरुत वान्यनाभिर्मेनं प्राप्नुत्पौरुषेयो वधो यः AV. i. 30.1 (Sāy. असमानजन्मा। ... अज्ञातिरूपः शत्रुः); AV. (P.) i. 14.1.

अन्यनामग्रहण (anyanāma-grahaṇa) *n.* taking, i.e. uttering other's name नान्यं नमामि गौरीश नान्याख्यामाददे शिव। मूकोऽन्यनामग्रहणे बधिरोऽन्यकथाश्रुतौ SkandP. iv. 63. 63.

अन्यनामता (anyanāma-tā) *f.* the state of having another name सामानाधिकरण्येन स्यादेकस्यान्यनामता NyāyMāVi. 54. 14 (*on* i. 4. 13)

अन्यनामन् (anya-nāman) *n.* **1** name of another (lady, i.e. co-wife) हृतायाः प्रतिसखि कामिनान्यनाम्ना ŚiśuVa. 8. 42 (comm. कामिना प्रियेणान्यस्याः सपत्न्या नाम्ना अन्यनाम्ना); 2 [Inst.] by another name अन्यनाम्ना प्रविष्टानां कलहे कूटकामिनाम् SamaMā. 3. 21; श्रीवाक्पतिः ...। जातस्तस्माद्वैरिसिंहोऽन्यनाम्ना लोको ब्रूते वज्रट स्वामिनं यम् EI. i. 235. 12.

अन्यनामन् (anya-nāman) *adj.* [*f.*-mnī] **A** having another name युगे युगेऽन्यनाम्नी सा कलायुज्जयिनीति च SkandP. iv. 7. 92; परान्तकः ... सः ...। करिकालान्यनामानमादित्यमुदपीपदत् EI. xxii. 240. 55; **B** called, i.e. functioning as a synonym of *anya* इतरोऽन्यनामा त्रिषु पामरे च KośaKaTa. 2. 7926.

अन्यनामसहस्र (anya-nāmasahasra) *n.* another set of thousand names यथास्य पठनाद्देवी प्रीयते ललिताम्बिका। अन्यनामसहस्रस्य पाठात्र प्रीयते तथा LalitāSa. 20.

अन्यनायिका (anya-nāyikā) *f.* another heroine or lady जिघ्रन्ती मृगमदचन्दनानुलेपं कान्ताङ्गस्थितमिदमन्यनायिकायाः। मत्वेति प्रियमवमत्य ŚṛṅgāMañ. (A.) 28.19.

अन्यनायिकापराङ्मुख (anyanāyikā-parāṅmukha) *adj.* detached from or disinterested in another heroine or lady सर्वदान्यनायिकापराङ्मुखो भार्यायामेवानुक्षणमनुरक्तोऽनुकूलः PadyaVe. 398. 4.

अन्यनायिकासक्तत्व (anyanāyikāsakta-tva) *n.* the state of being attached to or intent on another heroine or lady पत्युरन्यनायिकासक्तत्वेऽनुकूलत्वाभावे नायकापराधस्य नायिकाकोपेहतुत्वेन कोपेत्पत्तौ ... स्वाधीनपतिकात्वमेव व्याहन्यते ŚṛṅgāMañ. (A.) 15. 17.

अन्यनारी (anya-nārī) *f.* 1 other woman स चापि तां प्राप्य ... न चान्यनारीषु मनो दधे MahāBhā. i. 40. 9; सदनेऽथ सुनन्दाया जग्मतुस्तौ ... । तस्यास्तावन्यनारीभिर्द्वार्यायातौ निवेदितौ PariPar. 12. 37; अन्यनारीरूपगर्वहरा केयं कुलाङ्गना UttaKuC. 215; शक्तौ स्वयमभियोगो युक्तः कन्यासु चान्यनारीषु KandaCū v. 2.3; 2 ordinary or common woman मद्विधानामन्यनारीणां मलशोधनाय देवो हुताशः एव मे शरणम् AvantiKa. 122. 15; असूर्यंपश्यानामपि यद्राजयोषिताम्। शीलभङ्गो भवत्येवमन्यनारीषु का कथा PariPar. 2. 561; 3 co-wife उद्दीक्ष्य प्रियकरकुङ्कुमपविद्धैर्वक्षोजद्वयमभिषिक्तमन्यनार्याः। अम्भोभिर्मुहुरसिचद् वधूरमर्षात् ŚiśuVa. 8. 37 (comm. सपत्न्याः); प्रियेणालि बतान्यनार्यै मदीयनामानि समर्पितानि ŚṛṅgāMañ. (A.) 27. 22

अन्यनारीगात्र (anyanārī-gātra) *n.* body or limb of co-wife काचिदङ्गेऽन्यनारीगात्राल्लग्नं वल्लभस्याङ्गरागम्। क्रीडाव्याजात् ... उन्मार्ष्टि स्म स्मेरवक्त्राम्बुजश्रीः HarVi. 18. 27.

अन्यनारीजनित (anyanārī-janita) *adj.* made or produced by co-wife करजदशनचिह्नं नैशमङ्गेऽन्यनारीजनितमिति सरोषामीर्ष्यया शङ्कमानाम्। स्मरसि न खलु दत्तं मत्तयैतत् त्वयैव स्त्रियमनुनयति ... विलासी ŚiśuVa. 11. 37; SūktiMu. 85. 7.

अन्यनारीदुराप (anyanārī-durāpa) *adj.* difficult to attain for other woman अनवद्यगुणकलापैरन्यनारीदुरापैरनुसृतनिजचित्तम् ... मुहुरमान्तीमन्तरानन्दवृद्धिम् YātrāPra. 5. 132.

अन्यनारीपरिग्रह (anyanārī-parigraha) *m.* act of accepting, i.e. marrying other woman तत्कथं तामपास्याद्य विशालतनयामहम्। नृशंसानां करिष्यामि अन्यनारीपरिग्रहम् MārkP. 127. 30.

अन्यनारीभुजोत्पीड (anyanārī-bhujotpīḍa) *m.* pressing of the arm by other woman अन्यनारीभुजोत्पीडात्कस्याश्चित्सकवाटके। कञ्चुकेऽभ्युन्नतो रेजे स्तनांशः सघनेन्दुवत् PadmP. (Ra.) 103. 90.

अन्यनारीसमुद्भूत (anyanārī-samudbhūta) *adj.* arising from or made by (union with) other lady अन्यनारीसमुद्भूतं चिह्नं यस्य न दृश्यते। अधरे वा शरीरे वा स कान्त इति भाष्यते NāṭyaŚā. 22. 305.

अन्यनारीसुत (anyanārī-suta) *m.* son of ordinary or common woman नान्यनारीसुतैर्यातं वर्त्म यात्विति पार्थिव MārkP. 44. 13.

अन्यनारीस्तनमर्दन (anyanārīstana-mardana) *n.* act of crushing or rubbing of the breast of other woman कृपाणग्रहणप्रवीणः[।] विवर्जयामास विगर्हितानि तस्य[ा]न्यनारीस्तनमर्दनानि EI. i. 106. 22.

अन्यनाश (anya-nāśa) *m.* 1 destruction of the rest वर्तमानं जगत् सर्वं मुहूर्तात्र भविष्यति। अन्यनाशेन जगतो लोकस्य च परंतप MahāBhā. v. 480* (2); 2 destruction of other (sciences) शास्त्रमिदं पठनीयं न तु केवलमन्यनाशाय KandaCū. v. 6. 47.

अन्यनास्तिता (anya-nāstitā) *f.* absence of another (object) स्वरूपमात्रं दृष्ट्वापि पश्चात् किं चित् स्मरन्नपि। तत्रान्यनास्तितां पृष्टस्तदैव प्रतिपद्यते ŚlokaVār. 5 (8). 28 (483. 2); SarvaDaKau. 98. 27.

अन्यनिकायभव (anyanikāya-bhava) *adj.* belonging to other aggregates or groups एषां हि सर्वत्रगाणां प्रभावेण अन्यनैकायिका अन्यनिकायभवाः क्लेशा रागादय उपजायन्ते Sphuṭā. ii. 138. 11 (*on* 2. 54)

अन्यनिकेतन (anya-niketana) *n.* house of another person उत्सवे लोकयात्रायां तीर्थेष्वन्यनिकेतने। न पत्नीं प्रेषयेत् प्राज्ञः MahNirvāT. 8.43.

अन्यनिघ्न (anya-nighna) *adj.* (used as noun) (word) devoted to another (substantive), i.e. adjective परवांश्च परायत्तः पराधीनोऽन्यनिघ्नवत् KośaKaTa. 2. 99.

अन्यनितम्बिनी (anya-nitambinī) *f.* another lady (*lit.* woman with large and beautiful hips) आस्तामन्यनितम्बिनी रतिरपि त्रासान्न पौष्पं करे PrabaCin. 40. 23.

अन्यनिधन (anya-nidhana) *n.* death of other भ्रातः पञ्जरलावक मा कुरु संतोषमन्यनिधनेन। प्रातस्त्वैव धातुर्वामत्वं किं न जानासि ŚārṅgaPa. 1206.

अन्यनिधिवत् (anyanidhi-vat) *adv.* like other treasures ब्राह्मणस्थापितनिधिम् ... नापि शत्रवो हरन्ति, अन्यनिधिवद् भूम्यादिस्थापितः कालवशात् न नश्यति ManvaMu. 262. 8 (*on* 7. 83)

अन्यनिनद (anya-ninada) *m.* other sound तमन्तर्धाय निनदं (v.l. अन्तर्धायान्यनिनदं) ध्वनिर्भीमस्य नर्दतः। अश्रूयत महाराज सर्वसैन्येषु MahāBhā. vii. 104. 32.

अन्यनिन्दक (anya-nindaka) *m.* blamer or censurer of another विदूषकोऽन्यनिन्दके AnekāSaṁ. 4. 33.

अन्यनिन्दा (anya-nindā) *f.* 1 act of blaming or censuring one प्रकरणार्थे व्यवस्थिते तत्तुल्यभिप्रायेणाविद्वन्मतान्तरनिन्दोपन्यासः। अन्यनिन्दा अन्यस्तुतये BṛĀraUBh. 91. 5 (*on* i. 4. 6); यत्र ... अन्यनिन्दयान्यनिन्दायाश्च प्रतीतिस्तत्र ... अप्रस्तुतप्रशंसा न वक्तव्या Kuval. 72 (7); अन्यनिन्दापादनद्वारान्यस्तुतिपरं प्रथमवाक्यम् LaCandr. 717. 36; पादपस्तुतौ न व्याजस्तुतित्वम् ... अन्यनिन्दायां वान्यनिन्दायां गम्यमानायां नास्या अलंकृतेर्विषयः RasGaṅ. 561.12; व्याजस्तुतिः ... अन्यनिन्दयापरस्य स्तुतिः AlaṅkāMañ. 113.7; 2 act of blaming or censuring another सत्यां वाचं वदति कुरुते नात्मशंसान्यनिन्दे SubhāRaSaṁ. 455 कूटमानतुलाकर्मान्यनिन्दात्मप्रसंसनम्। ... अशुभस्य नाम्न आश्रवाः TriṣaŚaPuC. iii. 7. 119; iv. i. 301; प्रत्यनीकम्। ... व्याजस्तुतेर्भेदः। ... इह त्वन्यनिन्दया बलवत्स्तुतिः AlaṅkāRa. 40(4); अज्ञत्वमन्यनिन्दासु यतोऽपि जितषड्रिपून्। ... कर्मन्दिनः प्रणम्यैप गाहते स्म महोन्नतिम् YātrāPra. 3. 53; Kuval. 72(7); RasGaṅ. 561. 12.

अन्यनिन्दांश (anyanindāṁśa) *m.* part or aspect of blaming another विधेयस्तुत्यंशेनान्यनिन्दांशेन वा NyāySu. (So.) 9. 32 (*on* i. 2. 2)

अन्यनिन्दापटीयस् (anyanindā-paṭīyas) *adj.* skilled in blaming others वीरंमन्यतया हृप्तानन्यनिन्दापटीयसः। स तानवज्ञया पश्यन् PāṇḍaC. 1. 313.

अन्यनिपान (anya-nipāna) *n.* another reservoir of water तत्रावग्रहशुष्केऽन्यनिपाने गजयूथपः। ... अम्भः पातुमागात् कदाचन KathāSaSāg. x. 6. 30.

अन्यनिबन्ध (anya-nibandha) *m.* 1 another literary work शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनम्। विलोक्यान्यनिबन्धांश्च कार्यः काव्यक्रियादरः Kāvyālaṅ. (Bh.) 1. 10; 2 another digest or compendium of law 'दिवैव योगः ... कदाचन' इति। इदमर्धमन्यनिबन्धेष्वभावान्निर्णयामृतमात्रोक्तेर्निर्मूलमेव NirṇaSi. 157. 27.

अन्यनिबन्धकार (anya-nibandhakāra) *m.* another composer or author अन्यनिबन्धकारैरत्र दृश्याद् वेति पूर्वत्रैव विकल्पपरतया व्याख्यातम् BālamBha. ii. 154. 16 (*on* 2. 122)

अन्यनिबन्धन (anya-nibandhana) *adj.* [*f.*–ā] having another cause, caused by something else भिन्नरूपयोश्च संबन्धोऽन्यहेतुको दृष्टः। तेनात्राप्यन्यनिबन्धनेन तेन भवितव्यम् Śarka. 10.3; प्रकृतित्वनिबन्धना हि पञ्चमी नान्यनिबन्धना PañcPā. 77. 6 (*on* i. 1. 2)

अन्यनिबन्धनत्व (anyanibandhana-tva) *n.* the state of having another cause न चाविधेयत्वेऽर्थविचारो निर्निबन्धनस्यादिति वक्तुं शक्यम्, अन्यनिबन्धनत्वादर्थविचारस्य NītiMā. 4. 9.

अन्यनिमन्त्रणादि (anyanimantraṇādi) *adj.* second invitation etc. (अतिक्रामन् पापः सूकरतां व्रजेत्) कथंचिदन्यनिमन्त्रणादिनापि अतिक्रामन् तस्य गृहेऽनश्नन् ManvaVi. 394. 27 (*on* 3. 190)

अन्यनिमित्त (anya-nimitta) *n.* 1 any other cause विषयेषु पूर्वप्रत्यक्षविलक्षणानामुत्पत्तावन्यनिमित्ताभावाद् यदत्र निमित्तं स कालः PadārthaSaṁ. 63.17; 2 other sign साधकस्य न तत्रास्ति शुभं किंचित् पितामह। यदि वान्यनिमित्तानि शुभानि च महान्ति च ParaS. 9. 40; 3 another cause (of word-usage) यत्राप्यन्यनिमित्तं नास्ति तत्रापि स्वरूपमेव निमित्तमादाय वाच्ये प्रवर्तते Prasā. i. 590. 9.

अन्यनिमित्त (anya-nimitta) *adj.* [*f.*–ā] having another cause, caused by something else अतदात्मकेष्वन्यनिमित्तः प्रत्ययो भवति PadārthaSaṁ. 322. 11; अन्यनिमित्तमयुगपद्ग्रहणम् NyāyVār. 84. 20 (*on* i. 1. 16); न हि अग्नेः उष्णस्वाभाव्यम् अन्यनिमित्तम् BṛĀraUBh. 521.16 (*on* iv. 3. 6); अप्रमाणज्ञानं

त्वन्यनिमित्तमिति व्यवस्थापयितुम् आद्ययोर्नायथार्थत्वमिच्छामि IṣṭaSi. 44. 11; 266. 20; गुरौ क्रोधासंभवादन्यनिमित्तेऽपि क्रोधे पूजाकाले तत्त्यागेन चित्तप्रसादोऽभिधीयते ManuBh. i. 182. 1 (*on* 2. 202); अङ्कुरस्य हि जातिप्रतिनियमो न तावन्निर्निमित्तः ... । नाप्यन्यनिमित्तः ĀtmaTaVi. 97. 94; 662. 3; प्राच्यादिसमाख्या हीयं प्रादेशसंयोगनिमित्ता स्यात्। अन्यनिमित्ता वा MīmāKau. i. 104. 5 (*on* i. 3.19); किंनिमित्तमेतयोर्व्यतिकरः। किं ब्रवीषि। किमन्यनिमित्तोऽयं गणिकामन्तरेणेति VasaTi. 23.11.

अन्यनिमित्तक (anyanimitta-ka) *adj.* 1 having another cause, caused by something else यत्र निमित्तसंपातो भवति तत्र किमन्यनिमित्तको भक्षः समुच्चीयते अथ विकल्प्यते TantrVā. 1055.3 (*on* iii. 5.33); करणव्यवहारस्त्वन्यत्र यद्यप्यन्यनिमित्तकोऽपि तथापीहोक्तनिमित्तविवक्षयैव NyāyKuA. ii (2). 29.7; अभ्यासभावना विश्वम् इति ईश्वरताव्यवहारो नान्यनिमित्तकः PratyabhiVi. ii. 145.1 (*on* ii. 3. 17); करणव्यवहारस्तु अन्यत्र यद्यप्यन्यनिमित्तकः ... अयोगव्यवच्छेदेन जनकत्वनिमित्तक इति वर्धमानाः GuruCandr. i. 163.12; 2 having one purpose अन्यनिमित्तके वस्तुन्यन्यनिमित्तकत्वारोप उत्प्रेक्षा AlaṅkāŚe. 13. 0 (2); 3 having another purpose, cf. अन्यनिमित्तकत्व **2.**

अन्यनिमित्तकत्व (anyanimittaka-tva) *n.* 1 the state of having another cause चेतनप्रेरणं यदि न निमित्तीकुर्यात् व्यापकविरुद्धमनिमित्तकत्वं (v.l. °मन्यनिमित्तकत्वं) प्रसज्येत PratyabhiVi. ii. 166.5 (*on* ii. 4.9); 2 the state of having another purpose अन्यनिमित्तके वस्तुन्यन्यनिमित्तकत्वारोप उत्प्रेक्षा AlaṅkāŚe. 13. 0 (1)

अन्यनिमित्तकथोदय (anyanimittakathodaya) *adj.* arising from the conversation having another cause अभिमुखे मयि संवृतमीक्षितं हसितमन्यनिमित्तकथोदयम्। ... तया न मदनो विवृतो न च संवृतः Śāk. 2.12; SubhāRaK. 17. 41; SūktiMu. 43. 8.

अन्यनिमित्तकसादृश्य (anyanimittaka-sādṛśya) *n.* similarity caused by something else दयाविरहे काठिन्याभेदाध्यवसायेन कुलिशचित्तयोः सादृश्यप्रतीतिः अन्यनिमित्तकसादृश्यस्याप्रसिद्धेः AlaṅkāKau. (Vi.) 47.10.

अन्यनिमित्ततस् (anyanimitta-tas) *adv.* on account of another cause पतत्यश्वत्थपातस्तु पाकेऽप्यन्यनिमित्ततः BṛĀraUBhVā. iv. 3. 1937.

अन्यनिमित्तता (anyanimitta-tā) *f.* the state of having another cause, the state of being caused by something else क्रिया एकस्य प्रमातुः संबन्धिनी भवति। अन्यनिमित्तताभासनस्यापि ... प्रमातृहेतुतानपायात् Bhāsk. ii. 163.10 (*on* ii. 4. 7)

अन्यनिमित्तत्व (anyanimitta-tva) *n.* the state of having another cause, the state of being caused by something else सान्तरग्रहणादित्यस्य सान्तर इति ग्रहणमित्येतद् व्याख्यानं क्रियते। तदप्ययुक्तम्। सान्तर इति ग्रहणस्यान्यनिमित्तत्वात् NyāyVār. 36.19 (*on* i. 1. 4); 244.13 (*on* ii. 1. 34); अर्थान्तरमेवानित्यता स्यात् अन्यनिमित्तत्वे अनिमित्तत्वे , वा PramāVāSvopVṛ. 13. 26; सिद्धेऽप्यन्यनिमित्तत्वे न सामान्यं प्रसिध्यति TattvSaṁ. 743; वसिष्ठस्यापि यत् पुत्रशोकव्यामोहचेष्टितम्। तस्याप्यन्यनिमित्तत्वात्रैव धर्मत्वसंशयः TantrVā. 134.10 (*on* i. 3. 7); 188.19 (*on* i. 3. 15); सर्वात्मनि ... बुद्ध्याद्यनित्यधर्मा लोकैरध्यारोपिताः ... तदपोहार्थो बोधोपदेशः बोधात्मनः। तत्र च बोधाबोधौ समञ्जसौ। अन्यनिमित्तत्वात् KenUBh. 75. 5 (*on* 1. 4); येषां पुनरीश्वरः अन्य आत्मनः कार्यं च अन्यत् तेषां भयानिवृत्तिः भयस्य अन्यनिमित्तत्वात् TaiUBh. 276. 2 (*on* 2. 8); आत्मनः ... क्रमभावित्वे च निर्निमित्तत्वे अनिर्मोक्षप्रसङ्गः। अन्यनिमित्तत्वे च स्वतः अभावात् अपरमार्थत्वप्रसङ्गः GītāBh. (Śaṅ.) 364.15 (*on* 13. 2)

अन्यनिमित्तत्वशङ्का (anyanimittatva-śaṅkā) *f.* suspicion of being caused by something else अप्रमाणे सहकारितामात्रेण अन्यनिमित्तत्वशङ्कायां कथमुपमानम् TattvCin. iii. 88. 3.

अन्यनिमित्तवश (anyanimitta-vaśa) *m.* [Abl.] on account of another purpose अन्यनिमित्तवशाद् यद् यथा भवेद् वस्तु तस्य तु तथात्वे। हेत्वन्तरमतदीयं यत्रारोप्येत सान्येयम् (उत्प्रेक्षा) Kāvyālaṅ. (Ru.) 9.14.

अन्यनिमित्तसंभव (anyanimitta-sambhava) *m.* possibility of another cause संख्यापरिमाणपृथक्त्वसंयोगविभागगुणवती पूर्वादिप्रत्ययैरनुमेया (दिक्) तेषामन्यनिमित्तसंभवात् TarkBhā. (Ke.) 66. 7.

अन्यनिमित्तासंभव (anyanimittāsambhava) *m.* impossibility of any other cause उत्तरपूर्वेण चाधस्तादुपरिष्टाद्येति दशप्रत्यया यतो भवन्ति सा दिगिति। अन्यनिमित्तासंभवात् PadārthaSaṁ. 66.24; योगिनाम् ... परमाणुषु मुक्तात्ममनस्सु चान्यनिमित्तासंभवाद् येभ्यो निमित्तेभ्यः प्रत्याधारं विलक्षणोऽयं विलक्षणोऽयमिति प्रत्ययव्यावृत्तिर्भवति (तेऽन्त्या विशेषाः) PadārthaSaṁ. 321.20; NyāyKa. 323.14; प्रत्ययात् निमित्तं सिध्यति दिशस्तु कुतः सिद्धिरत आह अन्यनिमित्तासंभवात्

Kiraṇā. 122.17; 124.10.

अन्यनियम (anya-niyama) *m.* **1A** other rules or regulations (of conduct) एतदुक्तं भवति। यथान्यनियमत्यागान्निन्द्यते ManuBh. i. 136.17 (*on* 2. 118); **1B** other regulations or norms (regarding presentation of drama on stage) युते यत्र दृश्या(दृश्ये)ऽन्यनियमादौ चित्तवृत्त्यादौ वा न बाधकोदयः। सम्यगृज्ञानभूतं ह्येवेदं पूर्णम् AbhinBhā.i. 287.18 (*on* 6. 31); 2 another observance स्वयं नियमस्य त्वन्यनियमव्यतिक्रमवत् प्रायश्चित्तेन प्रत्यापत्तिर्युक्ता ManuBh. ii. 265. 27 (*on* 9. 80); क्रोधं ये करिष्यन्ति तेषाम् ... निष्फलाः। जपान्यनियमाद्यैव LiṅgaP. i. 85. 176.

अन्यनिरता (anya-niratā) *adj.* (*f.*) attached or devoted to another person त्यक्त्वैनमन्यनिरता स्वामहमेवैव वा व्रजेत् परतः KandaCū. vi. 5.28.

अन्यनिरपेक्ष (anya-nirapekṣa) *adj.* [*f.* - ā] A not having expectancy for another, independent of another स्मृतिः। बाध्यते तावदत्यन्तं श्रुत्यान्यनिरपेक्षया TantrVā. 89.22 (*on* i. 3.3); 292.8 (*on* i. 4. 3); विस्पष्टं च तद्धितेन यदन्यनिरपेक्षमवगतं तन्मन्त्रानुरोधेन बाधितं न स्यात् TantrVā. 809. 8 (*on* iii. 2. 37); इन्द्रियादिस्वरूपमेव ह्यन्यनिरपेक्षम् TātpaṬ. (U.) 54.7 (*on* 2.47); एककार्यकारिता च अन्त्यक्षणवर्तिनां सहकारिता। ननु तेऽप्यन्यनिरपेक्षा एव जनकाः किमिति न कार्यान्तरमारभन्ते PrakaPañ. 368.7; एतावत्येवैवमुपनिषदुक्तान्यनिरपेक्षा अमृतत्वाय KenUBh. 60.20 (*on* 4.7); यदुपसंहतम् आत्मज्ञानम् ... एतावदेव ... अन्यनिरपेक्षम् BṛĀraUBh. 673.7 (*on* iv. 15.5); वेद एवाधीतोऽन्यनिरपेक्षो धर्मजिज्ञासाया हेतुः PañcPā. 57.17 (*on* i. 1.1); 85.6 (*on* i.1.4); सद्रूपमेव च तत्राभिन्नमन्यनिरपेक्षमवभाति NyāyMañ. ii. 94. 10; ब्रह्मणोऽतिवादित्वश्रुत्यान्यनिरपेक्षया ... शक्यं व्याख्यातुम् Bhām. 201.11 (*on* i. 3.8); एकोऽसहायः। क्वचित् कश्चित् अन्यनिरपेक्षः परिहारः Pradī. vi. 155.10 (*on* vii. 2. 83); प्रयोजकसाध्यमेव भयम्, तथापि विशेषणोपादानसामर्थ्यादिदं विज्ञायते – अन्यनिरपेक्षदृधेतोरेव यद् भयमिति PadMañ. *on* KāśiVṛ. *on* P. i. 3. 68 (475.14); ब्रह्मण्येवान्यनिरपेक्षानाद्यध्यासप्रवाहवैचित्र्येण सर्वाध्याससिद्धेः ŚatDū. 175. 8; स्वतन्त्रो ह्यन्यनिरपेक्षः कार्यं करोति TattvPrakā. 89A.12 (*on* ii. 1. 24); B devoid of syntactic expectancy for another (word) शब्दो यस्मात् पर उच्चार्यते तदर्थमर्थान्तरान्वितमन्यनिरपेक्षे उच्चारितमात्र एवाभिधत्ते MayūMāli. 687.18 (*on* x. 3.11)

अन्यनिरपेक्षज्ञान (anyanirapekṣa-jñāna) *n.* knowledge independent of another न च ज्ञानोत्पत्त्यनन्तरं मोक्षायान्यत् साधनमपेक्षणीयम् ... श्रुतिभिरन्यनिरपेक्षज्ञानस्य मोक्षहेतुत्वसिद्धेः YogVār. *on* 1.1

अन्यनिरपेक्षता (anyanirapekṣa-tā) *f.* the state of not having expectancy for another, the state of being independent of another स्वशास्त्रस्य स्वविषये साकल्येन वृत्तेरन्यनिरपेक्षतामाह ManuBh. i. 47.13 (*on* 1.107); अन्यनिरपेक्षतैव परमार्थत आनन्दः PratyabhiVi. i. 255. 2 (*on* i. 5.13); **[Inst.]** by way of being independent of another स्वयंसिद्धत्वादिति। सत्ताप्रतीत्योः अन्यनिरपेक्षतया सिद्धत्वादित्यर्थः PrakaVi. 593. 21; जीवोऽन्यनिरपेक्षतया कर्ता चेतनत्वात् TattvPrakā. 89A. 9 (*on* ii. 1. 24)

अन्यनिरपेक्षत्व (anyanirapekṣa-tva) *n.* the state of being independent of another सामर्थ्यं चान्यनिरपेक्षत्वे भवति TantrVā. 312.9 (*on* i. 4.16); समासे द्वित्वाद्यनवगमादेकत्वस्यान्यनिरपेक्षत्वात् ... न्यायप्राप्तमेतत् Pradī. ii. 363A. 2 (*on* ii. 1.10); श्वेताश्वतराणां मन्त्रवर्णोऽस्य सृष्ट्यादावन्यनिरपेक्षत्वम् ... प्रतिपादयति VedāntKau. 145.6 (*on* i. 4.26); आप्तमूलकत्वेनान्यनिरपेक्षत्वाच्चतुर्दशस्मर्तारो मन्वादय आप्ततराः VedāntRaMañ. 1. 4 (61. 7)

अन्यनिरपेक्षम् (anyanirapekṣam) *adv.* without expectancy for another, independently कालेऽवगतं किंतु चक्षुरादिवदन्यनिरपेक्षो (v.l. °निरपेक्षं) यथावगतं PañcPā. 85.6 (*on* i. 1. 4); यत्र च सामर्थ्यं च शब्दो विज्ञानं जनयति GītāBh. (Rā.) 338. योग आत्मना मनसात्मानं पश्यन्नन्यनिरपेक्षमात्मन्येव तुष्यति यद् भवद्भिर्‌ 6 (*on* 6. 20); नित्यमन्यनिरपेक्षमञ्जसा संचरद्भिरखिलासु दिक्ष्वपि। नुभूतमद्भुतं तन्ममाद्य निखिलं निवेद्यताम् Nalābhyu. 3.23.

अन्यनिरपेक्षविहितत्व (anyanirapekṣavihita-tva) *n.* the state of being enjoined independent of another यद्यपि वाक्यैर्नैवामिक्षायागे विधेये देवा विधीयन्ते तथाप्यन्यनिरपेक्षविहितत्वादामिक्षायाः ... बलीयस्त्वं भवेत् TantrVā. 537. 20 (*on* ii. 2. 28)

अन्यनिरपेक्षव्यवहार (anyanirapekṣa-vyavahāra) *adj.* having activity independent of another घटादेरन्यनिरपेक्षव्यवहारत्वसिद्धेस्तावन्मात्रत्वं स्वसंवेदनं फलितमेव ŚatDū. 102. 28.

अन्यनिरपेक्षस्वबल (anyanirapekṣa-svabala) *n.* one's own strength independent of another शक्तिग्रहणसामर्थ्यात् ... अन्यनिरपेक्षस्वबलेनैव हन्तुं वा शक्तिः सा गृह्यते PadMañ. *on* KāśiVṛ. *on* P. iii. 2. 54 (577.14)

अन्यनिरपेक्षस्वभावा (anyanirapekṣa-svabhāvā) *adj.* (*f.*) having one's own nature independent of another स्वाभाविकज्ञानबलादिगुणगणनिकेतभूतान्यनिरपेक्षस्वभावा स्वाश्रया शक्तिः VedāntKau. 211.12 (*on* ii. 2. 44)

अन्यनिरपेक्षानुरञ्जन (anyanirapekṣānurañjana) *n.* act of entertaining indepenent of another द्वौ त्रीन् चतुरो वा एकस्यापि मूलं गच्छेत्। ... तावत्तु दिवसेष्वन्यनिरपेक्षानुरञ्जनेन JayaMa. 343. 2 (*on* 6. 5)

अन्यनिरपेक्षार्थम् (anyanirapekṣārtham) *adv.* for the sake of independence from another (text) प्रकरणाधिकरणसंख्यानमन्यनिरपेक्षार्थम् JayaMa. 9.6 (*on* 1.1)

अन्यनिराकरण (anya-nirākaraṇa) *n.* rejection of another (cause such as Prajāpati) भौतिकगुणानामसंबन्धार्थमेव ह्यध्यायारम्भः। ... अन्यनिराकरणेन तत्प्रतिपादकत्वनिर्धारकाधिकरणानां वैयर्थ्यमेव AṇuBh. 52. 22 (*on* i. 2.1)

अन्यनिराकरणपरत्व (anyanirākaraṇapara-tva) *n.* the state of being meant for the refutation of another(option) समविभागसाधकं विषमविभागनिषेधकं चोक्तं तदपि ... निराकृतमित्युक्तं तत् तत् सूत्रादर्शनमूलकमान्यसूचकम्। तस्यान्यनिराकरणपरत्वं तत्र हि स्पष्टम् BālamBha. ii. 137. 12 (*on* 2.116)

अन्यनिराकरणार्थम् (anyanirākaraṇārtham) *adv.* for the sake of the refutation of another (objection) परोक्षेण ब्रह्मकथनार्थमक्षरपदमन्यनिराकरणार्थम् AṇuBh. 78. 8 (*on* i. 3.10)

अन्यनिराकाङ्क्ष (anya-nirākāṅkṣa) *adj.* having no expectancy for another, independent of another यत्र त्वन्यनिराकाङ्क्षेण शास्त्रेण विहितस्यानुष्ठानमन्यप्रयुक्तमुपजीव्यते तत्र प्रसङ्गः TantrRa. 85. 9.

अन्यनिराकृति (anya-nirākṛti) *f.* exclusion of another (meaning) यदि गौरित्ययं शब्दः कृतार्थोऽन्यनिराकृतौ। जनको यदि गोबुद्धेर्मृग्यतामपरो ध्वनिः Kāvyālaṅ. (Bh.) 6.17; TattvSaṁ. 912.

अन्यनिराशंस (anya-nirāśaṁsa) *adj.* independent of another (meaning) यावद्भिरर्थैः संबन्धः प्राक्छब्दस्यावधारितः। तावत्स्वन्यनिराशंसः श्रुतः सन् कुरुते गतिम् VyaktiVi. 124.12.

अन्यनिराशा (anya-nirāśā) *f.* [Inst.] without hope for another सा ... क्षुद्बाधितं द्विजम्। तद्घृतं याचमानं तं रुणद्ध्यन्यनिराशया PrabhāC. 16.4.

अन्यनिरास (anya-nirāsa) *m.* exclusion of another thing विध्यात्मनास्य वाच्यत्वे त्याज्यमेकान्तदर्शनम्। सर्वत्रान्यनिरासोऽयं शब्दार्थ इति वर्णितम् TattvSaṁ. 998.

अन्यनिरीक्षिणी (anya-nirīkṣiṇī) *adj.* (*f.*) looking at another person हीनंजातिरता नारी पथि चान्यनिरीक्षिणी। आत्मलावण्यनिरता संत्याज्येत्थंविधा वधूः ĀdiP. i.18.16.

अन्यनिरीक्षित (anya-nirīkṣita) *adj.* aspected by another (planet) नराः। अभियाचितमात्रदीक्षिता निहतैरन्यनिरीक्षितैरपि Bṛhajjā. 15. 2.

अन्यनिरुत्सुका (anya-nirutsukā) *adj.* (*f.*) indifferent towards any another person ओषाञ्चकार कामाग्निर्दशवक्त्रम् ...। विदाञ्चकार वैदेहीं रामादन्यनिरुत्सुकाम् Bhaṭṭi. 6. 1.

अन्यनिरुद्धा (anya-niruddhā) *adj.* (*f.*) surrounded or restrained by other (keeper of prostitutes) बहुधान्यनिरुद्धाः कथमप्यभिगम्यन्तेऽन्तः पण्यस्त्रियो बहिश्च क्षेत्रभूमयः NalaCam. 1. 30 (16)

अन्यनिरूपित (anya-nirūpita) *adj.* described or conditioned by another thing अन्यनिरूपितपूर्ववर्त्तित्वग्रहहेतुककार्यपूर्ववर्त्तित्वग्रहविषयत्वं द्वितीयम् BhāṭṭCin. 34. 31 (*on* i. 1. 4)

अन्यनिरूप्य (anya-nirūpya) *adj.* to be described or conditioned by another thing भेदस्य सादृश्यादिवदन्यनिरूप्यस्यैकमात्रवृत्तित्वात् Nyāyāmṛ.557A.9.

अन्यनिरूप्यत्व (anyanirūpya-tva) *n.* the state of being what is to be described or conditioned by another thing प्रतियोगिनो भेदस्वभावानन्तर्भावेऽपि स्वभावभूतस्य भेदस्य वस्तुस्वभाववदेवान्यनिरूप्यत्वानुपपत्तेः TattvPradī. (Ci.) 168. 9.

अन्यनिर्णय (anya-nirṇaya) *m.* ascertainment of another (as denotative of meaning) तत्संबन्धानुरूपार्थवाचित्वेनान्यनिर्णयः ŚlokaVār. 7. 184 (896. 6)

अन्यनिर्देश (anya-nirdeśa) *m.* direction or indication of another अन्यनिर्देशस्तु निवर्तकस्तस्मात्परिभाषा Vār. 3 *on* P. i. 3. 11; अन्यनिर्देशस्तु लोके निवर्तको भवति MahāBh. i. 272. 7 (*on* i. 3. 11); i. 273. 3 (*on* i. 3. 11); यत्र अन्यनिर्देशो नास्ति तत्रोपतिष्ठते Nyās. i. 219. 20 (*on* i. 3. 11); अन्यनिर्देशस्तु निवर्तकः, तद्यथा देवदत्ताय गौर्दीयताम्, विष्णुमित्राय कम्बल इति कम्बलो गोर्निवर्तको भवति PadMañ. *on* KāśiVṛ. *on* P. i. 3. 11 (409. 6)

अन्यनिर्भासम् (anyanirbhāsam) *adv.* by way of envisaging something else अनिर्भासं सनिर्भासमन्यनिर्भासमेव च। विजानाति न च ज्ञानं बाह्यमर्थं कथंचन TattvSaṁ. 1999.

अन्यनिर्हरण (anya-nirharaṇa) *n.* act of carrying (the dead body) of another person आचार्यादीनां दाहदशाहे ... ब्रह्मचारी ब्रह्मचर्येव न लुप्तव्रतो भवतीत्यर्थः। एवं चान्यनिर्हरणे भवत्येव DīpKa. 76. 15 (*on* 3. 15)

अन्यनिवर्तक (anya-nivartaka) *adj.* [*f.*-ikā] 1 which expels or removes another (nescience) आत्मा चेदीश्वरोऽस्मीति विद्या सान्यनिवर्तिका UpadeSā.140.1; 2 which excludes another षण्णां श्राद्धदेवतात्वं विधीयते इति नान्यनिवर्तकमिति CaturCin. iii (1). 120. 8.

अन्यनिवर्तकधर्म (anyanivartaka-dharma) *m.* property or character which excludes another विषयवाक्यानुगुण्यं सूत्रस्य स्यात्। तत्र ह्यन्यनिवर्तकधर्मो द्रष्टृत्वादिरवगम्यते ŚrutaPra. ii. 24. 13 (*on* i. 3. 11)

अन्यनिवर्तन (anya-nivartana) *n.* A exclusion of another यश्च नैवंविधो भावस्तस्य नैव निवृत्तिः। ऐकान्तिकमसंबन्धाद्रूप्यतेऽन्यनिवर्तनम् TattvSaṁ. 121; स्वार्थाभिधाने शब्दानामर्थादन्यनिवर्तनम्। तद्योगो व्यतिरेकोऽपि मम तत्पूर्वको ह्यसौ TattvSaṁ. 1096; B removal, i.e. negation of another वर्णादन्योऽथ नादात्मा वायुरूपमवाचकम्। पदवाक्यात्मकः स्फोटः सारूप्यान्यनिवर्तने TattvSaṁ. 2311; ŚlokaVār. 6. 320 (811. 3); स्फोटश्च द्विविधो वैयाकरणाभिमतः सारूप्यान्यनिवर्तने च सांख्यसौगताभिमते NyāyRa. 811. 14 (*on* 6. 320)

अन्यनिवारक (anya-nivāraka) *adj.* (used as noun) (guard) preventing other people अयं क इत्यन्यनिवारकाणां गिरा विभुर्द्वारि विभुज्य कण्ठम्। दृशं ददौ विस्मयनिस्तरङ्गां स लङ्घितायामपि राजसिंहः NaiṣC. 6. 12.

अन्यनिवृत्ति (anya-nivṛtti) *f.* 1A exclusion of another चादीनामपि नञ्योगो नैवास्तीत्यनपोहनम्। वाक्यार्थेऽन्यनिवृत्तिश्च व्यपदेष्टुं न शक्यते TattvSaṁ. 978; ŚlokaVār. 5 (13). 148 (604. 10); सारूप्यान्यनिवृत्ती च नित्येतत् साधयिष्यते। तस्माद्धेतुर्न सामान्यमस्ति सिद्धं द्वयोरपि ŚlokaVār. 5. 103 (241. 6); यद्यपि च नियमे अन्यनिवृत्तिरवश्यं कल्पनीया, तथापि साधुशब्दस्मृतिव्यवहितानाम् ... अपशब्दानाम् ... व्यावृत्तिः संभवति TantrVā. 233. 4 (*on* i. 3. 25); न तु वाक्यार्थ एवान्यनिवृत्तिनिर्भेदपक्षवत्। अप्रवृत्त्यैव तत्सिद्धेः प्रवृत्तो हि निवर्त्यते TantrVā. 729. 18 (*on* iii. 1. 14); रूपादिविधातृत्वात्र प्रत्यक्षमन्यनिषेधकं स्वविषयतामात्रपर्यवसानात् अन्यनिवृत्तिरभावप्रमाणगम्या BrahmSūBh. (Bhā.) 99. 5 (*on* ii. 1. 14); नाटकस्य प्रकरणस्योभयोः संकरात्मिका। लक्ष्यते नाटिकाप्यत्र संकीर्णान्यनिवृत्तये BhāvPra. (Śā.) viii. 243. 18; न ह्यत्र पूर्ववन्मन्त्रस्यान्यनिवृत्तिः शक्यते शङ्कितुम् MīmāKau. iii (1). 61. 16 (*on* i. 2. 33); BhāṭṭDī. i.12.1 (*on* i.1.6); 1B removal, i.e. negation of another केवलप्रत्यक्षलक्षणकरणमन्यनिवृत्तिं मूढतां वा सूत्रकारस्य सूचयति TātpaṬ. (U.) 122. 20 (*on* 4. 8); उपसेचनश्रुत्या सर्वप्राप्तेर्ब्रह्मक्षत्रग्रहणमनुवादमात्रमन्यनिवृत्तौ वाक्यभेदात् BrahmSūBh. (Bhā.) 40. 20 (*on* i. 2. 9); अन्यनिवृत्तेरशाब्दत्वात् अनर्थत्वाद्य Bhām. 168. 11 (*on* i. 2. 9); यस्मादेतद्व्यतिरिक्तं यदसौ कर्म कुरुते तदस्य निष्फलं भवतीति पूर्वस्तुत्यर्थं न त्वन्यनिवृत्तये। पाकयज्ञादीनामपि तस्य विहितत्वात् ManvaMu. 449. 2 (*on* 10. 123); करणे चार्थदिवान्यनिवृत्तेः सिद्ध्युपपत्तेः फलत्वायोगात् MīmāKau. iii (1). 80. 2 (*on* i. 2. 44); iii (1). 80.14 (*on* i. 2. 44); वसिः शपा लुका यौतिर्निर्दिष्टोऽन्यनिवृत्तये SiddhāKau. 351A. 7 (*on* vii. 1. 5); 1C removal i.e. negation of the rest इहान्यनिवृत्तिरनर्थिका पुरुषार्थविशेषानवगमादित्यर्थः VedāntKa. 137. 11 (*on* i. 2. 9); 2 inapplication of another (means) यदि त्वन्यनिवृत्त्यैव परिशेषः प्रकल्प्यते। शशशृङ्गनिमित्तत्वं फलानां किं न गम्यते TantrVā. 361. 20 (*on* ii. 1. 5); 3 cessation of another अन्यनिवृत्त्यैव कार्यकारणभाव आक्षिप्त इति नासौ सूत्रकारेण दर्शनीयः TātpaṬ. (Vā.) 82. 3 (*on* i. 1.1)

अन्यनिवृत्तिपर (anyanivṛtti-para) *adj.* 1 referring to the removal, i.e. negation of another प्रतिग्रहे च क्रीते च नालेख्या सिद्ध्यति क्रिया। इति यदिदं कात्यायनीयवचनं तल्लेख्यप्राधान्यपरं, न त्वन्यनिवृत्तिपरम् VyavaNi. 88. 3; 2 referring to the exclusion of another गोदक्षिणात्वम् ... अन्यनिवृत्तिपरं भवति TantrRa. 59. 2.

अन्यनिवृत्तिपरत्व (anyanivṛttipara-tva) *n.* the state of referring to the removal, i.e. negation of another तत्पूर्वपदोत्तरपदग्रहणमिति। अन्यनिवृत्तिपरत्वादस्य व्यतिकरेऽपि कार्यप्रवृत्तिः Pradī. v. 221B. 7 (*on* vi. 3. 23); यतः पुत्रिकासुत इत्येतस्माच्छब्दादपुत्रिकासुतस्य निवृत्तिरेव गम्यते। शब्दवृत्तेरन्यनिवृत्तिपरत्वादिति CaturCin. iii (1). 83. 9; ननु सर्वस्यापि शब्दस्यान्यनिवृत्तिपरत्वान्नाध्याहारदोषः CaturCin. iii (1). 97. 16; अन्यनिवृत्तिपरत्वाद्यास्य तेषां परस्परव्यतिरेकेऽपि भवति PadMañ. *on* KāśiVṛ. *on* P. vi. 3. 23 (212.15)

अन्यनिवृत्तिप्रयुक्ता (anyanivṛtti-prayuktā) *adj. (f.)* caused by the cessation of another अत्र च शोभनत्वाशोभनत्वसत्तायामेव वक्तव्यायाम-सत्तामुखेनाभिधानमन्यनिवृत्तिप्रयुक्ता तन्निवृत्तिरिति ख्यापनार्थम् AlaṅkāSa. 83. 8.

अन्यनिवृत्तिफल (anyanivṛtti-phala) *n.* fruit in the form of exclusion of another वेदवाक्याविरोधस्य सति संभवे लौकिकार्थग्रहणं कर्तव्यम्। ... 'वेदवाक्यविरोधे न' इत्यन्यनिवृत्तिफलम् TātpaṬ. (U.) 13.14 (*on* 1.47); प्रत्यासन्नां वावहन्तिनियततामुत्सृज्य नान्यनिवृत्तिफलकल्पनावसरः TantrVā. 59. 18 (*on* i. 2. 42)

अन्यनिवृत्तिफल (anyanivṛtti-phala) *adj.* having exclusion of another as its fruit प्राप्तार्थो हि विधिरन्यनिवृत्तिफलो विज्ञायते BrahmSi. 29. 14; अत्यन्ताप्राप्तमर्थं हि विधयो बोधयन्ति नः। प्राप्तार्थो यो विधिः सोऽन्यनिवृत्तिफल इष्यते BṛĀraUBhVā. (Sambandha.) 413.

अन्यनिवृत्तिफलक (anyanivṛttiphala-ka) *adj.* having exclusion of another as its fruit अन्यनिवृत्तिफलकसिद्धविषयकविधित्वमेव नियमत्वम् LaŚabdeŚe. i. 308. 16.

अन्यनिवृत्तिफलत्व (anyanivṛttiphala-tva) *n.* the state of having exclusion of another as its fruit अग्निहोत्रशब्दोपादानादौपासनपरिग्रहेऽपि नैव परिवेदनं भवति शब्दप्रवृत्तेरन्यनिवृत्तिफलत्वात् CaturCin. iii (3). 814. 12.

अन्यनिवृत्तियुक्त (anyanivṛtti-yukta) *adj.* associated with the cessation of another शेषशब्दोऽन्यनिवृत्तियुक्तमवस्थानमाह Pradī. vi. 253. 15 (*on* vii. 4. 60)

अन्यनिवृत्तिरूप (anyanivṛtti-rūpa) *adj.* 1 of the form of exclusion of another नान्यनिवृत्तिरूपत्वं भावप्रतीतेः SāṁkhyaPraSū. 5. 93; तयोरुभयोरप्यन्य-निवृत्तिरूपतया अवस्तुत्वात् TātpaṬ. (Vā.) 136. 14 (*on* i. 1. 3); 2 of the form of removal, i.e. negation of the rest अन्यनिवृत्तिरूपपरार्थस्यार्थसिद्धत्वेना-कल्पनीयत्वात् BhāṭṭDī. i. 35. 15 (*on* i. 2. 4)

अन्यनिवृत्तिवत् (anyanivṛtti-vat) *adv.* like the removal, i.e. negation of the rest "व्रीहिभिर्यजेत" इत्यत्र तृतीयया निरपेक्षसाधनत्वबोधनादन्यनिवृत्तिवदत्रापि निरपेक्षसाधनत्वप्रतीतेर्घृतमात्रेणैव श्राद्धं न त्वन्नादिना ViraMi. (Tirtha.) 25. 17.

अन्यनिवृत्तिसाम्य (anyanivṛtti-sāmya) *n.* equality in the case of exclusion of another उपसंहार एव अन्यनिवृत्तिसाम्यान्नियम इत्युक्तम् TantrRa. 141. 16

अन्यनिवृत्तिस्फुरण (anyanivṛtti-sphuraṇa) *n.* manifestation of the removal, i.e. negation of another अन्यनिवृत्तिस्फुरणान्नेष दोष इति चेत् ĀtmaTaVi. 278.5.

अन्यनिवृत्त्यंश (anyanivṛtty-aṁśa) *m.* A element or aspect of the removal, i.e. negation of another तस्माद्येष्वेव शब्देषु नञ्योगस्तेषु केवलम्। भवेदन्यनिवृत्त्यंशः स्वात्मैवान्यत्र गम्यते TattvSaṁ. 1002; ŚlokaVār. 5 (13). 164 (611. 4); B element or aspect of the exclusion of another नियमार्थे ह्युभे शास्त्रे ...। प्राप्ते चान्यनिवृत्त्यंशः फलमर्थात्प्रतीयते TantrVā. 91. 12 (*on* i. 3. 3)

अन्यनिवृत्त्यर्थ (anyanivṛttyartha) *adj.* A meant for the removal, i.e. negation of another (letter) उरण्परवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषः Vār. 1 *on* P. i. 1. 51; MahāBh. i. 125. 21 (*on* i. 1. 51); न वर्ष्यणः पुनर्वचनमन्यनिवृत्त्यर्थम् Vār. 3 *on* P. iv. 1. 114; MahāBh. ii. 256. 15 (*on* iv. 1. 114); कोपधादणः पुनर्वचनमन्यनिवृत्त्यर्थम् Vār. 5 *on* P. iv. 2. 104; MahāBh. ii. 294. 11 (*on* iv. 2. 104); रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थम् Vār. 1 *on* P. v. 2. 95; KāśiVṛ. *on* v. 2. 95; B meant for the exclusion of another आनन्दशब्दस्यामुख्यार्थोऽपि अपर्यायत्वात् भिन्नार्थस्स्यात्। ... अन्यनिवृत्त्यर्थानां निवृत्तेरवस्तुत्वात् नाभेदविरोधित्वम् IṣṭaSi. 26. 20; अथ सिद्धे संश्रयणे तद्वचनमन्यनिवृत्त्यर्थमिति परिसंख्या तथा स्यात् ManuBh. i. 81. 19 (*on* 2. 24); अस्यामेवाशङ्कायां द्वितीयमिति वचनम् अन्यनिवृत्त्यर्थम् ManuBh. ii. 259. 1 (*on* 9. 61); सभ्यैरेवेत्यवधारणमन्यनिवृत्त्यर्थम् SmṛtiCan. iii. 37. 3.

अन्यनिवृत्त्यर्थता (anyanivṛttyartha-tā) *f.* the state of being meant for the exclusion of another न च प्राप्ते सति विधिरयं प्रवृत्तो येनास्यान्य(नि?)-वृत्त्यर्थता कल्प्येत TantrVā. 59. 20 (*on* i. 2. 42)

अन्यनिवृत्त्यर्थत्व (anyanivṛttyartha-tva) *n.* the state of being meant for the exclusion of another आनन्दशब्दस्य मुख्यार्थत्वेऽपि अन्यनिवृत्त्यर्थत्वोपपत्ते-र्नाभेदविरोधित्वम् IṣṭaSi. 26. 23.

अन्यनिवेश (anya-niveśa) *m.* another, i.e. further addition (to one's share) बहुना कालेनायथाकृततां ब्रूयाद्यावदितरैः स्वेषु स्वेषु भागेष्वन्यनिवेशशीर्ण-प्रतिसंस्कारादि कृतं भवेत् ManuBh. ii. 254. 19 (*on* 9. 47)

अन्यनिश्चायिन् (anya-niścāyin) *adj.* which determines another (thing) सकलप्रतिभासस्य भ्रान्तत्वासिद्धितः स्फुटम्। प्रमाणं स्वान्यनिश्चायि द्वयसिद्धौ प्रसिध्यति Nyāyāva. 7.

अन्यनिःशेषगुण (anyaniśśeṣa-guṇa) *m.* all other virtues यदन्यनिःशेष-गुणैरपाकृतं तपोऽधिकश्रेञ्जगतापि पूज्यते SubhāRaSaṁ. 894.

